Volume I

ILLUSTRATED CARAKA SAṂHITĀ

English Translation along with Cakrapāṇi Commentary

Sūtrasthāna



R. VIDYANATH

13

CHAPTER



Snehādhyāya

स्नेहाध्याय

Doubts Regarding Oleation Therapy 414

Sneha-Yoni (Origin of Oleating Substances) 416

Properties of Tila Taila & Eraṇḍa Taila 417

Types of Sneha Dravya 417

Properties of Ghṛta 419

Properties of Taila 419

Properties of Vasā 419

Properties of Majjā 420

Suitable Seasons for the Use of Different Types of Oleating Substances 420

Time of Administration of Different Types of Oleating Substances 421

Complications due to Untimely Administered Oleating Substances 422

Anupāna for Different Types of Oleating Substances 423

24 Types of Sneha Vicāraṇa 424

Importance of Acchapeya 425

64 Types of Vicāraṇa 425

Sneha Mātrā 426

Eligible Patients and Diseases for Uttama Sneha Mātrā 427

Advantages of Uttama Sneha Mātrā 428

Eligible Patients and Diseases for Madhyama Sneha Mātrā 428

Advantages of Madhyama Sneha Mātrā 428

Eligible Patients and Diseases for Hrasva Sneha Mātrā 429

Advantages of Hrasva Sneha Mātrā 429

Indications for the Administration of Ghṛta 429

Indications for the Administration of Taila 430

Indications for the Administration of Vasā 431

Indications for the Administration of Majjā 432

Duration of Snehapāna 432

General Indications for Oleation Therapy 433

Contraindications for Oleation Therapy 433

Features of Proper, Improper and Excessive Oleation Therapy 435

Recommended Diet the day before Snehapāna 435

Post-operative Care 436

Mṛdu Koṣṭha-Krūra Koṣṭha 437

Mṛdu Koṣṭha Lakṣaṇa 437

Krūra Koṣṭha Lakṣaṇa 438

Sneha Vyāpath 438

Management of Tṛṣṇā 439

Sneha Vyāpath (Complications of Oleation Therapy) 440

Management of the Complications 441

Reasons for Complications 441

Virecana after Snehapāna 442

Vamana after Snehapāna 442

Indications for Sneha Vicārаṇa 443

Pāñcaprasṛtakī Peyā 444

Contraindicated Substances in Certain Diseases 445

Sneha Dravya for Yoni Doṣa & Śukra Doṣa 445

Simile Regarding the Effect of Instant Oleation 446

Advantage of Salt in Oleation 447

To Sum Up 447

Chapter 13

Snehādhyāya

स्नेहाध्याय

अथातः स्नेहाध्यायं व्याख्यास्यामः॥1॥
इति ह स्माह भगवानात्रेयः॥2॥

After *Vāta-Kalākalīya Adhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Snehādhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

निर्देशवातकलाकलीये वातादयोऽभिहिताः, तेषां भेषजं यथा कल्पनीयं तदुपदेष्टुं कल्पनाचतुष्कोऽभिधीयते।- The details about *Vāta* and other *Doṣās* are explained in the previous chapter named *Vāta-Kalākalīya Adhyāya* which belongs to "*Nirdeśa Catuṣka*". For the sake of the drugs and their method of preparation useful for the management of these *Doṣās* "*Kalpanā Catuṣka*" is described.

भेषजानां कल्पना भेषजकल्पना, सा च कल्पना आश्रयद्रव्याभिधानं विना न पार्यते कल्पयितुम्;- The preparation of the medicine is known as *Bheṣaja Kalpanā*. For the preparation of various medicines, raw drugs are essential.

अत: स्नेहादिद्रव्यगोचरा स्नेह-स्वेद-वमन-विरेचनकल्प नेहाभिधीयते, बस्तिकल्पना त्विह बहुवक्तव्यत्वान्नोक्ता।- Hence various pharmaceutical preparations useful for *Sneha*, *Sveda*, *Vamana* and *Virecana* are explained here based on the available drugs which are having unctuousness and other properties. The recipes useful for *Vasti* are not explained at this juncture owing to its lengthy description.

अत्रापि वमनादिप्रवृत्तौ स्नेहस्यैव प्रथमं विधीयमानतया तथा दोषप्रधानस्य वातस्य प्रधानभेषजत्वाच्च तत्प्रतिपादक एव स्नेहाध्यायोऽभिधीयते। स्नेहस्य प्रतिपादकोऽध्यायः स्नेहाध्यायः।।- In the middle of these therapeutic procedures, *Sneha* is explained initially because it should be conducted before *Vamana* and *Virecana* etc. and also it is the best one for the management of *Vāta*, the most important among all the *Doṣās*. As the chapter is dealing with *Sneha Dravya* (unctuous substances) it is so named as *Snehādhyāya*.

सांख्यैः संख्यातसंख्येयैः सहासीनं पुनर्वसुम्।
जगद्धितार्थं पप्रच्छ वह्निवेशः स्वसंशयम्॥3॥

Once upon a time Lord *Punarvasu* was sitting with erudite scholars and then the sage *Agniveśa* has put forth certain doubts before him for the benefit of mankind.

Cakrapāṇi:

संख्या सम्यग्ज्ञानं, तेन व्यवहरन्तीति सांख्याः।- *Saṅkhyā* means accurate knowledge. Whoever possesses such knowledge is called *Sāṅkhya*.

संख्यातं ज्ञातं संख्येयं ज्ञेयं यैस्ते तथा; यदि वा 'संख्यातसंख्येयम्' इति पाठः,- '*Saṅkhyāta Saṅkhyeyam*' means one who has considered

what is to be considered.

तदा पुनर्वसुविशेषणमेतत्; अर्थस्तु समानः।- This epithet is applicable to *Ātreya Punarvasu*. Then also it conveys the similar meaning.

सांख्यैः सहावस्थानोपदर्शनमात्रेयस्य कर्तव्यप्रश्नानुगुण-मनःसमाधानोपदर्शनार्थम्।- Lord *Ātreya* has sat together along with the knowledgeable persons to answer the doubts raised by them.

संशयमिति संशयेन विषयिणा विषयं लक्षयति, तेन संशयमिति संशयविषयमित्यर्थः।।- *Saṃśaya* means doubt. By raising the doubts the subject will be revealed. Thus to reveal the subject from the preceptor, the scholars raised the doubts to enrich their knowledge.

Doubts Regarding Oleation Therapy [5-8]

किंयोनयः कति स्नेहाः के च स्नेहगुणाः पृथक्।
कालानुपाने के कस्य कति काश्च विचारणाः।।4।।
कति मात्राः कथंमानाः का च केषूपदिश्यते।
कश्च केभ्यो हितः स्नेहः प्रकर्षः स्नेहने च कः।।5।।
स्नेह्याः के के न च
स्निग्धास्निग्धातिस्निग्धलक्षणम् ।
किं पानात् प्रथमं पीते जीर्णे किंच हिताहितम्।।6।।
के मृदुक्रूरकोष्ठाः का व्यापदः सिद्धयश्च काः।
अच्छे संशोधने चैव स्नेहे का वृत्तिरिष्यते।।7।।
विचारणाः केषु योज्या विधिना केन तत् प्रभो!।
स्नेहस्यामितविज्ञान ज्ञानमिच्छामि वेदितुम्।।8।।

- What are the sources of *Sneha dravya* (unctuous substances)?
- How Many types of *Sneha dravyās* are there?
- What are the features of different types of *Sneha dravya*?
- What are the appropriate timings for the internal administration of different types of *Sneha dravya* and their *Anupāna* (post-prandial drink)?
- What is meant by *Sneha Vicāraṇa* (administration of *Sneha dravya* along with other food substances) and how many types are there?
- How many types of *Sneha mātrā* (dosage) are there?
- What is the measurement of each of them?
- What dose should be prescribed for whom?
- Which one of the dosage is suitable to whom?
- Which one is the best one among all the *Sneha dravyās*?
- Who are eligible and not eligible for oleation therapy?
- What are the features of proper, insufficient and excessive oleation therapy?
- What is beneficial and what is harmful before and after *Snehapāna* and also after completion of digestion?
- What are the features of *Mṛdu-Koṣṭha* and *Krūra-Koṣṭha*?
- What are the complications of oleating therapy? And what are their management methods?
- What is the regimen prescribed for *Śamana Sneha* and *Śodhana Sneha*?
- To whom *Vicāraṇa* type of *Sneha* is to be given and how they should be prepared?

The sage *Agniveśa* requested his preceptor as under.

"Oh! Lord I would like to know all about oleation therapy"



Cakrapāṇi:

कोऽसौ संशय इत्याह- किंयोनय इत्यादि।- Beginning the verse with the word '*Kiṃ yonaya*', the author has presented the doubts regarding oleation therapy.

किंयोनयः किमाधारकारणाः।- '*Kiṃ yonaya*' means what are the sources of *Snehadravya*?

कालश्चानुपानं च कालानुपाने।- *Kālānupāna* means both the *Kāla* and *Anupāna.* That means what are the appropriate timings for the internal administration of different types of *Sneha dravya* and their *Anupāna*?

विचारणा द्रव्यान्तरासंयुक्तस्नेहपानं वर्जयित्वा स्नेहोपयोगः।- *Vicāraṇa* means the use of unctuous substances by combining with other drugs or through different media.

कथंमाना कीदृङ्माना। का चेति मात्रा। What is the measurement of each of them? What dose should be prescribed for whom?

प्रकर्षः कालप्रकर्षः।- *Prakarṣa* means the time period.

स्नेहने स्नेहयुक्तिक्रियायाम्।- *Snehane* means administration of *Snehadravya.*

के नचेति के न च स्नेह्या:।- *Ke Naceti* means that those who are not eligible for oleation therapy.

गोबलीवर्दन्याय

Gobalīvarda Nyāya

Go means the cow and *Balīvarda* means the ox. Thus *Gobalīvarda Nyāya* means "The maxim of the cow and bull"

Here the word cow signifies both a male cow and a female cow; but ordinarily it is used in the sense of a female cow only. Similarly the ordinary acceptance of a word is not always what it strictly or derivatively signifies. Thus according to the present *Nyāya*, it has to be considered as the relative meaning or hidden meaning.

While explaining the detailed description about *Snehapāna*, the commentator has employed this maxim. Here the term *Accha* refers to pure oleating substance and is meant for *Śodhana*; however it can be taken for both *Śodhana* (purificatory therapy) and *Śamana* (pacification) according to *Gobalīvarda Nyāya.* (Ca. Sū. 13/8)



किं पानात् स्नेहपानात् प्रथमं पूर्वं हिताहितं; किंच पीते स्नेहे तथा जीर्णे च स्नेहे हिताहितमिति योज्यम्।- What

is wholesome and unwholesome before and after *Snehapāna* and also after completion of digestion?

सिद्धयो व्यापत्साधनानि भेषजानि।- *Siddhayo* means the drugs useful for the management of complications.

अच्छे इति संशोधनपृथङ्निर्देशाद्गोबलीवर्दन्यायेन संशमन इति भवति।- The word '*Accha*' refers to *Kevala Sneha* (pure unctuous substance without mixing with any other substance). As *Kevala Sneha* is mentioned for *Śodhana* purpose it can be considered for *Śamana* also according to *Go-balivarda Nyāya.*

वृत्तिरिति वृत्तिः उपचारविधानम्।- *Vṛtti* means management.

ज्ञानं शास्त्रम्।।- *Jñānaṃ* refers to scriptural knowledge.

Sneha-Yoni (Origin of Oleating Substances) [9-11]

अथ तत्संशयच्छेत्ता प्रत्युवाच पुनर्वसुः।
स्नेहानां द्विविधा सौम्य योनिः स्थावरजङ्गमा।।9।।
तिलः प्रियालाभिषुकौ
बिभीतकश्चित्राभयैरण्डमधूकसर्षपाः ।
कुसुम्भबिल्वारुकमूलकातसीनिकोचकाक्षो-
डकरञ्जशिग्रुकाः ।।10।।
स्नेहाशयाः स्थावरसंज्ञितास्तथा
स्युर्जङ्गमा मत्स्यमृगाः सपक्षिणः।
तेषां दधिक्षीरघृतामिषं वसा स्नेहेषु
मज्जा च तथोपदिश्यते।।11।।

To clarify the doubts of *Agniveśa*, Lord *Ātreya* was replied as mentioned under.

Oh! Gentleman, the origin of oleating substances (*Sneha-yoni*) is of two types viz. *Sthāvara* (plant origin) and *Jaṅgamā* (animal origin).

Originated from Plants:- The seeds of *Tila, Priyāla, Abhiṣuka, Vibhītaka, Citrā, Abhayā, Eraṇḍa, Madhūka, Sarṣapa, Kusumbha, Bilva, Āruka, Mūlaka, Atasī, Nikocaka, Akṣoḍa, Karañja* and *Śigru* yields oil and belongs to plant origin.

Originated from Animals:- The curds, milk, ghee, *Māṃsa, Vasā* and *Majjā* of *Matsya, Mṛga, Pakṣi* (fish, animals and birds) are the oleating substances and related to animal origin.

Cakrapāṇi:

अभिषुक औत्तरापथिकः।- *Abhiṣuka* is the plant mostly grows in north India.

चित्रा गोरक्षकर्कटी, तद्बीजमिह; यदि वा चित्रा लोहितैरण्डः।- *Citrā* means *Gorakṣakarkaṭī*. The seed is to be taken. *Citrā* also may be considered as red variety of castor plant (*Rakta Eraṇḍa*).

अतसी 'उमा' इति ख्याता।- *Atasī* means *Umā*.

आरुकनिकोचकाक्षोडा औत्तरापथिकाः।- *Āruka, Nikocaka* and *Akṣoḍa* are also the plants grows in north India.

स्नेहाशयाः स्नेहस्थानानि।- *Snehāśayā* means the seat or receptacle for unctuous substances.

एते चाविष्कृततमत्वेनोक्ताः, तेन निम्बतैलादयो

बोद्धव्या:।- These are only mentioned here because of their wider utility. By this *Nimba Taila* and others also can be considered.

आमिषं मांसम्।।- *Āmiṣa* means *Māṃsa* i.e. meat.

Properties of Tila Taila & Eraṇḍa Taila [12]

सर्वेषां तैलजातानां तिलतैलं विशिष्यते।
बलार्थे स्नेहने चाग्र्यमैरण्डं तु विरेचने॥12॥
(कटूष्णं तैलमैरण्डं वातश्लेष्महरं गुरु ।
कषायस्वादुतिक्तैश्च योजितं पित्तहन्त्रपि ॥1॥)।

Among all the oily substances *Tila Taila* (gingili oil) is the best one to bestow strength as well as for oleation and *Eraṇḍa Taila* (castor oil) is the best one for purgation.

Eraṇḍa Taila possesses *Kaṭu Rasa*, *Uṣṇa* and *Guru Guṇa*. Hence it acts as *Vāta-śleṣma hara*. When it is mixed with the substances having *Kaṣāya*, *Madhura* and *Tikta Rasa*, it alleviates *Pitta* also.

Cakrapāṇi:

तैलजातानामिति जातशब्दः प्रकारवचनः; यथा- "यदाहारजातमग्निवेश" (सू.अ.25) इत्यादि।- *Tailajātānām* means among the varieties of oils (*Taila*). The similar meaning can be interpreted for *Āhārajātam* as among the varieties of food substances (Ca. Sū. 25).



Tila Taila Eraṇḍa Taila

अत्र यद्यपि योगात्तिलभवमेव तैलं, तथाऽपि रूढ्येह सर्व एव स्थावरस्नेहास्तैलमित्युच्यन्ते। यदुक्तं सुश्रुते- "निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि" (सु.सू.अ.45) इति।- To be frankly speaking the word '*Taila*' refers to the oil obtained from the seeds of *Tila* i.e. sesamum. But it denotes all the varieties of oils because of the similar method of extraction and properties vide reference cited in the 45th chapter of *Suśruta Saṃhitā Sūtrasthāna*.

विशिष्यते अतिरिच्यते।- *Viśiṣyate* refers to the best among others.

अग्र्यमित्यैरण्डेन संबध्यते।।- Here the word *Agrya* pertaining to *Eraṇḍa*. Hence it should be understood as *Eraṇḍa Taila* is the best one among all the oils for purgation.

Types of Sneha Dravya [13]

सर्पिस्तैलं वसा मज्जा सर्वस्नेहोत्तमा मताः।
एषु चैवोत्तमं सर्पिः संस्कारस्यानुवर्तनात्॥13॥

Though many a number of unctuous substances are available in the nature, *Sarpi* (ghee), *Taila* (gingili oil), *Vasā* (muscle fat) and *Majjā* (bone marrow) are being considered as the best among them. Among these four, ghee is par-excellence because it can assimilate the properties of other substances.

Cakrapāṇi:

सर्वस्नेहोत्तमा इत्यत्र सर्वशब्देन दधिक्षीरादयो गृह्यन्ते; सर्वस्नेहोत्तमत्वं च सर्पिरादीनां स्नेहगुणप्रकर्षवत्त्वेन। संस्कारो गुणान्तरारोपणं, तस्यानुवर्तनमनुविधानं स्वीकरणमिति यावत्। एतदुक्तं भवति- यत्- न तथा तैलादयो द्रव्यान्तरसंस्कृताः संस्कारगुणान् वहन्ति यथा सर्पिरिति। अत एवोक्तं- "नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते। यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम्" (नि. अ.1)।- The word '*Sarva*' refers to curd, milk and other oleating substances mentioned

as above. Among all those substances *Sarpi*, *Taila*, *Vasā* and *Majjā* are considered as the best because of their excelling in qualities. *Saṃskāra* means addition of another or better quality. *Tasya Anuvartanāt* means being carry forward the additional quality along with the own quality. That means no other substance can be able to withhold its own quality along with the additional one, when being processed except ghee. Hence ghee is being considered as the best one among all the oily substances.



अत एव संस्कारकद्रव्यचित्रकादिगुणानुविधानेऽपि सर्पिर्न स्वगुणान् स्नेहशैत्यादीन् जहाति, किंच स्वगुणान् तद्गुणांश्च वहति, यतोऽनुशब्देन पश्चाद्वाचिना स्वगुणवर्तनस्य पश्चात् संस्कारकगुणवर्तनमुच्यते।– Therefore when ghee is processed with *Citraka*, without losing its own properties like unctuousness and coldness, it acquires the qualities of hotness and pungent taste also. '*Anu*' refers to the meaning afterwards. By keeping the original quality and by assimilating another property after processing is known as '*Saṃskāraka-guṇa-vartanam*'.

अत एवोक्तं– "स्नेहाद्वातं शमयति पित्तं माधुर्यशैत्यतः। घृतं तुल्यगुणं दोषं संस्कारात्तु जयेत् कफम्" (नि. अ.1) इति।– Hence ghee alleviates *Vāta* due to its *Sneha Guṇa; Pitta* is alleviated due to its *Madhura rasa* and *Śīta Guṇa*. Though both ghee and *Kapha* possess similar qualities; *Kapha* is being alleviated by processing the ghee with the drugs having the opposite properties of *Kapha*.

न च वाच्यं रूक्षोष्णचित्रकादिसंस्काराद्रूक्षोष्णं सर्पिर्भवति, ततश्च सर्पिषः स्नेहशैत्ये तद्विरुद्धे कथं तिष्ठतः? इति; यतः सर्पिःसंबद्धचित्रकावयवानुगतं हि रूक्षोष्णत्वं, सर्पिर्गते च स्नेहशैत्ये इति भिन्नाश्रयत्वान्न विरोधः;– By processing the ghee with *Citraka* and others it acquires *Rūkṣa* and *Uṣṇa Guṇa*. But, how *Sneha* and *Saitya Guṇās* can exists within the ghee along with *Rūkṣa* and *Uṣṇa Guṇa* which are opposite to each other? The doubt has been clarified by the commentator as under.

The qualities like roughness and hotness of *Citraka* imbibed in ghee due to processing and unctuousness and coldness of ghee are originated from two different sources. Hence they are not contradicting each other.

इदमेव च सर्पिषः संस्कारानुवर्तनं यत्- स्वगुणविरुद्धस्यापि तस्यानुपघातेन धारणं; संस्कारकचित्रकादिगुणवहनेऽपि सर्पिषः शैत्यादयः कदाचिदभिभूयन्ते संस्कारकगुणै-रुष्णादिभिर्न पुनः स्नेहगुणः,– Thus the ghee can be able to imbibe the opposite qualities of other drugs like *Citraka* etc. without losing its own qualities like unctuousness etc. due the specific nature of '*Saṃskārasya Anuvartanāt*'.

Hence ghee never loses its primary quality of unctuousness even by processing with the drugs of opposite qualities. Secondary qualities like coldness etc. might be at times overcome by the opposite qualities like hotness of *Citraka* etc.

तस्य स्नेहेषु सर्वात्मना व्यवस्थितस्य प्रबलत्वात्; अत एव सर्पिरादयः स्नेहप्रधानत्वात् 'स्नेहा' इत्युच्यन्ते।– As the quality of unctuousness is more prevalent among all it cannot be overcome by any other quality. Thus ghee and others possess *Sneha* quality. Thus ghee and others possess *Sneha Guṇa* predominantly, all are known as *Sneha dravya*.

अन्ये तु संस्कारानुवर्तनं स्वगुणोपघातेन संस्कारकगुणवहनं ब्रुवते, एतच्च तैले तिष्ठति न सर्पिषीति वदन्ति; सर्पिषि तु संस्कारानुवर्तनमुक्तं यत् तत् सर्पिषि सर्वथा कस्यचिद्गुणस्य संस्कारगुणेनानुपघाताद्भवति ; तथाहि- दाहप्रशमनार्थं ज्वरे चन्दनादिशीतद्रव्यसाधिततैलमुक्तं, यतः शीतेन साधितं तैलमुष्णमपि स्वभावाच्छीतमेव भवतीति।।- Others interpreted '*Saṃskārasya Anuvartanāt*' as attaining the qualities of processed drugs and by losing its own qualities. This attribute exists in oil only but not in ghee. Whereas ghee retain its own qualities along with the qualities acquired by processing. Hence to relieve the burning sensation in fever, it is advised to administer the oil processed with *Candana* and the other cold substances. When the oil is processed with cold substances, it acquires coldness by losing its original quality of hotness.

Thus it is said "Even though oil possesses hotness originally, it becomes cool by processing with cold substances".

Properties of Ghṛta [14]

घृतं पित्तानिलहरं रसशुक्रौजसां हितम्।
निर्वापणं मृदुकरं स्वरवर्णप्रसादनम्।।14।।

- *Ghṛta* (ghee) alleviates *Pitta* and *Vāta*.
- It is wholesome for *Rasa Dhātu*, *Śukra Dhātu* and *Ojas*.
- It gives cooling (*Nirvāpaṇa*) and softening (*Mṛdu-kara*) effect on the body.
- It gives good voice and complexion.

Cakrapāṇi:

स्नेहगुणानभिधत्ते- घृतमित्यादि।- Beginning the verse with the word '*Ghṛtaṃ*', the author has presenented the properties of ghee.

निर्वापणं दाहप्रशमनम्।- *Nirvāpaṇa* refers to *Dāha-praśamana* i.e. which pacifies burning sensation.

Properties of Taila [15]

मारुतघ्नं न च श्लेष्मवर्धनं बलवर्धनम्।
त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनम्।।15।।

- *Taila* (oil) alleviates *Vāta* without aggravating *Kapha.*
- It promotes body strength.
- It is conductive to healthiness of skin.
- It is hot and causes stability to the body.
- It is useful for purification of female genitalia.

Cakrapāṇi:

मारुतघ्नमित्यादि तैलगुणाः।- Beginning the verse with the word '*Mārutaghnaṃ*', the author has presenented the properties of *Taila.*

स्थिरकरम् अङ्गस्थैर्यकरम्।- *Sthirakara* means which causes stability to the body.

Properties of Vasā [16]

विद्धभग्नाहतभ्रष्टयोनिकर्णशिरोरुजि ।
पौरुषोपचये स्नेहे व्यायामे चेष्यते वसा।।16।।

- *Vasā* (muscle fat) is useful for the management of injury (*Viddha*), fractures (*Bhagna*), trauma (*Āhata*), prolapsed uterus (*Bhraṣṭa yoni*), earache (*Karṇa ruja*) and headache (*Śiroruja*).
- It is useful for the enhancement of virility.
- It acts as an oleating substance in general and especially useful for those who practices physical exercises.

Cakrapāṇi:

विद्धेत्यादि वसागुणाः।- Beginning the verse with the word '*Viddha*', the author has presenented the properties of *Vasā*.

पौरुषोपचयः शुक्रोपचयः।- *Pauruṣopacaya* means increase of *Śukra*.

स्नेहे शरीरस्नेहने कर्तव्ये। - '*Snehe*' means that which causes oleation in the body.

Properties of Majjā [17]

बलशुक्ररसश्लेष्ममेदोमज्जविवर्धनः ।
मज्जा विशेषतोऽस्थ्नां च
बलकृत् स्नेहने हितः॥17॥

- *Majjā* (bone marrow) enhances body strength (*Bala*) as well as *Śukra Dhātu*, *Rasa Dhātu*, *Śleṣma*, *Medo Dhātu* and *Majjā Dhātu*.
- It is especially useful for the strengthening of bones.
- It also acts as unctuous substance.

Cakrapāṇi:

बलशुक्रेत्यादि मज्जगुणाः:- Beginning the verse with the term '*Balaśukra*', the author has presenented the properties of *Majjā*.

Suitable Seasons for the Use of Different Types of Oleating Substances [18]

सर्पिः शरदि पातव्यं वसा मज्जा च माधवे।
तैलं प्रावृषि नात्युष्णशीते स्नेहं पिबेन्नरः॥18॥

- *Sarpi* (ghee) should be administered during *Śaradṛtu* (autumn i.e. in the months of *Āśvayuja - Kārtīka*).
- The ideal season for the administration of *Vasā* (muscle fat) and *Majjā* (bone marrow) is *Mādhave* i.e. *Vasanta Ṛtu* (spring i.e. in the months of *Phālguna* and *Caitra*)
- Similarly the best season for the administration of *Taila* (oil) is *Prāvṛṭ Ṛtu* (rainy season i.e. *Āṣāḍha* and *Śrāvaṇa*)
- One should not take oleating substances when the season is too hot or too cold.



Suitable seasons for different Oleating substances

Cakrapāṇi:

सर्पिरादिपानकालमाह- सर्पिः शरदीत्यादि।- In the present verse the author has described about the suitable seasons for the use of ghee and other oleating substances by starting with '*Sarpi Śaradi*'. That means ghee should be administered during *Śaradṛtu* (autumn season).

माधवे वैशाखे।- *Mādhava* means *Vaiśākha* which is the suitable season for the administration of muscle fat and bone marrow.

प्रावृडाषाढश्रावणौ, यदुक्तं- "प्रावृद् शुक्रनभौ ज्ञेयौ" (सि. अ.6) इति।- *Prāvṛṭ Ṛtu* means the months of *Āṣāḍha* and *Śrāvaṇa* which is also mentioned in *Siddhisthāna* 6th chapter as *Śukra* and *Nabha*. This is the best season for the administration of oil.

शरदि बहुपित्तत्वेन पित्तविरुद्धं घृतमेव यौगिकं, नान्यस्तैलादिः।- During *Śaradṛtu*, *Pitta* vitiates predominantly. As ghee is having opposite attributes to *Pitta*, it is more suitable for the management of *Pitta*, rather than oil and other

substances.

वसामज्ज्ञोस्तु नातिशीतोष्णत्वात् साधारणे; यतस्तयोरनुपाने शीतत्वेन वोष्णत्वेन वा निर्देशो न कृतः; "यथासत्त्वं तु शैत्यौष्ण्ये वसामज्ज्ञोर्विनिर्दिशेत्" (सू. अ.27) इति तु वचनेन शैत्यौष्ण्याभिधानं सामान्येन, तैलसर्पिर्वदौष्ण्यशैत्यानभिधानात्र प्रकर्षप्राप्तशैत्योष्णत्वप्रापकम्।- *Vasā* and *Majjā* should be administered in the normal season i.e. which should not be too cold or too hot. Hence the *Anupāna* is not specified either cold or hot for *Vasā* and *Majjā*. It is also quoted in the 27th chapter of *Sūtrasthāna* that *Vasā* and *Majjā* should not be given when the body is too hot or cold. That means *Vasā* and *Majjā* should be given in the normal seasons only, unlike *Taila* and *Ghṛta*.

अत एवोक्तं- "तैलवसामज्जसर्पिषां तु यथापूर्वं श्रेष्ठत्वं वातश्लेष्मविकारेषु भवति, यथोत्तरं पित्तविकारेषु" (वि. अ.8) इति।- *Taila*, *Vasā*, *Majjā* and *Sarpi* are considered as the best drugs of choice in their preceding order for the management of *Vāta* and *Kapha* disorders. And these are also the best drugs in their succeeding order for the management of *Pitta* disorders.

अत्रोत्तरस्य सर्पिषः शैत्यात् पित्तहरत्वं, तैलस्य तूष्णत्वाद्वातश्लेष्महरत्वं, वसामज्ज्ञोस्तु साधारणत्वेन मध्यगतत्वमिति स्थितम्।- Due to the coldness of *Ghṛta* it alleviates *Pitta*; and *Vāta* and *Kapha* are alleviated due the hotness of *Taila*. As *Vasā* and *Majjā* are not having superior role in alleviating *Doṣās*, they have been placed in between *Taila* and *Ghṛta*.

एवं वसामज्ज्ञोः साधारणत्वेन तथा बल्यत्वधातुवृद्धिकरत्वाभ्यामनतिशीतोष्णे तथा बलक्षयधातुक्षययुक्ते माधवे प्रयोगो युक्तः।- *Vasā* and *Majjā* are the general oleating substances, and causes for bestowing strength and increases body tissues, and also neither too cold nor too hot. During this period the bodily strength and tissues undergo depletion and hence it is ideal to administer them in the season of *Mādhava* (*Vaiśākha*).

चैत्रस्तु मुख्यसाधारणगुणोऽपि प्रभूतश्लेष्मतया न स्नेहविषय इत्यनुक्तः।- The month of *Caitra* even though having a moderate temperature it is not suitable for oleation therapy because of the predominance of *Kapha* during that period.

सामान्येन स्नेहोपयोगे शस्तं कालमाह- नात्युष्णेत्यादि। नात्युष्णे ग्रीष्मे, नातिशीते हेमन्ते शिशिरे च तथा वर्षजनितशैत्ये वर्षाकाले। अयं चानात्ययिकविकारे सति कालनियमो ज्ञेयः, अग्रे उष्णे शीते च काले स्नेहोपदेशात्।।- In general the ideal time for administration of unctuous substances should be neither too hot nor too cold. That means during summer, winter and rainy season oleation therapy is not suitable. One should understand that the above rule is applicable only for chronic diseases. Hence in an emergency oleation therapy can be prescribed even if it is too hot or too cold.

Time of Administration of Different Types of Oleating Substances [19]

वातपित्ताधिको रात्रावुष्णे चापि पिबेन्नरः।
श्लेष्माधिको दिवा शीते पिबेच्चामलभास्करे ॥19॥

- When *Vāta* and *Pitta* is vitiated, and during hot days, oleating substances should be administered in the evening hours generally.
- Similarly when *Kapha* is vitiated, and during cold days, oleating substances should be administered in the noon hours.

Cakrapāṇi:

कालविशेषे दोषविशेषे च पानक्रमं दर्शयति- वातेत्यादिना।- In the present verse the author has described about the time of administration of oleating substances according to *Doṣās* by

starting with '*Vātapittādhiko*'.

Time of administration of Sneha according to Doṣa

वातश्च पित्तं च वातपित्तं, तदधिको वातपित्ताधिकः।– *Vātapittaṃ* means *Vāta* and *Pitta*. *Vātapittādhikaḥ* means increased state of *Vāta* and *Pitta*.

रात्राविति सायम्।– *Rātri* means evening time.

उष्णे ग्रीष्मे।– *Uṣṇa* means *Grīṣma Kāla* i.e. summer.

श्लेष्माधिकग्रहणमत्यन्तशीतविकारगृहीतपुरुषोपलक्षणार्थं, तेन वातश्लेष्माधिकः श्लेष्माधिकश्च गृह्यते;– The word '*Śleṣmādhika*' is having been used by keeping the persons in view who are suffering from severe cold disorders. Therefore it should be considered as both *Vāta- Śleṣmādhika* and *Śleṣmādhika*.

अत एव सुश्रुतेऽप्युक्तं– "वातपित्ताधिको रात्रौ वातश्लेष्माधिको दिवा" (सु.चि.31) इति।– Hence *Suśruta* also mentioned that oleation therapy should be conducted during evening hours when there is dominancy of *Vāta* and *Pitta doṣa*; and it should be conducted during morning hours when there is dominancy of *Vāta* and *Kapha doṣa*.

केवलवाताधिकस्य तथा पित्ताधिकस्य श्लेष्माधिकस्य च साधारणे शरदादौ काले उत्सर्गसिद्ध एव पानकालो वक्ष्यमाणो भवति। वक्ष्यति हि– "पिबेत् संशमनं स्नेहमन्नकाले" इत्यादि।– In case of the vitiation of only *Vāta* or *Pitta* or *Kapha*, the unctuous substances should be administered during normal seasons like *Śaradṛtu* or the prescribed seasons for elimination of specific *Doṣās*, as explained later.

It is told that *Saṃśamana Sneha* should be given during the time of meals.

अन्ये तु ब्रुवते– वाताधिकग्रहणेन केवलवातस्यापि ग्रहणं, श्लेष्माधिकव्यपदेशाच्च वातश्लेष्म-पित्तश्लेष्मणोरपि ग्रहणमिति।– Other scholars opined that the term '*Vātādhika*' is to be taken as vitiation of *Vāta doṣa* only; whereas '*Śleṣmādhika*' should be considered as vitiation of both *Vāta-Śleṣma* as well as *Pitta-Śleṣma*.

शीते हेमन्तादौ।– *Śīte* refers to *Hemanta* and other cold seasons.

अमलः प्रबलरश्मिर्यस्मिन् दिनस्य भागे भास्करः सोऽमलभास्करो मध्याह्न इति यावत्।।– *Amala Bhāskara* means the point of time of the day when the sun shines brightly i.e. noon hours.

Complications due to Untimely Administered Oleating Substances [20-21]

अत्युष्णे वा दिवा पीतो वातपित्ताधिकेन वा।
मूर्च्छां पिपासामुन्मादं कामलां वा समीरयेत्॥20॥
शीते रात्रौ पिबन् स्नेहं नरः श्लेष्माधिकोऽपि वा।
आनाहमरुचिं शूलं पाण्डुतां वा समृच्छति॥21॥

- Due to the administration of oleating substances during daytime for the persons suffering from *Vāta* and *Pitta* disorders, complications like *Mūrcchā* (fainting), *Pipāsā* (thirst), *Unmāda* (insanity) or *Kāmalā* (jaundice) may arise.
- Similarly by the administration of oleating substances during nighttime for the persons suffering from *Kapha* disorders, complications like *Ānāha*

(constipation), *Aruci* (anorexia), *Śūla* (colic) or *Pāṇḍu* (anemia) may arise.

Cakrapāṇi:

उक्तकालनियमविपर्यये दोषमाह- अत्युष्णे वेत्यादि।- In the present verse the author has described the complications that arise due to improper time of administration of oleating substances by starting with '*Atyuṣṇe*'.

अत्युष्णे काले दिवा पीतः स्नेहः श्लैष्मिकस्यापि यथोक्तविकारकरः, तथा वातपित्ताधिकेन पीतः शीतकालेऽपि यथोक्तविकारकरः; एवं निशापानेऽपि वाक्यार्थः; परं निषिद्धस्य कालस्य दोषस्य च मेलकेऽत्यये चोक्तविकारप्रकर्षाप्रकर्षौ तर्कणीयौ।।- Though it is a *Kapha* disorder, administration of oleating substances in the daytime during summer results in complications like *Mūrcchā* (fainting), *Pipāsā* (thirst) etc.

Similarly administration of oleating substances in the nighttime during winter in case of *Vāta* and *Pitta* disorders also causes complications like *Mūrcchā* (fainting), *Pipāsā* (thirst) etc.

The seriousness and triviality of these complications mentioned above would depend upon the time of administration of unctuous substances as well as the vitiation of *Doṣās*. For example: If a person is suffering from *Kapha* disorder is given unctuous substance in the nighttime during winter is more susceptible for *Ānāha* (constipation).

Anupāna for Different Types of Oleating Substances [22]

जलमुष्णं घृते पेयं यूषस्तैलेऽनु शस्यते।
वसामज्ज्ञोस्तु मण्डः स्यात् सर्वेषूष्णमथाम्बु वा॥22॥

The following *Anupāna* (post-prandial drink) is advised for different types of oleating substances.

S.N.	Name of the Oleating Substance	Anupāna
1.	*Ghṛta* (ghee)	*Uṣṇa jala* (hot water)
2.	*Taila* (oil)	*Yūṣa* (soup)
3.	*Vasā* (muscle fat) & *Majjā* (bone marrow)	*Maṇḍa* (thin gruel)
4.	All the oleating substances in general	*Uṣṇa jala* (hot water)



Uṣṇodaka

Cakrapāṇi:

अनुपानमाह- जलमित्यादि।- In the present verse the author has described the *Anupāna* (postprandial drink) by starting with '*Jalam*'.

तैलेऽन्विति अनुपाने।- *Taile Anu* means after the administration of *Taila; Yūṣa* should be given as *Anupāna*.

अनुपानपरिमाणं तु सम्यग्भेषजपाकार्थं क्रियमाणं भेषजावैकारिकपाकेनैवोन्नेयं, वृद्धवैद्यव्यवहाराच्च।।- The proper quantity of *Anupāna* is that which helps for proper digestion of the drug administered. The dosage of *Anupāna* may be determined by its nonoccurrence of diseases due to unctuous substances or by the experience of elderly physicians.

24 Types of Sneha Vicāraṇa [23-25]

ओदनश्च विलेपी च रसो मांसं पयो दधि।
यवागू:सूपशाकौ च यूष:काम्बलिक:खड:॥23॥
सक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च।
भक्ष्यमभ्यञ्जनं बस्तिस्तथा चोत्तरबस्तय:॥24॥
गण्डूष: कर्णतैलं च नस्त:कर्णाक्षितर्पणम्।
चतुर्विंशतिरित्येता: स्नेहस्य प्रविचारणा: ॥25॥

S. No.	Sneha Vicāraṇa
1.	*Odana* (Cooked rice)
2.	*Vilepī* (Gruel prepared with 4 times water)
3.	*Rasa* (Mutton soup)
4.	*Māṃsa* (Meet)
5.	*Paya* (Milk)
6.	*Dadhi* (Curd)
7.	*Yavāgū* (Gruel prepared with 6 times water)
8.	*Sūpa* (Dal)
9.	*Śāka* (Curry)
10.	*Yūṣa* (Vegetable soup)
11.	*Kāmbalika* (Sour milk mixed with whey)
12.	*Khaḍa* (Buttermilk boiled with sour vegetables)
13.	*Saktu* (Barley flour initially fried and then ground)
14.	*Tila Piṣṭa* (Pastry of sesamum)
15.	*Madya* (Alcohol)
16.	*Leha* (Linctus's)
17.	*Bhakṣya* (Intake of food by mastication)
18.	*Abhyañjana* (Massage)
19.	*Vasti* (Enema)
20.	*Uttaravasti* (Douche)
21.	*Gaṇḍūṣa* (Gargles)
22.	*Karṇa Taila* (Ear drops)
23.	*Nasya* (Nasal administration)
24.	*Akṣitarpaṇa* (Satiating therapies to the eyes)

Cakrapāṇi:

विचारणा: संख्यया स्वरूपेण चैकग्रन्थेनाह- ओदनश्चेत्यादि।- In the present verse the author has enumerated 24 *Vicāraṇa* along with their nature by starting with '*Odanaśca*'.

विलेपी विरलद्रवा यवागूर्बहुसिक्थसमन्विता ज्ञेया।- *Vilepī* is gruel prepared with rice or other grains having moderate quantity of solid and less liquid.

If the gruel is prepared with more solid it is called *Yavāgū*.

सशाकपल्लवेन कृतो यूष: खड:।- The soup when prepared with leafy vegetables it is called *Khaḍa*.

काम्बलिको दधिलवणस्नेहतिलादिकृत ईषदम्ल:।- *Kāmbalika* is prepared by cooking *Dadhi*, *Lavaṇa*, *Sneha*, *Tila* etc. It is slightly sour in taste.

एतयोरुदाहरणं यथा- "तक्रे कपित्थचाङ्गेरीमरिचाजाजि- चित्रकै:। सुपक्व: खडयूषोऽयमयं काम्बलिको मत:॥ दध्यम्लो लवणस्नेहतिल- माषान्वित: शृत:" इति।-

Examples for *Khaḍa* and *Kāmbalika* are given as under.

Khaḍa: It is the soup prepared by boiling *Takra* after adding *Kapittha*, *Cāṅgerī*, *Marica*, *Ajāji* and *Citraka*.

Kāmbalika: The soup prepared by boiling with *Amla Dadhi*, *Lavaṇa*, *Sneha*, *Tila* and *Māṣa* is known as *Kāmbalika*.

लेहः शर्करादीनां पाकात् कृतः; लिह्यत इति लेहः।- '*Leha*' is the substance prepared by boiling the drugs with sugar. As it is taken by licking it is called *Leha*.

प्रविचार्यते अवचार्यतेऽनुकल्पेनोपयुज्यतेऽनयेति प्रविचारणा ओदनादयः; ओदनादयश्च स्नेहप्रविचारणायां स्नेहयुक्ता एव बोद्धव्याः;- Administration of primary unctuous substance by mixing with other substance is known as *Pravicāraṇā*. Hence unctuous substances are mixed with *Odana* (rice) etc. and then administered internally.

अभ्यञ्जनादयस्तु यद्यपि शुद्धस्नेहसंपाद्यास्तथाऽपि जङ्गराग्निसंबन्धे न व्याप्रियन्त इति तन्त्रे विचारणाशब्देनोच्यन्ते।।- Though pure oils are used in *Abhyañjana* etc. they are included under *Vicāraṇa*, because the oils used are not having direct contact with *Jaṭharāgni*.

Importance of Acchapeya [26]

अच्छपेयस्तु यः स्नेहो न तामाहुर्विचारणाम्।
स्नेहस्यसभिषग्दृष्टःकल्पःप्राथमकल्पिकः।।26।।

Intake of pure unctuous substance should not be considered as *Vicāraṇa*. This is known as *Acchapeya* and is the first and best form of administration of oleating substances.

Cakrapāṇi:

केवलस्नेहपानं तु स्नेहने शक्त्यतिशयवत्त्वेन न विचारणासंज्ञयोच्यते, एतदेवाह- अच्छपेय इत्यादि। अच्छश्च पेयश्च अच्छपेयः, ओदनाद्यसंबन्धे सति पेय इत्यर्थः।- Intake of pure unctuous substance without mixing with any other substance and is having excellent power it is known as *Acchapeya*; and hence it is not called as *Vicāraṇa*.

Accha means pure. *Peya* means can be taken internally. That means without mixing *Odana* etc. whatever pure unctuous substance can be taken internally is known as *Acchapeya*.

न तामाहुर्विचारणामिति वचनेन वैद्यपरम्परासिद्धोऽयं व्यवहार इति दर्शयति।- *Acchapeya* is not included in the category of *Vicāraṇa* because it is being accepted since generations by physicians.

भिषग्भिर्दृष्टो भिषग्दृष्टः।- *Bhiṣagdṛṣṭaḥ* means which is being observed or having understood by physicians.

प्रथमे श्रेष्ठे कल्पे पक्षे भवतीति प्राथमकल्पिकः, श्रेष्ठ इत्यर्थः।।- *Prathama* means *Śreṣṭha* i.e. the best one. As *Acchapeya* is the best method of administration of unctuous substances, it is known as *Prathama Kalpa* or *Pradhāna Kalpa*.

64 Types of Vicāraṇa [27-28]

रसैश्चोपहितः स्नेहः समासव्यासयोगिभिः।
षड्भिस्त्रिषष्टिधा संख्यां प्राप्नोत्येकश्च
केवलः।।27।।
एवमेताश्चतुःषष्टिः स्नेहानां प्रविचारणा।
ओकर्तुव्याधिपुरुषान्प्रयोज्या जानता भवेत्।।28।।

The six tastes with their combination and permutations will be formed sixty three types. Hence the types of *Vicāraṇa* are also 63 types basing on the tastes. Together with the unmixed one the total number becomes 64. Thus a wise physician should administer these types of *Vicāraṇa* with due consideration of habit, season, disease and the individual's eligibility.



Cakrapāṇi:

प्रकारान्तरेण विचारणाभेदमाह- रसैश्चेत्यादि।- In the present verse the author has enumerated another version of 64 *Vicāraṇa* by starting with '*Rasaiśca*'.

समासो रसानामन्योन्यमेलकः, व्यासोऽमेलकः; समासव्यासवद्भिः षड्भी रसैरोदनादिगतैरुपहितो युक्तः सन् स्नेहस्त्रिषष्टिसंख्यां प्राप्नोति। एकश्च केवल इत्यच्छपेयं वर्जयित्वाऽभ्यञ्जनादिप्रयोज्यः।- By the combination and permutation of all the six tastes by mixing with *Odana* etc. the number of *Rasa* combinations becomes 63. The other one is *Acchapeya*, used for the purpose of *Abhyañjana* etc.

त्रिषष्ठी रसभेदा आत्रेयभद्रकाप्यीये "स्वादुरम्लादिभिर्योगं" (सू.अ.26) इत्यादिवाक्ये वक्ष्यमाणा बोद्धव्याः।- It is clearly mentioned that the number of *Rasa* combinations are 63 in the 26th chapter of *Sūtrasthāna* entitled *Ātreya-Bhadrakāpyīya*.

एवं स्नेहानां रसयुक्तानां चतुःषष्टिः प्रविचारणा भवन्ति।- These 63 by combining with *Acchapeya* the total number of *Vicāraṇa* according to *Rasa bheda* becomes 64.

चतुःषष्टिरिति स्नेहानामित्यनेन संबध्यते, तेन प्रविचारणेत्येकवचनमुपपन्नं भवति।- It is known that all these 64 types are linked with only one *Sneha*. Hence it is ideal to be called with singular number form as "*Pravicāraṇa*".

न सर्वविचारणा सर्वत्र कर्तव्या, किन्तु सात्म्यर्तुव्याधिदोषपुरुषान् परीक्ष्य या यत्र युज्यते सा तत्र कर्तव्येत्याह- ओकर्त्वित्यादि।- All the 64 *Vicāraṇa* cannot be used everywhere. Specific preparations are to be administered according to the need of the individual with due regard to habit (*Sātmya*), the season (*Ṛtu*), the disease (*Vyādhi*) and habitat of the person (*Puruṣa*).

ओकः अभ्यासः।- *Oka* refers to habit of taking regularly.

पुरुषग्रहणेन कस्मिन् देशेऽयं पुरुषो वर्तत इति परीक्ष्या देशोऽप्यवरुद्धो बोद्धव्यः, वयोबलप्रभृतयश्च बोद्धव्याः।।- *Puruṣa* refers to the person belongs to which region. Along with these entire aspects one should also examine the age, strength etc. while conducting oleation therapy.

Sneha Mātrā [29]

अहोरात्रमहः कृत्स्नमर्धाहं च प्रतीक्षते।
प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति॥29॥

Basing on the time taken to digest the oleating substance the dosage is of 3 types as mentioned under.

S. No.	Type of Mātrā	Time taken to digest the oleating substance
1	*Uttama Mātrā*	*Ahorātri* (24 hours)
2	*Madhyama Mātrā*	*Aha* (12 hours)
3	*Hrasva Mātrā*	*Artha-Aha* (6 hours)



Cakrapāṇi:

मात्राया: संख्यां प्रमाणं चाह- अहोरात्रमित्यादि।- In the present verse the author has enumerated number and measurement of *Sneha Mātrā* by starting with '*Ahorātra*'.

अहोरात्रशब्दोऽष्टप्रहरोपलक्षण:, एवमह:शब्दार्धाहशब्दौ चतु:प्रहरद्विप्रहरोपलक्षणौ,- The word '*Ahorātra*' represents the time period of 8 *Prahara* (One *Prahara* is equivalent to 3 hours).

Similarly the words *Aha* and *Artha-Aha* denote 4 *Prahara* and 2 *Prahara* respectively.

तेन प्रहराद्यतीतेऽप्यहनि पीता मात्रा यथोक्तप्रहरकालप्राप्त्या दिनान्तरे रात्रौ वा जीर्यमाणा मन्तव्या; अन्ये त्वहोरात्रशब्देन न्यूनेनाप्यह्ना युक्ता रात्रिरहोरात्रशब्देनोच्यते , कृत्स्नार्धाहौ तु प्रहरोपलक्षणाविति वदन्ति।- Even if the unctuous substance digests after one *Prahara* either in the day or night also should be considered as usual. Some others consider *Ahorātrī* refers to the period of day and night when the day is slightly shorter than night. The period of the day is calculated according to *Prahara*.

इति तिस्र: समुद्दिष्टा मात्रा: स्नेहस्य मानत:।
तासां प्रयोगान् वक्ष्यामि पुरुषं पुरुषं प्रति॥30॥

These are the 3 types of *Sneha Mātrā* and should be administered to different persons according to the necessity.

Eligible Patients and Diseases for Uttama Sneha Mātrā [31-32]

प्रभूतस्नेहनित्या ये क्षुत्पिपासासहा नरा:।
पावकश्चोत्तमबलो येषां ये चोत्तमा बले॥31॥
गुल्मिन: सर्पदष्टाश्च विसर्पोपहताश्च ये।
उन्मत्ता: कृच्छ्रमूत्राश्च गाढवर्चस एव च॥32॥

The following are eligible for administering in the maximum dosage of oleating substances.

- Who are habituated in taking high quantity of unctuous substances (*Prabhūta Sneha nityā*)
- Who can be able to tolerate hunger and thirst (*Kṣut-Pipāsā sahā narāḥ*)
- Whoever has strong digestive power (*Pāvakaśca Uttama bala*)
- Who are suffering from abdominal tumor (*Gulminaḥ*)
- Whoever had been affected by snakebite (*Sarpadaṣṭā*)
- Who are suffering from *Visarpa* (erysipelas), *Unmatta* (insanity), *Kṛcchra-mūtra* (*dysuria*) and *Gāḍha-varcas* (hard stools)

Cakrapāṇi:

अत्र यदा अहोरात्रपरिणामिनी मात्रा क्रियते, तदा तदहराहारो न कर्तव्य:; अत एवैतत्पानं पुरुषविशेषविषयकथने उक्तं- "क्षुत्पिपासासहानरा:" इति।- Those who have consumed *Uttama Mātrā* of unctuous substance (which can be digested in one day and night) should not be given food. This is clearly mentioned in the context of eligible

persons for *Uttama Sneha Mātrā* as who can tolerate hunger and thirst.

प्रभूतस्नेहनित्याः प्रभूतस्नेहसात्म्याः।- *Prabhūta Sneha nitya* means those who are habituated in taking high quantity of unctuous substances.

Advantages of Uttama Sneha Mātrā [33-34]

पिबेयुरुत्तमां मात्रां तस्याः पाने गुणाञ्छृणु।
विकाराञ्छमयत्येषां शीघ्रं सम्यक्प्रयोजिता॥33॥
दोषानुकर्षिणी मात्रा सर्वमार्गानुसारिणी।
बल्या पुनर्नवकरी शरीरेन्द्रियचेतसाम्॥34॥

The following are the advantages of administering in the maximum dosage of oleating substances.

- Subsides the diseases very quickly (*Śīghraṃ vikārān śamayati*).
- Moves in the three pathways of diseases and subsides the *Doṣās* (*Sarvamārgānusāriṇī Doṣānukarṣiṇī*).
- Bestows strength (*Balya*).
- Rejuvenates the body, senses and mind (*Punarnavakarī Śarīra Indriya Cetasām*).

Cakrapāṇi:

सम्यग्यो जितेतिवचनेन महाव्यापत्तित्वमस्याः सूचयति।- The use of the word *Samyakyojitā* infers the severe adverse effects caused due to *Asamyak Yojanā* of maximum dosage of unctuous substances.

सर्वमार्गाः कोष्ठसन्धिमर्मशाखाः।- *Sarvamārga* means all the three pathways of the diseases such as *Koṣṭha, Sandhi-Marma* and *Śākhā*.

पुनर्नवकरी निःशेषदोषहरत्वेन।- *Punarnavakarī* refers to alleviation of vitiated *Doṣās* completely.

Eligible Patients and Diseases for Madhyama Sneha Mātrā [35-36]

अरुष्कस्फोटपिडकाकण्डूपामाभिरर्दिताः।
कुष्ठिनश्च प्रमीढाश्च वातशोणितिकाश्च ये॥35॥
नातिबह्वाशिनश्चैव मृदुकोष्ठास्तथैव च।
पिबेयुर्मध्यमां मात्रां मध्यमाश्चापि ये बले॥36॥
मात्रैषा मन्दविभ्रंशा न चातिबलहारिणी। (Repeat)

The following are eligible for administering in the medium dosage of oleating substances.

- Those who are suffering from *Aruṣka* (eruptions), *Sphoṭa* (boils), *Pidakā* (pimples), *Kaṇḍū* (itching), *Pāmā* (scabies), *Kuṣṭha* (shin disorders), *Pramīḍhā* (urinary disorders) and *Vātaśoṇita* (gout).
- Who are not taking much food (*Na ati bahu aśina*).
- Those who are having soft bowels (*Mṛdu-Koṣṭha*) and medium strength (*Madhyama Bala*).

Cakrapāṇi:

अरुष्केत्यादि मध्यममात्रागुणः; अरुष्का अरूंषिका।- The present verse is started with *Aruṣka* etc. which represents the eligible patients and diseases for *Madhyama Mātrā*.

Aruṣka means *Arūṃṣikā* i.e. furunculosis of scalp.

Advantages of Madhyama Sneha Mātrā [37]

मात्रैषा मन्दविभ्रंशा न चातिबलहारिणी।
सुखेन च स्नेहयति शोधनार्थे च युज्यते॥37॥

The following are the advantages of administering in the medium dosage of

oleating substances.

- Less complicated (*Manda Vibhraṃśā*).
- It doesn't reduce the strength excessively (*Na ca ati bala hāriṇī*).
- It does unction comfortably (*Sukhena ca snehayati*).
- It is useful for purificatory measures (*Śodhanārthe ca yujyate*).

Cakrapāṇi:

शोधनार्थ इति शोधनार्थ(ङ्ग)स्नेहकरणे; एतेन उत्तममात्रा संशमने एव परं, न तु शोधनाङ्गस्नेहे कर्तव्येति दर्शयति।- *Madhyama Mātrā* is specifically indicated for *Śodhana* purpose. It clearly suggests that *Uttama Sneha Mātrā* is not advised for *Śodhana* purpose and is the best one for *Śamana Sneha*.

Eligible Patients and Diseases for Hrasva Sneha Mātrā [38-39]

ये तु वृद्धाश्च बालाश्च सुकुमाराः सुखोचिताः।
रिक्तकोष्ठत्वमहितं येषां मन्दाग्नयश्च ये॥३८॥
ज्वरातीसारकासाश्च येषां चिरसमुत्थिताः।
स्नेहमात्रां पिबेयुस्ते ह्रस्वां ये चावरा बले॥३९॥

The following are eligible for administering in the minimum dosage of oleating substances.

- Minimum dosage of *Sneha* is indicated for old persons (*Vṛddha*), children (*Bāla*), delicate persons (*Sukumāra*) and those who are accustomed to comforts (*Sukhocitā*).
- Those who are feeling of discomfort due to empty stomach (*Riktakoṣṭhatvamahitaṃ*).
- Those who had less digestive power (*Mandāgni*).
- Those who are suffering from chronic fever, diarrhea and cough (*Cira samutthitā Jvara, Atisāra* and *Kāsa*).
- Those who are very weak (*Avara bala*).

Cakrapāṇi:

ये त्वित्यादि ह्रस्वमात्रागुणः।- In the present verse the author has described eligible persons and diseases for *Hrasva Sneha Mātrā* by starting with '*Ye tu*'.

Advantages of Hrasva Sneha Mātrā [40]

परिहारे सुखा चैषा मात्रा स्नेहनबृंहणी।
वृष्या बल्या निराबाधा चिरं चाप्यनुवर्तते॥४०॥

The following are the advantages of administering in the minimum dosage of oleating substances.

- Minimum dosage of *Sneha* is having fewer precautions and can be followed easily (*Parihāre sukhā*).
- It is useful for both oleation and nourishment (*Snehana* and *Bṛṃhaṇa*).
- It acts as aphrodisiac (*Vṛṣya*) and gives strength (*Balya*).
- It is harmless (*Nirābādhā*) and can be used for a long period (*Ciraṃ anuvartate*).

Cakrapāṇi:

परिहारे सुखेति अल्पपरिहारत्वेन।।- *Parihāre Sukha* means the period of restrictions is less in *Hrasva Mātrā Snehapāna* in comparison with the other two dosages.

Indications for the Administration of Ghṛta [41-43]

वातपित्तप्रकृतयो वातपित्तविकारिणः।

चक्षुःकामाः क्षताः क्षीणा वृद्धा
बालास्तथाऽबलाः॥41॥
आयुःप्रकर्षकामाश्च बलवर्णस्वरार्थिनः।
पुष्टिकामाः प्रजाकामाः
सौकुमार्यार्थिनश्च ये॥42॥
दीप्त्योजःस्मृतिमेधाग्निबुद्धीन्द्रियबलार्थिनः।
पिबेयुः सर्पिरार्ताश्च दाहशस्त्रविषाग्निभिः॥43॥

The following are indicated for the administration of *Ghṛta* (ghee).

- Whose constitution is dominated by *Vāta* and *Pitta* (*Vāta pitta prakṛtayo*).
- Whoever is suffering from *Vāta* and *Pitta* disorders (*Vāta Pitta Vikāriṇaḥ*).
- Whoever is desirous for good vision (*Cakṣuḥ Kāma*).
- Whoever is injured and debilitated (*Kṣatāḥ Kṣīṇāḥ*).
- Aged, children and weak (*Vṛddha*, *Bāla* and *Abala*).
- Whoever is desirous for longevity (*Prakarṣa Āyuḥ Kāma*).
- Those who are desirous for body strength, complexion and voice (*Bala-varṇa-svarārdhinaḥ*)
- Those who are desirous for nourishment (*Puṣṭi*), progeny (*Praja*) and tenderness (*Saukumārya*)
- Those who are desirous for luster (*Dīpti*), *Ojas*, memory (*Smṛti*), intelligence (*Medhā*), digestive power (*Agni*), intellectual faculty (*Buddhi*) and proper functioning of senses (*Indriya bala*).
- Whoever is afflicted with injuries due to burns (*Dāha*), weapons (*Śastra*), poisons (*Viṣa*) and fire (*Agni*).

Cakrapāṇi:

यः स्नेहो यत्र कार्यस्तमाह- वातपित्तेत्यादि।- Beginning the verse with the word '*Vātapitta*', the author is going to present different types of *Sneha dravyas* which are specifically useful in various disease conditions.

वातपित्तविकारग्रहणेनैव वातपित्तप्रकृतिषु लब्धेषु पुनस्तदभिधानं वातपित्तप्रकृतीनां स्तोकश्लेष्मविकारेऽपि घृतपानोपदेशार्थम्; एवं वातव्याधिभिराविष्टा वातप्रकृतयश्च य इत्यत्र व्याख्येयम्।- In general it can be understood that the persons who are suffering from *Vāta* and *Pitta* disorders may be having the dominancy of *Vāta* and *Pitta* constitution. Thus there is not necessary to mention the words '*Vātapitta Prakṛtayo*' and '*Vātapitta Vikāriṇaḥ*' separately. But this was mentioned with a definite purpose in view. *Ghṛtapāna* is also indicated to the persons of *Vāta* and *Pitta* constitutional persons those who are suffering from the diseases due to slightly *Kapha* vitiation. Similarly persons of *Vāta* constitution afflicted with diseases of *Vāta* origin should be understood.

बलार्थिन इत्यत्र बलशब्दः स्मृत्यादिभिः संबध्यते।- In the compound word '*Balārthinaḥ*', the term *Bala* is related to *Smṛti*, *Medhā*, *Agni*, *Indriya* also.

आर्ताः पीडिताः, दाहादिभिरिति संबन्धः।।- The term '*Ārtāḥ*' means afflicted and it it is also related to *Dāha*, *Śastra*, *Viṣa* and *Agni* also.

Indications for the Administration of Taila [44-46]

प्रवृद्धश्लेष्ममेदस्काश्चलस्थूलगलोदराः।
वातव्याधिभिराविष्टा वातप्रकृतयश्च ये॥44॥
बलं तनुत्वं लघुतां दृढतां स्थिरगात्रताम्।
स्निग्धश्लक्ष्णतनुत्वक्तां ये
च काङ्क्षन्ति देहिनः॥45॥

कृमिकोष्ठाः क्रूरकोष्ठास्तथा नाडीभिरर्दिताः।
पिबेयुः शीतले काले तैलं तैलोचिताश्च ये॥46॥

The following are indicated for the administration of *Taila* (oil).

- Excessively aggravated state of *Kapha* and *Medas* (*Pravṛddha Śleṣma* & *Medas*)
- Whose throat and abdomen are loose and fleshy (*Cala Sthūla Gala-Udara*)
- Whoever is suffering from *Vāta* disorders and dominated by *Vāta* constitution (*Vāta Vyādhibhirāviṣṭā Vāta prakṛtayaśca*)
- Whoever is desirous for strength (*Bala*), slimness (*Tanutva*), lightness (*Laghutā*), firmness (*Dṛḍhatā*), steadiness of the body (*Sthira gātratā*) and tenderness and smoothness of skin (*Snigdha Ślakṣṇa Tanu*)
- Whoever is suffering from worm infestation (*Kṛmi-Koṣṭha*)
- Those who are having costive bowels (*Krūra-Koṣṭha*)
- Whoever is suffering from sinus (*Nāḍīvraṇa*)
- During cold season (*Śītala Kāla*)
- Those who are habituated to take oil (*Tailocitā*)

Cakrapāṇi:

तैलविषयमाह- प्रवृद्धेत्यादि।- Beginning the verse with the word '*Pravṛddha*', the author has presented the indications for administration of *Taila*.

शीतले काल इति तैलस्योष्णत्वेन शीतलेऽपि काल इत्यर्थः; तेन सामान्यप्रतिषेधः 'नात्युष्णशीते स्नेहं पिबेन्नरः' इति न विरुध्यते; यदि वा सर्पिःपानकालापेक्षया शीतत्वं बोद्धव्यम्॥- As *Taila* possess *Uṣṇa Guṇa*, it is indicated in cold seasons. This is not contradicting the general statement of unctuous substances should not be administered during too cold and too hot seasons. Or it can be understood that the season of administration of oil is much colder than the season of administration of ghee.

Indications for the Administration of Vasā [47-49]

वातातपसहा ये च रूक्षा भाराध्वकर्शिताः।
संशुष्करेतोरुधिरा निष्पीतकफमेदसः॥47॥
अस्थिसन्धिसिरास्नायुमर्मकोष्ठमहारुजः ।
बलवान्मारुतो येषां खानि चावृत्य तिष्ठति॥48॥
महच्चाग्निबलं येषां वसासात्म्याश्च ये नराः।
तेषां स्नेहयितव्यानां वसापानं विधीयते॥49॥

The following are indicated for the administration of *Vasā* (muscle fat).

- Whoever can be able to tolerate by exposing to wind and sun (*Vātātapa sahā*)
- Those having roughness in the skin (*Rūkṣā*)
- Those who became emaciated due to carrying heavy loads and by excessive walking (*Bhārādhva Karśītāḥ*)
- Those having depleted semen and blood (*Saṃśuṣka Reto-Rudhirā*)
- Those having below the normal level of *Kapha* and *Medas* (*Niṣpīta Kapha Medasaḥ*)
- Those suffering from severe pain in the bones (*Asthi*), joints (*Sandhi*), veins (*Sirā*), ligaments (*Snāyu*), vital organs (*Marma*) and viscera (*Koṣṭha*).
Similarly if *Kapha* occupies in *Pakvāśaya* conduct moist sudation (*Snigdha Sveda*) at first and then conduct dry sudation (*Rūkṣa Sveda*).

Cakrapāṇi:

तं देशविशेषसंबन्धेन व्यभिचारयन् देशापेक्षां कल्पनामाह- आमाशयेत्यादि।– In the present verse the author has explained to conduct specific type of sudation therapy according to the shelter of the *Doṣās* by starting with the word '*Āmāśaya*'

आमाशयगते वाते रूक्षपूर्वः स्थानापेक्षया पूर्वं रूक्षं कृत्वा पश्चाद्वातापेक्षः स्निग्धः कार्यः, एवं पक्वाशयगते कफे स्नेहपूर्वो व्याख्येयः;– Based on the shelter, *Rūkṣa Sveda* is prescribed for *Vāta Doṣa* when it is located in *Āmāśaya* initially and is followed by *Snigdha Sveda* to treat the actual vitiated *Doṣa*

i.e. Vāta. Similarly when Kapha is located in Pakwāśaya one has to conduct Snigdha Sveda initially and it is followed by Rūkṣa Sveda.

आमाशयशब्देन कफस्थानं ज्ञेयं, कफस्थानापेक्षया हि प्रथमं रूक्षः क्रियते, यदुक्तं- "स्थानं जयेद्धि पूर्वं तु स्थानस्थस्याविरुद्धतः" इति।।- Mentioning the word 'Āmāśaya' should be understood as the shelter for Kapha. Based on Kapha Sthāna it should be conducted Rūkṣa Sveda first even though it is antagonist to Vāta.

After controlling the Sthānika Doṣa initially and then treat the Doṣa which occupies the other's shelter. The same is also stated in the verse "Sthānaṃ Jayet……".

वृषणौ हृदयं दृष्टी स्वेदयेन्मृदु नैव वा।
मध्यमं वंक्षणौ शेषमङ्गावयवमिष्टतः।।10।।

Generally fomentation (Svedakarma) should not be conducted in the region of testes (Vṛṣaṇa), heart (Hṛdaya) and eyes (Dṛṣṭi). If it is essential mild sudation can be conducted.

In the groin region (Vaṅkṣaṇa) it is advised to go for medium type of fomentation only and at the remaining parts of the body sudation can be conducted according to the desire and necessity.

Cakrapāṇi:

मृदु नैव वेति स्वेदैकसाध्ये वृषणादिगते व्याधौ मृदुस्वेदः, स्वेदव्यतिरिक्तोपायान्तरसंभवे तु न वेति बोद्धव्यम्।- "Mṛdu naiva vā" It clearly suggests that if the diseases pertaining to testes, heart and eyes are manageable by only by means of sudation therapy, then only one has to conduct mild sudation. If there are other measures are available for treating those disorders, sudation therapy should not be conducted.

इष्टत इत्यातुरेच्छातो वैद्येच्छातश्च।- 'Iṣṭata' means according to the desire of the patient as well as the physician. Hence the sudation therapy can be conducted according to the desire of the patient and the physician in the remaining parts of the body.

इष्टत इति भावक्तादिच्छावचनः।।- 'Iṣṭata' means according to one's wish or desire.

सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमानामथापि वा।
पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी।।11।।

During sudation therapy the eyes should be covered with a clean piece of cloth, lump of wheat flour or with the leaves of Padma, Utpala or Palāśa.

Cakrapāṇi:

स्वेदे क्रियमाणे चक्षुषः स्वेदपरिहारोपायमाह- सुशुद्धैरित्यादि।- In the present verse the author has presented the material useful for protecting the eyes from heat produced during the course of sudation therapy by starting with the word 'Su śuddhai'.

नक्तकः कर्पटावयवः।।- Naktaka means a piece of cloth.

मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि।
जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत्।।12।।

Similarly the heart should be protected during sudation therapy by the application of cold substances, by wearing pearl garlands or lotus flower garlands and by means of touch with moist cold hands.

Cakrapāṇi:

स्वेदे क्रियमाणे हृदयरक्षणार्थमाह- मुक्तावलीभिरित्यादि।- In the present verse the author has presented the material useful for protecting the heart from heat produced during the course of sudation therapy by starting with the word 'Muktāvalībhiḥ'.

जलजानि पङ्कजादीनि।- Jalaja means lotus flowers etc.

एवमस्वेद्यत्वसामान्यत्वाद्वृषणरक्षाऽप्युन्नेतव्या, प्राधान्या- द्धृदयचक्षुःपालनमुक्तम्।।- Similar to eyes and heart, one has to protect the testes while conducting sudation therapy. As the eyes and heart are more important the measures to protect them during the course of sudation are specifically mentioned but it was not happened in case of testes.

Time to Stop Sudation Therapy [13]

शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे।
संजाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता।।13।।

After obtaining the following signs and symptoms one has to stop for conducting sudation therapy.

- Complete relief from coolness (Śīta) and pain (Śūla).
- Relieved from stiffness (Stambha) and heaviness (Gaurava).
- Appearance of tenderness (Mārdavāta) and sweating (Sveda).

Cakrapāṇi:

शीतशूलेत्यादि।- In the present verse the author has presented the proper signs and symptoms of sudation therapy by starting with the word 'Śīta-Śūla' etc.

स्वेद इति स्वेदभवे घर्मे।- Sveda means inducing sweating by means of heat produced during sudation therapy.

स्वेदनाद्विरतिर्मतेत्युपदिशन् शीतादिव्युपरमे सति स्वेदो निवर्तनीयः,शीताद्यनुपरमे चस्वेदः कर्तव्यइतिद्वयमुपदिशति; ततश्च इत एव स्वेदनिवृत्तिविषयशीतादिव्युपरमोत्पादः स्वेदस्य सम्यग्योगलक्षणं तथा शीतादिव्युपरमानुत्पादश्च स्वेदानिवृत्तिविषयोऽयोगलक्षणमुक्तं भवतीति नायोगलक्षणानभिधानमुद्भावनीयम्।।- 'Svedanāt-viratirmatā' means one has to stop in continuing sudation therapy immediately after observing the relief from coldness, pain etc.

Thus it infers that sudation therapy is to be continued if the coldness, pain etc. are not relieved.

That means after getting the relief from coldness, pain, stiffness and heaviness and by the appearance of sweating, the sudation therapy should be stopped because the individual gets the proper signs and symptoms (Samyakyoga). Similarly if the individual is not relieved from the symptoms like pain, coldness etc. and sweat is not appeared it suggests the signs and symptoms of improper sudation therapy (Ayoga). Though Ayoga Lakṣaṇa are not mentioned separately, it can be inferred by knowing Samyakyoga Lakṣaṇa.

Signs & Symptoms of Excessive Sudation Therapy & Its Management [14-15]

पित्तप्रकोपो मूर्च्छा च शरीरसदनं तृषा।
दाहः स्वराङ्गदौर्बल्यमतिस्विन्नस्य लक्षणम्।।14।।
उक्तस्तस्याशितीये यो ग्रैष्मिकः सर्वशो विधिः।
सोऽतिस्विन्नस्य कर्तव्यो मधुरः स्निग्धशीतलः।।15।।

The following are the signs and symptoms of excessive sudation therapy.

- Aggravation of Pitta (Pitta Prakopa)
- Fainting (Mūrcchā)
- Exhaustion of the body (Śarīra-Sadana)
- Thirst (Tṛṣṇā)

- Burning sensation (*Dāha*)
- Feebleness in the voice (*Svara Daurbalya*)
- Weakness in the body organs (*Aṅga Daurbalya*)

Management:

- The above complications should be managed by adopting the entire regimen prescribed for *Grīṣma Ṛtu* as mentioned in the chapter *Tasyāśitīya Adhyāya*.
- And to be given sweet, unctuous and cold substances also.

Cakrapāṇi:

अतिस्विन्नचिकित्सितमाह- उक्त इत्यादि।- In the present verse the author has presented the management of *Sveda Atiyoga* by starting with the word '*Ukta*' etc.

ग्रैष्मिको विधिरित्यनेन लब्धे पुनर्मधुरः स्निग्धशीतल इत्यादिवचनं "मद्यमल्पं न वा पेयं" (सू.अ.6) इत्यत्रोपदिष्टमद्यपानस्य प्रतिषेधार्थं, मधुरशीतादियोगविशेषविधानार्थं च।।- It is mentioned in the above verse that the regimen prescribed during summer season is also holds good to relieve the complications arise by the excessive conduction of sudation therapy. However to exclude the intake of alcoholic beverages, the author has specifically mentioned the sweet and cold liquids separately. This clearly suggests that for the management of *Sveda Atiyoga Lakṣaṇa*, one has to take sweet and cold liquid substances and follow the entire *Gṛṣma Ṛtu Caryā* excluding *Madyapāna*.

Contraindications for Svedakarma [16-19]

कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम्।
पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम्।।16।।
विदग्धभ्रष्टब्रध्नानां विषमद्यविकारिणाम्।
श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम्।।17।।
तृष्यतां क्षुधितानां च क्रुद्धानां शोचतामपि।
कामल्युदरिणां चैव क्षतानामाढ्यरोगिणाम्।।18।।
दुर्बलातिविशुष्काणामुपक्षीणौजसां तथा।
भिषक् तैमिरिकाणां च न स्वेदमवतारयेत्।।19।।

The following are contraindicated for sudation therapy:

- Who consume alcohol and astringent substances regularly (*Kaṣāya-Madya Nityānāṃ*).
- Pregnant women (*Garbhiṇi*).
- Who are suffering from hemorrhagic disorders (*Raktapittināṃ*).
- Who are having *Pitta* constitution or who are suffering from *Pitta* disorders (*Pittināṃ*).
- Who are suffering from diarrhea (*Atisārānāṃ*).
- Who are having dry skin (*Rūkṣāṇāṃ*).
- Who are suffering from diabetes (*Madhumehināṃ*).
- Who are suffering from inflammation and prolapse of the rectum (*Vidagdha Bhraṣṭa Bradhnānāṃ*).
- Those who are suffering from the complications of the poisonous substances and alcoholic beverages (*Viṣa-madya vikāriṇāṃ*).
- Those who are tired (*Śrāntānāṃ*).
- Those who are unconscious (*Naṣṭa-sañjñānāṃ*).
- Those who are obese (*Sthūlānāṃ*).
- Those who are suffering from *Pitta* dominant obstinate urinary disorders (*Pitta-mehināṃ*).
- Those who are thirsty and hungry (*Tṛsyatāṃ Kṣudhitānāṃ ca*).
- Those who are angry and grief (*Kruddhānāṃ Śocitam Api*).
- Those who are suffering from jaundice and abdominal disorders (*Kāmala-Udariṇāṃ*).
- Those who are suffering from consumption (*Kṣatānāṃ*) and gout (*Āḍhyarogī* i.e. *Vātarakta*).
- Those who are suffering from severe weakness (*Durbala*), excessively emaciated (*Ati viśuṣkāṇāṃ*), markedly decreased *Ojas* (*Upakṣīṇa Ojasāṃ*) and defective vision (*Taimira*).

Cakrapāṇi:

अस्वेद्यानाह- कषायेत्यादि।- Beginning the verse with the word '*Kaṣāya*' the author has presented the list of persons ineligible for sudation therapy.

कषायद्रव्यकृतं मद्यं कषायमद्यं; किंवा कषायशब्दोऽमधुरवचनः, न तेन यदुच्यते- कषायनित्यस्य वातप्रधानता स्यात् कषायस्य वातकारित्वात्, वाते च स्वेदो विहित एव, तत् कथं कषायनित्यं प्रति स्वेदनिषेध इति, तन्निरस्तं भवति। किंवा, कषायनित्या रूक्षातिस्तब्धगात्रा भवन्ति, कषायस्य विरूक्षकस्तम्भकत्वेन; ततश्च तेषां स्वेदः पर्वभेदमावहतीत्यतः कषायनित्यनिषेधः।- *Kaṣāya-Madyaṃ* means the alcoholic beverage prepared by astringent substances. The word *Kaṣāya* also refers to not a sweet substance. Regular intake of the alcoholic beverage containing astringent in taste leads to vitiation of *Vāta* because *Kaṣāya Rasa* possesses *Vāta* dominancy. In general *Sveda* is indicated in *Vāta* disorders but the reason for contraindication of sudation therapy in this condition is as follows. Those who have taken *Kaṣāya Madya* regularly become their body exceedingly rough and stiff. If *Sveda* is done for such persons it might lead to violent pain in the joints (*Parvabheda*). Hence *Sveda* is contraindicated in *Kaṣāya Madya Nityānāṃ*.

रक्तपित्तिनामविधानादेव स्वेदे निषिद्धे, पुनः स्वेदनिषेधो रक्तपित्तिनां यद्यन्योऽपि स्वेदसाध्यो वातश्लेष्मजो विकारो भवति तत्रापि स्वेदनिषेधार्थं, तथा रक्तपित्तिनां वमनविरेचनाङ्गतया प्राप्तस्वेदप्रतिप्रसवनिषेधार्थं च, एवं पित्तमेहिकामल्यादिष्वपि व्याख्येयम्।- The disease *Raktapitta* itself is non-curable by means of sudation therapy. The patients of *Raktapitta* might have suffering from other ailments of *Vāta* or *Kapha* predominance is also contraindicated for sudation. *Sveda* is also contraindicated in *Raktapitta* even it is a part of *Vamana* and *Virecana*. Similarly *Sveda* is never to be administered to the persons suffering from *Pitta* disorders, *Meha*, *Kāmalā* etc.

पित्तिनामिति पित्तप्रकृतीनाम्।- *Pittināṃ* means those who are having *Pitta* constitution.

मधुमेहशब्देन सर्वं एव मेहा गृह्यन्ते, मधुमेहशब्दो हि सर्वेष्वेव मेहेषु वर्तत इति कियन्तःशिरसीये दर्शनीयं, मेहेषु च सर्वेष्वेव शरीरशैथिल्यप्रवृत्तेषु विशेषतः शरीरशैथिल्यहेतुत्वेन स्वेदो न युज्यते; पित्तमेहिनामिति तु पुनरभिधानं पित्तसंबन्धेन विशेषप्रतिषेधतादर्शनार्थम्।- The word '*Madhumeha*' refers to all the types of *Meha* as mentioned in the chapter of *Kiyantaḥ Śirasīya Adhyāya*. In all types of *Meha* the body becomes flaccid and hence *Sveda* is contraindicated, especially in *Pitta Meha*.

ब्रध्नः गुदः।- *Bradhna* means *Guda* i.e. rectum.

मद्यविकारिणामिति मद्यनित्यस्य वातकफजमदात्यये स्वेदनिषेधार्थम्।- '*Madyavikāriṇām*' means those suffering from *Vātaja* or *Kaphaja Madātyaya* due to regular intake of alcoholic beverages. Those persons are also contraindicated for sudation therapy.

भूयोविरोधेस्वल्पमन्याय्यम्

Bhūyovirodhe Svalpamat Nyāya

This *Nyāya* has used by the commentator to support the application of *Sveda* even in contraindicated conditions.

Here a list of contraindications for *Sveda* is described by the author and also given the rational explanation for the proposition.

In general *Sveda* should not be conducted in the conditions like *Kaṣāya-Madya Nityānām*, *Garbhinī*, *Raktapitta*, *Madhumeha* etc., because it leads to complications.

But when a serious disease which can be managed only by means of sudation such as *Sanyāsa* is attacked to any one of the above mentioned patients, he may be given sudation therapy according to *Bhūyovirodhe Svalpamat Nyāya*. As it has been stated "A smaller abnormality is welcome if it helps to eradicate a greater one".

आढ्यरोगीह वातरक्ती।- '*Āḍhyarogī*' refers to the person suffering from *Vātarakta*.

एषु चास्वेदविषयेषु यदि स्वेदैकसाध्यः संन्यासादिर्भवति तदा महाप्रत्यवायभयादल्पप्रत्यवायमुपेक्ष्यापि स्वेदो विधेय इति न्यायसिद्धमेव; यदाहुर्न्यायविदः- "भूयोविरोधे स्वल्पमन्याय्यम्" इति।।- In all the above conditions *Sveda* is not to be given generally. But when a serious disease which can be managed only by means of sudation such as *Sannyāsa* is attacked to any one of the above mentioned patients, he may be given sudation therapy. As it has been stated "A smaller anomaly is welcome if it helps to eradicate a greater one"

Indications for Svedakarma [20-24]

प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे।।20।।
अर्दितैकाङ्गसर्वाङ्गपक्षाघाते विनामके।
कोष्ठानाहविबन्धेषु मूत्राघाते विजृम्भके।।21।।
पार्श्वपृष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च।
मूत्रकृच्छ्रे महत्त्वे च मुष्कयोरङ्गमर्दके।।22।।
पादजानूरुजङ्घार्तिसंग्रहे श्वयथावपि।
खल्लीष्वामेषु शीते च वेपथौ वातकण्टके।।23।।
संकोचायामशूलेषु स्तम्भगौरवसुप्तिषु।
सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते।।24।।

The following are indicated for sudation therapy:

- Those who are suffering from coryza (*Pratiśyāya*), cough (*Kāsa*), hiccup (*Hikkā*) and dyspnea (*Śvāsa*).
- Those who are feeling heaviness in the body (*Alāghave*).
- Those who are suffering from earache (*Karṇaśūla*), neck pain (*Manyāśūla*), headache (*Śirahśūla*), hoarseness of voice (*Svarabheda*) and compression of the throat (*Galagraha*).
- Those who are suffering from bell's palsy (*Ardita*), monoplegia (*Ekāṅga Vāta*), paraplegia (*Sarvāṅga Vāta*), hemiplegia (*Pakṣāghāta*) and bending of the body (*Vināmaka*).
- Those who are suffering from distension of abdomen (*Koṣtha Anāha*), constipation (*Vibandha*), retention of urine (*Mūtrāghāta*) and yawning (*Vijṛmbhaka*).
- Those who are suffering from stiffness in the flanks (*Pārśva*), back (*Pṛṣṭha*), waist (*Kaṭī*) and abdomen (*Kukṣi*); sciatica (*Gṛdhrasī*), dysuria (*Mūtrakṛcchra*), enlargement of scrotum (*Mahattve ca Muṣkayo*) and body pains (*Aṅgamarda*).
- Those who are suffering from stiffness and pain in the feet (*Pāda*), knees (*Jānu*), thighs (*Ūru*) and legs (*Jaṅghā*); oedema (*Śvayathu*), neuralgia of upper and lower extremities (*Khallī*), improper digestion (*Āmadoṣa*), coldness (*Śīta*), tremors (*Vepathu*) and affliction of ankle joint by *Vāta* (*Vātakaṇṭaka*).
- Those who are suffering from contraction (*Saṅkoca*), extension (*Āyāma*), sharp pain (*Śūla*), stiffness (*Stambha*), heaviness (*Gaurava*), numbness (*Supti*) and the diseases afflicting whole the body (*Sarvāṅga Vikāra*).

Cakrapāṇi:

प्रतिश्याये चेत्यादिना स्वेद्यान् दर्शयति।- Beginning the verse with the word '*Pratiśyāye*' the author has presented the list of persons eligible for sudation therapy.

विनामकः शरीरविनमनकारी वातः।- *Vināmaka* is the bending of the body due to vitiated *Vāta*.

विजृम्भको बहिरायामः, जृम्भाबहुत्वं वा।- *Vijṛmbha* means either *Bahirāyāma* (bending of the body backwards) or excessive yawning.

पादजानूरुजङ्घाभिरर्तिः संग्रहश्च पृथक् संबध्यते।- Here the word '*Arti*' refers to pain and stiffness to all the parts of the body such as *Pāda*, *Jānu*, *Ūru* and *Jaṅghā* separately.

खल्ली हस्तपदावमोटनम्।- *Khallī* means shooting pain in both upper and lower limbs.

वातकण्टको गुल्फाश्रितो वातः।- *Vātakaṇṭaka* means affliction of ankle joint by *Vāta*.

अलाघव इति पूर्वमुक्तेऽपि पुनर्गौरववचनमङ्गानां गुरुतरत्वप्रतिपादनार्थम्, अलाघववचनं तु लाघवप्रतिषेधमात्रप्रयोजनं नातिगुरुत्वं ब्रूते, यतः सर्वत्र नञ् विरुद्धे न वर्तते, यथा "अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम्" (सू.अ.21) इत्यत्र न ह्यरूक्षशब्देन स्निग्धत्वमभिप्रेतं, किं तर्हि रूक्षताप्रतिषेधमात्रमेव।- Though the word '*Alāghava*' is used earlier in the present verse, again the word '*Gaurava*' is specifically used to stress heaviness in the body. *Alāghava* refers to not possessing lightness in the body and also not too much heaviness. Similarly the word '*Arūkṣa*' should not be understood as *Snigdha* but it can understand as not having dryness as mentioned in the 21st chapter of *Sūtrasthāna*.

Drugs Useful for Piṇḍasveda & Prastara Sveda [25-27]

तिलमाषकुलत्थाम्लघृततैलामिषौदनैः।
पायसैः कृशरैर्मांसैः पिण्डस्वेदं प्रयोजयेत्।।25।।
गोखरोष्ट्रवराहाश्वशकृद्भिः सतुषैर्यवैः।
सिकतापांशुपाषाणकरीषायसपूटकैः।।26।।
श्लैष्मिकान् स्वेदयेत् पूर्वैर्वातिकान् समुपाचरेत्।
द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि।।27।

Piṇḍasveda is of two types viz. *Snigdha Piṇḍasveda* and *Rūkṣa Piṇḍasveda* and which are useful for the management of *Vāta* and *Kapha* disorders respectively.

Snigdha Piṇḍasveda:

- A bolus prepared with *Tila* (sesamum

seeds), *Māṣa* (blackgram), *Kulattha* (horsegram), *Amla dravya* (*Cāngerī* etc.), *Ghṛta* (ghee), *Taila* (oil), *Āmiṣaudana* (rice cooked with meet), *Pāyasa* (milk pudding), *Kṛśarā* (*Khichidi*) and *Māṃsa* (meet) is useful for the management of *Vāta* disorders.

Rūkṣa Piṇḍasveda:

- A bolus prepared with the dung of cow, donkey, camel, boar and horse (*Go-khara-uṣṭra-varāha-aśva Śakṛt*) along with husk (*Tuṣa*), barley (*Yava*), sand (*Sikatā*), dust (*Pāṃśu*), stone (*Pāṣāṇa*), dried cow dung powder (*Karīṣa*) and iron powder (*Ayas*) is useful for the management of *Kapha* disorders.
- The above drugs are also useful for *Prastara Sveda*.

Cakrapāṇi:

वक्ष्यमाणानां सङ्करादिस्वेदानां द्रव्याण्याह- तिलमाषेत्यादि।- Beginning the verse with the term '*Tilamāṣa*', the author has presented the drugs useful for different types of sudation therapies such as *Saṅkara sveda*, *Prastara sveda* etc.

पिण्डरूपः स्वेदः पिण्डस्वेदः।- *Piṇḍa Sveda* means conduction of sudation by means of round bolus.

करीषः शुष्कगोमयः;- *Karīṣa* means dried cow dung.

आयसः अयोविकारः, स चेह पुटकरणयोग्यो बोद्धव्यः।- *Āyasa* means *Ayo-vikāra* i.e. modified form of iron which will be useful for conducting *Piṇḍa Sveda*, ideally the powder form.

पूर्वैरिति तिलमाषादिभिः। यथास्वमित्यनेन तिलमाषादयो वाते, गोखरादिग्रन्थोक्ताश्च श्लेष्मणि, प्रस्तरस्वेदे कर्तव्या इति दर्शयति।- *Pūrvokta* means whatever is being told earlier such as *Tila*, *Māṣa* etc. *Piṇḍasveda* conducted with *Tila*, *Māṣa* etc. are useful for the management of *Vāta* disorders and the recipe of *Go-Kharādi* is useful for the management of *Kapha* disorders.

Material Required for Jentāka Sveda [28]

भूगृहेषु च जेन्ताकेषूष्णगर्भगृहेषु च।
विधूमाङ्गारतप्तेषु स्वभ्यक्तः स्विद्यते सुखम्॥२८॥

Initially select an underground cellar (*Bhū Gṛha*) or *Jentāka* type of room or warm enclosed central room (*Uṣṇa Garbha-Gṛha*) and make it warmth by igniting firewood and see that the chamber is devoid of smoke. Then the patient is anointed with suitable oil and makes him perspire by keeping him in that chamber comfortably.

Cakrapāṇi:

भूगृहेष्विति भूस्वेदार्थेषु गृहेषु।- *Bhūgṛheṣu* means the cabin built in the cellar useful for sudation therapy.

उष्णगर्भगृहेष्विति कुटीस्वेदं दर्शयति।- *Uṣṇagarbha Gṛha* means the cottage without windows and is built for conducting *Kuṭī Sveda*.

स्वभ्यक्त इति सम्यगभ्यक्तः।- *Svabhyakta* means properly oleated.

Drugs Useful for Nāḍī Sveda [29-33]

ग्राम्यानूपौदकं मांसं पयो बस्तशिरस्तथा।
वराहमध्यपित्तासृक् स्नेहवत्तिलतण्डुलाः॥२९॥
इत्येतानि समुत्क्वाथ्य नाडीस्वेदं प्रयोजयेत्।
देशकालविभागज्ञो युक्त्यपेक्षो भिषक्तमः॥३०॥
वारुणामृतकैरण्डशिग्रुमूलकसर्षपैः ।
वासावंशकरञ्जार्कपत्रैरश्मन्तकस्य च ॥३१॥
शोभाञ्जनकसैरेयमालतीसुरसार्जकैः ।
पत्रैरुत्क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत्॥३२॥
भूतीकपञ्चमूलाभ्यां सुरया दधिमस्तुना।
मूत्रैरम्लैश्च सस्नेहैर्नाडीस्वेदं प्रयोजयेत्॥३३॥

The physician who is well versed the habitat and season and by having the sense of rationality should conduct *Nāḍī Sveda* with the following drugs.

- The decoction prepared with the meat of domesticated animals, animals residing in the marshy land and aquatic animals (*Grāmya-ānūpa-udaka Māṃsa*); milk (*Paya*); head of a goat (*Basta Śiras*); blood, bile and flesh of middle part of a boar (*Varāha madhya pitta asṛk*); castor seeds etc., sesamum seeds and rice (*Snehavat Tila Taṇḍula*). Conduction of *Nāḍī Sveda* (sudation by means of a tube) with the above drugs is useful for the management of *Vāta* disorders.
- The decoction prepared with the leaves of *Varuṇa*, *Amṛtā*, *Eraṇḍa*, *Śigru*, *Mūlaka*, *Sarṣapa*, *Vāsā*, *Vaṃśa*, *Karañja*, *Arka*, *Aśmantaka*, *Śobhāñjana*, *Saireya*, *Mālatī*, *Surasā* and *Arjaka* is useful for the management of *Kapha* disorders, when used for *Nāḍī Sveda*.
- The decoction prepared with *Bhūtīka*, *Bṛhat Pañcamūla*, alcoholic beverage (*Surā*), curd (*Dadhi*), whey (*Mastu*), eight types of urine (*Mūtraiḥ*), sour substances (*Amlaiḥ*) and 4 types of unctuous substances (*Snehaiḥ*) is useful for the management of *Vāta-kapha*. disorders, when used for *Nāḍī Sveda*.

Cakrapāṇi:

बस्तशिरः छागमस्तकम्।- *Basta-śiraḥ* means the head of a goat.

स्नेहवन्तश्चैरण्डबीजादयः तिलाश्च तण्डुलाश्च स्नेहवत्तिलतण्डुलाः।- '*Snehavat-tila-taṇḍula*' means oil yielding seeds such as *Eraṇḍa*, *Tila* etc.

ग्राम्येत्यादिना वातापहो नाडीस्वेद उक्तः, वारुणेत्यादिना कफापहः, भूतीकेत्यादिना वातश्लेष्मापहः।- The drugs such as *Grāmya-ānūpa-udaka Māṃsa* etc. are useful to conduct *Nāḍī Sveda* for the management of *Vāta* disorders; similarly *Varuṇa* etc. are useful in *Kapha* disorders and *Bhūtīka* etc. for the management of *Vāta-kapha* disorders.

वारुणो वरुणः अमृतका गुडूची, सर्षपैरित्यत्र पत्रैरिति संबध्यते।- The word *Patra* is related to *Varuṇa*, *Guḍūcī*, *Sarṣapa* etc. That means one should take the leaves of all the above drugs for the purpose of fomentation.

वंशो वेणुः।- *Vaṃśa* means *Veṇu* i.e. bamboo.

पुनः शोभाञ्जनग्रहणाद्द्वितीयो विटपशोभाञ्जनो गृह्यते, सैरेयः झिण्टी।- In the above verse two drugs i.e. *Śigru* and *Śobhāñjana* are mentioned. Hence *Śobhāñjana* should be considered as *Viṭapa Śobhāñjana*. *Saireya* means *Jhiṇṭī*.

Drugs Useful for Avagāha Sveda [34]

एत एव च निर्यूहाः प्रयोज्या जलकोष्ठके।
स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत्॥३४॥

- The above mentioned 3 types of decoctions also can be used as *Avagāha Sveda* after filling them in a big tub (*Jala-Koṣṭhaka*) for the management of *Vāta*, *Kapha and Vāta-kapha* disorders respectively.

- Similarly this kind of tubs such *Ghṛta Koṣṭha, Kṣīra Koṣṭha* and *Taila/ Koṣṭha* also can be fabricated and used for *Avagāha Sveda.*

Cakrapāṇi:

एत एवेति नाडीस्वेदोक्तास्त्रयोऽपि।- *Eta Eva* means the three groups of drugs also which are mentioned in *Nāḍī Sveda.*

जलकोष्ठः अवगाहार्थं कृतं महज्जलपात्रम्; एवं घृतक्षीरतैलकोष्ठाश्च व्याख्याताः।।- *Jalakoṣṭha* means the big tub which is being *useful for conducting Avagāha Sveda. In the similar fashion one has to understand other Koṣṭha useful for Avagāha Sveda being conducted with Ghṛta, Taila and Kṣīra.*

Drugs & Material Useful for Upanāha Sveda [35-38]

गोधूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः ।
सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते॥३५॥
गन्धैः सुरायाः किण्वेन जीवन्त्या शतपुष्पया।
उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत्॥३६॥
चर्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः।
उष्णवीर्यैरलाभे तु कौशेयाविकशाटकैः॥३७॥
रात्रौ बद्धं दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवा कृतम्।
विदाहपरिहारार्थं, स्यात् प्रकर्षस्तु शीतले॥३८॥

The following drugs are useful for *Upanāha Sveda*:

- The paste prepared with the wheat powder (*Godhūma-śakala*), barley powder (*Yava cūrṇa*), *Amla dravya* (sour substances), unctuous substances (*Sneha dravya*), yeast (*Kiṇva*) and salts (*Lavaṇa*) can be used as *Upanāha Sveda* for the management of *Vāta* disorders.
- The paste prepared with the aromatic drugs like *Candana, Aguru* etc. (*Gandha dravya*), alcoholic preparation (*Surā*), yeast (*Kiṇva*), *Jīvantī* and *Śatapuṣpa* can be used as *Upanāha Sveda* for the management of *Kapha* disorders.
- The paste prepared with the seeds of *Umā, Kuṣṭa* and *Taila* can be used as *Upanāha Sveda* for the management of *Vāta-kapha* disorders.
- After the application of the paste on the body part it should be bandaged with piece of hair containing leather (*Sa-loma carma*); and which is devoid of putrefied smell (*Apūtibhiḥ*) and possess hot potency (*Uṣṇa Vīrya*). If the leather piece is not available one can use a piece of silk cloth (*Kauśeya*) or woolen cloth (*Avi-śāṭaka*) for bandaging.
- In order to avoid burning sensation the bandage applied in the night should be removed in the morning; and the bandage applied in the morning is to be removed in the night hours generally. But the bandage may be retained for more periods during cold seasons.

Cakrapāṇi:

गोधूमशकलैः गोधूमचूर्णैः।- *Godhūma Śakala* means *Godhūma Cūrṇa* i.e. wheat powder.

किण्वः सुराबीजम्।- *Kiṇva* means *Surābīja* i.e. yeast.

उपनाहः बहलं लेपं दत्त्वा चर्मादिभिरावृत्य व्याधियुक्तस्याङ्गस्य बन्धनम्; चर्मभिश्चोपनद्धव्य इत्यत्र उपनाहोऽनग्निस्वेदो ग्राह्यः।- *Upanāha* means putting the thick paste on the diseased part and then bandaging with an animal skin or silk cloth etc. Here the affected part is being wrapped with animal skin etc. and hence it is known as '*Upanāha*' and it comes under the category of non-thermal sudation.

गन्धैः सुगन्धिद्रव्यैरुपनाहो बन्धनीयः।- '*Gandhaiḥ*' means the aromatic drugs which are useful for *Upanāha* to do bandage.

उष्णवीर्यैरिति उष्णवीर्यमृगादिप्राणिप्रभवैः।- *Uṣṇa-vīryai* means that obtained from the animals like deer etc.

आविकशाटकः कम्बलः।।- *Āvika-śāṭaka* means woolen blanket.

उपनाहस्वेदे बन्धमोक्षावधिं दर्शयति- रात्रौ बद्धमित्यादि।- By the mention of the words '*Rātrau Baddham*', the author has presented the procedure of bandaging in *Upanāhasveda.*

दिवाकृतमित्यत्र 'बन्धं' इति शेषः।- Here the word '*Bandha*' should be supplemented after the mention of *Divā kṛtam* to get the appropriate meaning.

विदाहः रक्तादिविदाहः।- *Vidāha* means burning sensation in the blood and other tissues.

शीतले इत्यत्र 'काले' इति शेषः।- *Śītale* means during cold seasons.

प्रकर्ष उक्ताद्बन्धनकालादधिककालत्वं बन्धनस्य।।- *Prakarṣa* means keeping the bandage more than the prescribed time.

13 Types of Agni Sveda [39-40]

सङ्करः प्रस्तरो नाडी परिषेकोऽवगाहनम्।
जेन्ताकोऽश्मघनः कर्षूः कुटी
भूः कुम्भिकैव च॥३९॥
कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश।
तान् यथावत् प्रवक्ष्यामि सर्वानेवानुपूर्वशः॥४०॥

The following are the 13 types of *Agni Sveda*, which are being described in the same order.

- *Saṅkara Sveda* (mixed fomentation).
- *Prastara Sveda* (hot bed fomentation).
- *Nāḍī Sveda* (steam kettle fomentation).
- *Pariṣeka Sveda* (fomentation by effusion).
- *Avagāha Sveda* (fomentation by bath tub).
- *Jentāka Sveda* (sudatorium sudation).
- *Aśmaghana Sveda* (stone bed sudation).
- *Karṣū Sveda* (trench sudation).
- *Kuṭī Sveda* (cabin sudation).
- *Bhū Sveda* (ground bed sudation).
- *Kumbhī Sveda* (pitcher bed sudation).
- *Kūpa Sveda* (pit sudation).
- *Holāka Sveda* (under bed sudation).

Cakrapāṇi:

संप्रति साग्निस्वेदानां सङ्करादीनां लक्षणमभिधातुं सङ्करादीन् स्वेदान् नामतस्तावदुद्दिशति- सङ्कर इत्यादि।- Now the author is going to explain the features of *Saṅkara Sveda* and the other thermal sudations by starting the verse with the word '*Saṅkara*'.

सङ्करादिशब्दाश्चायुर्वेदपरम्परासिद्धाः; तत्र क्वचित्नाडीस्वेदादौ नाड्या प्रणीयत इत्यन्वयोऽप्यनुसरणीयः, जेन्ताकादयश्चान्वयनिरपेक्षा एव।।- The words '*Saṅkara*' etc. are popularized by tradition and are being used in technical sense. But some of them are having specific meaning derived from them such as *Nāḍī Sveda*. Here sudation is being conducted by means of a tube and hence it is called *Nāḍī Sveda*. The term *Jentāka* etc. should be understood in accordance with the name.

Saṅkara Sveda [41]

तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यथोक्तै-

रूपस्वेदनं सङ्करस्वेद इति विद्यात्॥41॥

The process of conducting sudation by means of a bolus containing the drugs as mentioned above (such as *Tila, Māṣa* etc.) by wrapping or without wrapping a piece of cloth is known as *Saṅkara Sveda*.

Cakrapāṇi:

पिण्डैर्यथोक्तैरिति तिलमाषादिपिण्डैस्तथा गोखरादि-ग्रन्थोक्तपुटकरूपैश्च पिण्डैः; स्वेदनमेवोपस्वेदनम्।- *Piṇḍaiḥ-yathoktaiḥ-iti'* = A bolus is prepared with the substances like *Tila, Māṣa* etc. or with the dung of cow, donkey etc. as mentioned earlier. Conduction of *Svedana* with this bolus is known as *Upasvedana*.

Prastara Sveda [42]

शूकशमीधान्यपुलाकानां वेशवारपायसकृश-रोत्कारिकादीनां वा प्रस्तरे कौशेयाविको-त्तरप्रच्छदे पञ्चाङ्गुलोरुबूकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्वगात्रस्य शयानस्योपस्वेदनं प्रस्तरस्वेद इति विद्यात्॥42॥

- Initially take the drugs like *Śūkadhānya* (cereals), *Śamīdhānya* (pulses), *Pulāka* (inferior variety of grains) and prepare pudding or take *Veśavāra* (it is a meat preparation without bones), *Pāyasa* (milk pudding), *Kṛśarā* (*Khicaḍī*), *Utkārikā* (a sort of sweetmeat) and then the pudding is made to spread on a stone having the measurement of an individual.
- Afterwards cover the pudding with a silk or woolen cloth or the leaves of *Pañcāṅgula, Urubūka* or *Arka*.
- After anointing the whole body of patient with suitable oils, he is instructed to lie down comfortably on the stone to make him perspire.



- The method of conducting sudation in the above mentioned procedure is known as *Prastara Sveda*.

Cakrapāṇi:

पुलाकः तुच्छधान्यम्।- *Pulāka* means *Tuccha Dhānya* i.e. inferior variety of grains.

उत्कारिका माषादिकृतोत्कारिकाकृतिभक्ष्यविशेषः।- *Utkārikā* is a type of *Roṭī* shaped food preparation made by *Māṣa* and other substances.

प्रस्तीर्यत इति प्रस्तरः शयनप्रमाणेन स्वेदवस्तूनां विस्तारं, तस्मिन् प्रस्तरे।- Spreading out the material which is used for sweating on a stone having the measurement of a person is known as '*Prastīryata*'.

कौशेयाविकोत्तरप्रच्छदे कौशेयाविकपिहित इत्यर्थः।- *Kauśeyāvika-uttara-pracchade* means to be covered with silk or woolen cloth.

पञ्चाङ्गुल एरण्डभेदः।- *Pañcāṅgula* means another variety of *Eraṇḍa*.

Nāḍī Sveda [43]

स्वेदनद्रव्याणां पुनर्मूलफलपत्रशुङ्गादीनां मृगशकुनपिशितशिरस्पदादीनामुष्णस्वभावानां

वा यथार्हमम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां बाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरेषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्त्रोतसा सर्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनामितया वातहरसिद्धस्नेहाभ्यक्तगात्रो बाष्पमुपहरेत्; बाष्पो ह्यनृजुगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाडीस्वेदः॥43॥

- The process of conducting sudation by means of a tube is known as *Nāḍī Sveda*.
- Initially collect the roots, fruits, leaves and leaf buds of the drugs useful for sudation; meat of animal and birds, head, legs and other body parts of animals which possess hot potency and mixed with sour substances, salts, unctuous substances, urine and milk depending upon the nature of the disease.
- Afterwards take them in an earthenware and to be boiled well and see that the vapor doesn't leak.
- Then a tube prepared with the reed of *Sara* or with the leaves of *Vaṃśa, Karañja, Arka* or similar others and should be attached to the above earthenware.
- The measurements of the tube should be as follows.

Length 1 *Vyāma* (measurement of two extended arms i.e. 6 feet) or ½ *Vyāma* (half a fathom 3 feet)

The circumference at the proximal end is ¼th *Vyāma* and at its distal end is 1/8th *Vyāma*.

It should be bent twice or thrice in a shape of elephant trunk, so as to restrict the pressure of vapor and also to prevent accidental burns or scalds.

- After anointing the body of the patient with medicated oils, *Nāḍī Sveda* should be conducted comfortably with the vapor coming out from the tube.



Cakrapāṇi:

स्वेदनेत्यादिना नाडीस्वेदमाह।- In the present verse the author has presented the details about *Nāḍī Sveda* by starting with the word '*Svedana-dravyāṇāṃ*'.

स्वेदनद्रव्याणि स्वेदोपगगणोक्तानि इह च नाडीस्वेदक्वाथार्थमुक्तानि।- Generally the word '*Svedana-dravyāṇi*' refers to the drugs mentioned in the group of adjuvants to sudation therapy. Here the drugs mentioned in the verses from 29 to 33 should be prepared in the form of decoction and used for the purpose of *Nāḍī Sveda*.

शिरःपदं मस्तकम्।- The word '*Śiraḥpada*' is taken as *Mastaka* (head) by *Cakrapāṇi*, whereas *Yogindranāth* has interpreted it as *Śira* (head) and *Pāda* (foot). *Ācārya P.V. Sharma ji*

is also opined that it should be understood as head and foot.

बाष्पमनुद्वमन्त्यामित्यनेन क्वथनकाले बाष्पो यथा न निर्याति तथा कर्तव्यमिति दर्शयति।- '*Bāṣpam-anudvamantyam*' means during the preparation of the decoction, whatever method is suitable to prevent the leakage of vapor, that method should be adopted.

उत्क्वथितानां बाष्पं स्नेहाक्तगात्रः सन् नाड्या उपहरेदिति संबन्धः।- The vapor that emits by preparing the decoction should be used for sudation purpose to the person who is anointed with oil, by means of a tube.

नाडीकरणविधिमाह- शरेषीकेत्यादि।- By mentioning *Śareṣīka* etc. the author has described the method of preparation of tube useful for *Nāḍī Sveda*.

वंशदलो वंशविदलः।- *Vaṃśa dala* means the tube being prepared by bamboo.

गजाग्रहस्तसंस्थानत्वं नाड्या अग्र एव बोद्धव्यम्।- '*Gajāgrahasta saṃsthān*' means the shape of the end part of the tube should be similar to elephant's trunk.

व्यामः तिर्यग्विस्तृतबाहुद्वयप्रमाणं; व्यामदीर्घत्वं नाड्या बहलस्वेदे कर्तव्यम्।- *Vyāma* means the measurement of two extended hands. That much length of tube is to be used for conducting *Mahā Sveda*.

व्यामचतुर्थभागेन व्यामाष्टभागेन च मूले अग्रे च यथासंख्यं मानं नाड्या वेदितव्यं; परिणाहेन वेष्टनेन स्रोतो रन्ध्रं यस्याः सा तथा।- The measurement of the base and the tip of the tube should be ¼th and 1/8th *Vyāma* respectively. That means the hole of the tube is large at the base and it should be gradually decreasing towards the tip.

यथोक्तनाडीकरणे गुणमाह- बाष्पो हीत्यादि। विहतचण्डवेगत्वं नाडीकाया दीर्घत्वेन वक्रत्वेन च बोद्धव्यम्।।- As the tube is being lengthy and is bent twice or thrice the velocity of the vapor will be restricted.

Pariṣeka Sveda [44]

वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वर्षणिकाः प्रनाडीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः॥44॥

- Initially take the roots and other parts of the drugs of *Vātahara* and *Vāta-kapha hara* and should prepare the decoction.
- Fill these decoctions into the pitchers or earthenware or tube having number of holes at the bottom. See that the decoctions should be in lukewarm condition.
- Then it is used it to sprinkle over the affected part of the body or whole body, which is already anointed with suitable oils and also being covered with a cloth.

Cakrapāṇi:

परिषेकविधिमाह- वातिकेत्यादि।- In the present verse the author has presented the procedure of *Pariṣeka Sveda* by starting with the word '*Vātikottara-vātikānāṃ*'.



Pariṣeka Sveda

वातिकानि वातहराणि, उत्तरवातिकानि उत्तरवाते प्रधानवाते वातश्लेष्मणि हितानीह ग्राह्याणि।- *Vātikāni* means *Vātaharāṇi* i.e. the drugs useful to mitigate *Vāta*.

Uttaravātikānām means the drugs useful for the management of *Vāta* predominant *Vāta-kapha* ailments.

वर्षणिका अल्पघटी, 'सहस्रधारा' इत्यन्ये; प्रणाडी वेणुनलनाड्याद्याः।।- *Varṣaṇikā* means either a small pitcher or a vessel having number of holes at the bottom. *Pranāḍī* means a pipe or tube made of bamboo etc.

Avagāha Sveda [45]

वातहरोत्क्वाथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः॥45॥

- After anointing the body with suitable oils, the patient is instructed to bath in a tub which is filled with the *Vātahara* decoction, milk, oil, ghee, mutton juice, hot water etc. This is called *Avagāha Sveda*.



Avagāha Sveda

Cakrapāṇi:

यथोक्त एवेति लोकप्रसिद्ध एव।- *Yathokta* means which is being popularized commonly.

अवगाहः अवगाहस्वेदः।।- *Avagāha* means *Avagāha Sveda*.

Jentāka Sveda [46]

अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत- तत्र पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमधुरमृत्तिके सुवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे सप्ताष्टौ वाऽरत्नीरुपक्रम्योदकात् प्राङ्मुखमुदङ्मुखं वाऽभिमुखतीर्थं कूटागारं कारयेत्, उत्सेधविस्तारतः परमरत्नीः षोडश, समन्तात् सुवृत्तं मृत्कर्मसंपन्नमनेकवातायनम्; अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेदाकपाटात्, मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं मृन्मयं कन्दुसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत्; तं च खादिराणामाश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत्; स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमान्यवतप्तं च केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति, तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत्, प्रवेशयंश्चैनमनुशिष्यात्- सौम्य! प्रविश कल्याणायारोग्याय चेति, प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः, न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा विमोक्तव्याऽऽप्राणोच्छ्वासात्, भ्रश्यमानो ह्यतः पिण्डिकावकाशाद्द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणाञ्जह्याः, तस्मात् पिण्डिकामेनां न कथंचन मुञ्चेथाः; त्वं यदा जानीयाः- विगताभिष्यन्दमात्मानं सम्यक्प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविमुक्तं लघूभूतमपगतविबन्धस्तम्भसुप्तिवेदनागौरवमिति, ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः,

निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेथाः, अपगतसन्तापक्लमस्तु मुहूर्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः; इति जेन्ताकस्वेदः॥46॥

- A special cottage should be constructed for *Jentāka Sveda* and it can be called as *Jentāka Gṛha*.
- Select the good place of fertile land whose earth is blackish or golden colored and sweet and in the eastern or northern side of the village. Afterwards construct a circular cottage measuring 16 arms height and circumferences.
- See that a pond is present in front of the cottage, which is seven to eight arms distance from the cottage.
- The walls of the cottage is besmeared with mud and having many windows.
- Construct 2½ ft. width platform around and inside the cottage leaving to exit.
- A hollow pillar should be constructed in the center with many holes and a lid having the measurements of 6ft x 6ft height and circumference.
- This should be filled with firewood of *Khādira, Aśvakarṇa* and be ignited. When all the firewood is burnt and free from smoke, instruct the patient to enter into the cottage after anointing the body by giving the following instructions:
- Never leave the platform even if he gets fainted.
- After getting the symptoms of proper sudation (such as body becoming light, relieving the pain, stiffness, numbness and heaviness etc.) move towards exit following the platform only.
- Should not take cold water for drinking or bathing immediately after coming out from *Jentāka Gṛha*.
- Then advise the patient to wait for 45 minutes and then have hot water bath and light diet.



Jentāka Sveda

Cakrapāṇi:

जेन्ताकविधिमाह- अथेत्यादि।- In the present verse the author has presented the procedure of *Jentāka Sveda* by starting with the word '*Atha*'.

अथशब्दो मङ्गले आनन्तर्ये वा।- The word '*Atha*' refers to the meaning of either auspicious or afterwards.

पूर्वस्यामुत्तरस्यां वेति ग्रामाद्दोद्धव्यम्।- *Pūrvasyāṃ-uttarasyāṃ va* refers to the eastern and northern side of the village.

गुणवतीति सस्यप्ररोहादियुक्तत्वेन; प्रशस्तभूमिभागत्वं तुषाङ्गारादिरहितत्वेन।- *Guṇavatī* means the land should be fertile and having plenty of vegetation. *Praśasta Bhūmi* means the land selected for the construction of *Jentāka Gṛha* should be freed from heap of ashes.

परीवापः दीर्घिका।- *Parīvāpa* means *Dīrghikā* i.e. a long lake or pond.

सुष्ठु उप समीपे तीर्थं यस्य तस्मिन् सूपतीर्थे।- *Sūpatīrtha* means nearer to pilgrimage.

अरत्निः हस्तः।- *Aratni* means the measurement which is equivalent to one hand.

प्राङ्मुखमिति पश्चिमे, उदङ्मुखमिति दक्षिणे; एवं ह्यभिमुखं तीर्थं भवति।- The lake or pond should be opposite to the cottage so as the pond is either in the eastern of northern direction. That means the cottage is to be constructed in the western or southern direction of the pond.

कूटागारमिति वर्तुलागारम्।- *Kūṭāgāra* means a circular shaped cottage.

आकपाटादित्यनेन द्वारपर्यन्तं लक्षयति।- '*Ākapāṭāt*' means till the entry gate.

किष्कुः हस्तः।- *Kiṣku* means hands.

पुरुषप्रमाणमिति ऊर्ध्वतः।- *Puruṣa Pramāṇa* means in respect of its height.

कन्दुः कन्द्वाकाराग्निस्थानम्।- *Kandu* means the place of sphere shaped furnace.

अङ्गारार्थं कोष्ठोऽवकाशो विद्यते यस्मिन् सोऽङ्गारकोष्ठकः, स एव स्तम्भ इत्यङ्गारकोष्ठकस्तम्भः।- Where in which the space exists and useful for filling charcoal and to burn it is known as *Aṅgārakoṣṭaka* and if it is in the cylindrical pillar shape, it is called *Aṅgārakoṣṭaka sthambha*.

खादिराणामिति पूरणे षष्ठी।- The term *Khadirāṇām* refers to that the coal bunker (*Aṅgārakoṣṭi*) should be filled with the logs of *Khadira, Asvakarṇa* etc. To fill the bunker with coal wood, *Ṣaṣṭī Vibhaktī* is used here.

स इत्यत्र 'त्वं' इत्यध्याहार्यं,- With this word '*Sa*', the meaning of *Tvam* should be taken.

जानीया इत्यर्थः; किंवा, 'जानीयात्' इति पाठः, उत्तरत्रापि 'प्रवेशयेत्' इति पाठः; एवं च सुगमम्।- The term '*Jānīyāt*' should be understood as mrntionrd under. The person who is undergoing for sudation therapy should be instructed to enter into *Jentāka Gṛha*, only when the firewood is properly burnt and is freed from smoke. In this state is most suitable for the person to enter into *Jentāka Gṛha*.

पिच्छा स्वेदस्यैव पिच्छिलो भागः।- *Picchā* means the slimy or sticky part of the sweat itself.

सर्वेषु स्रोतःसु विमुक्तं सर्वस्रोतोविमुक्तम् अपगतविबन्धस्तु अपगतमलविबन्धो बोद्धव्यः।- *Sarvasroto-vimuktam* means dilatation of all the channels. *Apagata-vibandha* means the relief from the obstruction of body wastes.

चक्षुषोः परिपालनार्थमिति अत्रोपतप्तस्य सहसा शीतजलप्रवेशे शीतजलपराहत ऊष्मा नयनोपघातं करोतीत्यभिप्रायः।- Immediately after sudation therapy the individual should not splashing the eyes with cold water. Because the heat present in the body is being obstructed by the cold water and which cause harm to the eyes.

अत्र च जेन्ताके भूमिविशेषपरिग्रहजलसान्निध्यादयो मङ्गलार्थाः; जलसान्निध्यं तु स्विद्यमानस्य दर्शनेन दृष्टेः परिपालनार्थं च, तथा स्वेदातियोगप्रतिक्रियार्थं कूटागारस्य जलसान्निध्ये सुखेन करणार्थं च।- The following are the probable reasons for selecting the suitable land and pond near by the cottage are: a) For the sake of auspiciousness. b) For the sake of pleasing and soothing effect to the eyes c) For the easy management of the complications arises due to excessive sudation.

Aśmaghana Sveda [47-49]

शयानस्य प्रमाणेन घनामश्ममयीं शिलाम्।
तापयित्वा मारुतघ्नैर्दारुभिः संप्रदीपितैः॥47॥
व्यपोह्य सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा।
तां शिलामथ कुर्वीत कौषेयाविकसंस्तराम्॥48॥
तस्यां स्वभ्यक्तसर्वाङ्गः
स्वपन् स्विद्यति ना सुखम्।
कौरवाजिनकौषेयप्रावाराद्यैः सुसंवृतः ॥49॥
इत्युक्तोऽश्मघनस्वेदः,

- Conducting fomentation by means of stone is known as *Aśmaghana Sveda*.

- Initially procure a slab of stone having the measurements of a normal person's sizes of length and breadth; which should be comfortable while lying down.
- Then put *Vāta-hara* herbs on the stone and ignite. Afterwards remove the ash.
- Later on sprinkle the stone slab with hot water and then cover the stone with silk or woolen cloth.
- After anointing the body of the patient with suitable oils and well covered with upper garments he is being instructed to lie down on the slab. By doing this he is comfortably fomented.

Aśmaghana Sveda

Cakrapāṇi:

कौरवं कार्पासम्।।- *Kaurava* means cotton fabrics.

Karṣū Sveda [50-51]

...कर्षूस्वेदः प्रवक्ष्यते।
खानयेच्छयनस्याधः कर्षूं स्थानविभागवित्॥50॥
दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत्ततः।
तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम्॥51॥

- The trench having narrow mouth and wide base is called '*Karṣū*'
- The physician who is well versed with assignment of place should dig a trench having narrow mouth and wide base below the bedstead.
- Then the trench should be filled with burning charcoal which is devoid of smoke.
- After anointing the body of the patient, he is being instructed to lie down on the bedstead comfortably till he gets the proper signs and symptoms of fomentation.

Karṣū Sveda

Cakrapāṇi:

कर्षूः अभ्यन्तरविस्तीर्णः स्वल्पमुखो गर्तः।।- *Karṣū* means the trench having wide base and narrow mouth.

Kuṭī Sveda [52-54]

अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्।
घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः संप्रलेपयेत्॥52॥
कुटीमध्ये भिषक् शय्यां स्वास्तीर्णामुपकल्पयेत् ।
प्रावाराजिनकौशेयकुथकम्बलगोलकैः ॥53॥
हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वशः।
परिवार्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम्॥54॥

- The process of conducting fomentation in a cottage is known as *Kuṭī Sveda*.
- Initially construct a thick walled circular cottage which should be neither too high nor too wide. It should not be having any windows.
- Afterwards the inner walls of the cottage should be plastered with the paste of *Kuṣṭha* and others.
- Then arrange a bedstead well covered with cotton, silk or woolen cloths in the center of the cottage and it is surrounded by furnaces filled with ignited firewood of *Khādira* etc.
- After anointing the body with oil, the patient is being instructed to lie down on the bed till he gets the symptoms of proper fomentation.

Cakrapāṇi:

अनत्युत्सेधविस्तारामिति स्वल्पप्रमाणोच्छ्रायविस्ताराम्।- '*Anatyutsedha-Vistārāṃ*' refers to the cottage should be small. That means it is not having so much height and width.

अलोचनां निर्जालकाम्। - '*Alocanāṃ*' means which is devoid of windows.



Kuṭī Sveda

कुष्ठाद्यैरिति अत्रादिशब्दः प्रकारवचनः, तेनोष्णसुगन्धिद्रव्यैरिति भवति।- Here the word '*Kuṣṭha-Ādi*' refers to the drugs such as *Kuṣṭha* and the other aromatic ones which are hot in potency.

हसन्तिका अङ्गारधानि(रि)का, परिवार्येति हसन्तिकाभिरित्यनेन संबध्यते।- *Hasantikā* means the receptacle for burning charcoal. *Parivāryeti* is related to *Hasantikā*. That means the person should be away from *Hasantikā* at least 4 feet distance while conducting sudation therapy.

तामिति उपकल्पितशय्यां कुटीम्, आरोहेदिति संबन्धः।।- '*Tām*' refers the bedstead which is arranged in the center of the cottage and it is meant for the person to be lying down to conduct sudation therapy.

Bhū Sveda [55]

य एवाश्मघनस्वेदविधिर्भूमौ स एव तु।
प्रशस्तायां निवातायां समायामुपदिश्यते॥55॥

- As the fomentation is carried out on the earth, it is called *Bhū Sveda*.
- *Bhū Sveda* is carried out similar to *Aśmaghana Sveda*. The only differentiation between these two is the place only. In *Aśmaghana Sveda* the sudation procedure is conducted on the thick stone slab, whereas *Bhū Sveda* is carried out on the earth.
- However the land selected for *Bhū Sveda* should be plain, free from stones and devoid of breeze.

Kumbhī Sveda [56-58]

कुम्भीं वातहरक्वाथपूर्णां भूमौ निखानयेत्।
अर्धभागं त्रिभागं वा शयनं तत्र चोपरि॥56॥
स्थापयेदासनं वाऽपि नातिसान्द्रपरिच्छदम्।
अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुडान्॥57॥
पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम्।
सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः॥58॥

- As the fomentation is carried out by means of pitcher or earthenware it is called *Kumbhī Sveda*.
- Collect the *Vātahara* drugs mentioned earlier and put them in a pot and prepare the decoction as per the procedure, by covering the pot with a lid.
- Then bury the pitcher in the earth up to 1/3rd or 1/2 of the part.

- Afterwards arrange a bed over the pitcher, which is covered with a cloth on all four sides.
- After massaging the body, instruct the patient to lie down on the bed.
- Then red-hot iron balls or stones should be dropped slowly into the pitcher.
- So that the person gets fomented with the vapor thus coming out from the pitcher.



Kumbhī Sveda

Cakrapāṇi:

शयनं तत्र चोपरीति अत्र कुम्भीकोपरि शयनं खट्वादि तथा कर्तव्यं यथा कुम्भीका न भज्यते।- The cot should be arranged above the earthenware carefully so as that it should not breakdown.

तत्स्थ इति यथोक्तशयनासनस्थ:।।- *Tasya* refers to the bedstead which is meant for the person to sit or lie down.

Kūpa Sveda [59-60]

कूपं शयनविस्तारं द्विगुणं चापि वेधतः।
देशे निवाते शस्ते च कुर्यादन्तःसुमार्जितम्॥59॥
हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते।
स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम्॥60॥

- Literally *Kūpa* means well. The process of conducting fomentation by means of a well-shaped trench is known as *Kūpa Sveda.*
- Dig a square shaped pit having the measurement of the width of the bed and with double the depth at an appropriate place which is devoid of breeze. The trench should be neat and clean.
- Then put the fire wood of *Vātahara* drugs into it or the dried excreta of cow, horse, elephant, donkey, camel etc. and ignite it.
- After the smoke is removed arrange a bed on it and instruct the patient to lie down, who is already anointed, so that he will get fomented.

Kūpa Sveda

Cakrapāṇi:

कूपमिति कूपमिव कूपं गभीरत्वेन।- *Kūpa* means the trench which is useful for *Kūpa Sveda* appears as well and so deep.

द्विगुणमिति विस्ताराद्वोद्धव्यम्। वेधत इत्यधःखननप्रमाणेन।- *Dviguṇa* means the depth should be twice more than its diameter.

सुसंस्तीर्ण इति सुष्ठु संस्तीर्णे आच्छादिते, शय्यया खट्वोपरिस्थितया आच्छादिते कूपे इति बोद्धव्यम्।।- While conducting sudation therapy the bedstead should be spread with a thick bed sheet and then instruct the patient to lie down comfortably. Afterwards the patient again covered with another piece of cloth.

Holāka Sveda [61-63]

धीतीकां तु करीषाणां यथोक्तानां प्रदीपयेत्।
शयनान्तःप्रमाणेन शय्यामुपरि तत्र च॥61॥
सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्।
स्ववच्छन्नः स्वपंस्तत्राभ्यक्तः स्विद्यति ना सुखम्॥62॥
होलाकस्वेद इत्येष सुखः प्रोक्तो महर्षिणा।

- Dig a rectangular shaped trench having much width and less depth.
- Fill it with the dried dung of elephants, horses, cows, asses, camels etc. and ignite it.
- When it is well burnt and becomes smokeless, arrange a cot above the pit.
- After properly anointing with suitable oils, instruct the patient to lie down on the bed and get fomentation comfortably.
- This is known as *Holāka Sveda* and is described by great sages.



Holāka Sveda

Cakrapāṇi:

धीतीकामित्यादिना होलाकस्वेदः।- In the present verse the author has presented the procedure of *Holāka Sveda* by starting with the word '*Dhītīkā*'.

धीतीका शुष्कगोमयादिकृतोऽग्न्याश्रयविशेषः।- '*Dhītīkā*' is the fireplace where can put dried cow dung etc.

यथोक्तानामिति पूर्वोक्तहस्त्यश्वादिकरीषाणाम्।- *Yathoktānām* means the dung of hourse, horse etc. which were mentioned earlier.

शयनान्तःप्रमाणेन धीतीकां कुर्यात् इत्यस्याहार्थे योज्यम्।- The measurement of *Dhītīkā* should be equivalent to the size of a person when he is lie down.

यथोक्तमिति नातिघनप्रावरणम्।- The cloth which is covered over the body of a person during sudation therapy should not be too thick.

इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः॥63॥

The above described 13 types *Sveda* comes under the category of *Agni Sveda.*

Cakrapāṇi:

उपसंहरति- इतीत्यादि। साक्षादग्नेर्गुणमुपलब्धस्य स्वेदयतीत्यग्निगुणसंश्रयः।।- The author has concluded thermal sudation therapies (i.e. which are being conducted by direct heat) by starting the verse with the word '*Iti*'.

10 Types of Niragni Sveda [64]

व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा।
बहुपानं भयक्रोधावुपनाहाहवातपाः॥64॥
स्वेदयन्ति दशैतानि नरमग्निगुणादृते।

The following are the 10 types of *Niragni Sveda.* That means the methods of fomentation without the involvement of direct fire.

- *Vyāyāma* (exercises).
- *Uṣṇa Sadana* (residing in warm chamber).
- *Guru Prāvaraṇa* (covering with thick cloths).
- *Kṣudhā Nigrahaṇa* (suppression of

hunger).

- *Bahupāna* (excessive intake of alcoholic beverages).
- *Bhaya* (due to fear).
- *Krodha* (due to anger).
- *Upanāha* (application of poultice).
- *Āhava* (wrestling).
- *Ātapa* (due to exposing to sunlight).



10 Types of Niragni Sveda

Cakrapāṇi:

संप्रत्यनग्निस्वेदानाह- व्यायाम इत्यादि।- Now the author is going to present non-thermal sudation techniques by starting the verse with the word '*Vyāyāma*'.

उष्णसदनमिति अग्निसन्तापव्यतिरेकेण निर्जालकतया घनभित्तितया च यद्गृहं स्वेदयति तद्बोद्धव्यम्।- '*Uṣṇa-Sadana*' is a room where sudation therapy is to be conducted without contact of direct fire and which is having thick walls, devoid of windows.

बहुपानमिति बहुमद्यपानम्।- *Bahupānam* means excessive drinking of alcoholic beverages.

उपनाहो द्विविधः- साग्निरनग्निश्च; तत्र यः साग्निरुपनाहः स सङ्कर एव बोद्धव्यः, यदुक्तं- "कोलं कुलत्थाः सुरदारुरास्नाः" (सू.अ.3) इत्यादिनाऽऽरग्वधीये; यस्त्वनग्निर्बहलत्वेन शरीरोष्मरोधं कृत्वा स्वेदयति स इह बोद्धव्यः।- *Upanāha* is of 2 types viz. *Sāgni* (thermal type) and *Niragni* (non-thermal type).

There *Saṅkara Sveda* should be considered as the thermal type of *Upanāha* as it is mentioned in the 3rd chapter of *Sūtrasthāna*, *Aragvadhīya Adhyāya*. In case of *Niragni* type of *Upanāha*, the individual gets perspiration due the obstruction of body temperature to radiate.

आतपश्च यद्यप्युष्णः, तथाऽप्यग्निकृतं तस्योष्णत्वं न भवतीत्यनग्निस्वेद उक्तः।- Though exposing to sun is happens in *Ātapa Sveda*, it can be counted under the group of non-thermal type of sudation therapies because of the involvement of fire is not seen in this case.

अग्निगुणादृते इति साक्षादग्निसंबन्धेन कृतादुष्णत्वाद्विना।- '*Agniguṇādṛte*' means conduction of sudation therapy without the involvement of direct heat.

Classification of Sveda [65-66]

इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च॥65॥
एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च।
इत्येतत्त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्तितम्॥66॥

There are 3 pairs of *Sveda* are described basing on three different types of classification:

1. Basing on the involvement of *Agni*, it is of 2 types viz.
   - *Agni Sveda* (thermal sudation) and
   - *Niragni Sveda* (non-thermal sudation).
2. Basing on the sight of application, it is of 2 types viz.
   - *Ekāṅga Sveda* (local) and.
   - *Sarvāṅga Sveda* (general).

3. Basing on the consistency of the drug
   - *Snigdha Sveda* (moist) and.
   - *Rūkṣa Sveda* (dry).

Dvandva Sveda
- Sāgni Sveda / Niragni Sveda
- Ekāṅga Sveda / Sarvāṅga Sveda
- Snigdha Sveda / Rūkṣa Sveda

Cakrapāṇi:

सर्वस्वेदमुपसंहरति- इत्युक्त इत्यादि।- Beginning the verse with the word '*Itukto*', the author has explained the all the types of *Sveda* in brief.

एकाङ्गगताः सङ्करनाड्यादयः, सर्वाङ्गगताः प्रस्तरजेन्ताकादयः।- The examples for *Ekāṅga Sveda* are *Saṅkara Sveda*, *Nāḍī Sveda* etc. Similarly *Prastara Sveda* and *Jentāka Sveda* etc. are the examples for *Sarvāṅga Sveda*.

स्निग्धो वातविहितः स्वेदः। रूक्षः कफविहितः।- *Snigdha Sveda* is meant for the management of *Vāta* disorders and *Rūkṣa Sveda* is indicated for the management of *Kapha* disorders.

स्निग्धरूक्षस्तु वातश्लेष्मविहितोऽनयोर्न भिद्यत इति पृथङ्नोक्तः।- *Snigdha-Rūkṣa Sveda* is useful for the management of *Vāta-kapha* disorders and which is not different with the above mentioned *Snigdha* and *Rūkṣa*. Hence it is not mentioned separately.

द्वन्द्वं परस्परं विरुद्धं युग्मम्।- *Dvandvaṃ* means mutually antagonistic pairs.

Regimen for Sudation [67]

स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्याशनो भवेत्।
तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः॥67॥

- After oleation therapy the person should be administered sudation therapy.
- After the proper sudation he should be given wholesome diet.
- On the day of sudation, the individual should be abstained from doing exercises.

शृङ्गग्राहकन्याय

Śṛṅgagrāhaka Nyāya
(Maxim of Seizing Ox by its Horns)

The word '*Śṛṅga*' means horns. *Grāhaka* means to hold. In general, when it is necessary to get control over a bull, the best way is to hold it, by its horns only. Hence, '*Śṛṅgagrāhaka*' means to get control over a particular thing or subject by holding a part of it to gain its entirety.

To understand the wholesome diet to be prescribed after sudation therapy this *Nyāya* is mentioned by the commentator. '*Pathyāśinobhavet*' means after sudation therapy that person should to be given wholesome diet. Though the wholesome diet is not mentioned separately one should be able to know the useful diet for the persons who had undergone sudation therapy with the help of *Śṛṅgagrāhaka Nyāya* (Ca. Sū. 14/67).

Cakrapāṇi:

स्विन्नेन यथा कर्तव्यं तदाह- स्निग्ध इत्यादि।- Whatever food and regimen is prescribed for oleation therapy, the same regimen holds good in case of sudation therapy also.

पथ्याशनो भवेदित्यत्र यद्यपि शृङ्गग्राहिकया पथ्यं नोक्तं, तथाऽपि स्वेदप्रवृत्तिविषयदोषस्य यत् पथ्यं तदेव बोद्धव्यम्।।- '*Pathyāśano bhavet*' means the person who had undergone sudation therapy should be taken wholesome diet. Though the wholesome diet is not mentioned separately one should be able to know the useful diet for the persons who had undergone sudation therapy by means of '*Śṛṅga-grāhaka Nyāya*'

To Sum Up [68-71]

तत्र श्लोका:-

स्वेदो यथा कार्यकरो हितो येभ्यश्च यद्विध:।
यत्र देशे यथा योग्यो देशो रक्ष्यश्च यो यथा॥68॥
स्विन्नातिस्विन्नरूपाणि तथाऽतिस्विन्नभेषजम्।
अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना॥69॥
त्रयोदशविधः स्वेदो विना दशविधोऽग्निना।
संग्रहेण च षट् स्वेदाः स्वेदाध्याये निदर्शिताः॥70॥
स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा।
शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुः॥71॥

In the present chapter the author has presented - The procedure for effective administration of *Sveda* - Advantages of *Sveda* - Three types of sudation therapy - Protection of certain body parts during sudation therapy - Signs & Symptoms of proper sudation and excessive sudation therapy & its management - Contraindications for *Svedakarma* - Indications for *Svedakarma* - Drugs useful for different types of *Sveda* - 13 Types of *Agni Sveda* - 10 Types of *Niragni Sveda* - Classification of 3 pairs of *Sveda*.

Cakrapāṇi:

संग्रहे स्वेदो यथा कार्यकर इति स्नेहपूर्वं प्रयुक्तेनेत्यादि।- *Sveda Karma* is to be done based on how it should be beneficial to the client. That means *Sneha karma* should be done before going to proceed for *Svedakarma* as mentioned in the scriptures.

येभ्यश्च यद्विध इति वाते स्निग्ध इत्यादि संगृह्णाति।- '*Yebhyaśca Yadvidhaḥ*' should be understood that whichever is useful to whom, such as *Snigdha Sveda* for *Vāta* disorders etc.

यत्र देशे यथा योग्य इति आमाशयगते वाते रूक्षपूर्व इत्यादि। शेषं सुगमम्।।- '*Yatra deśe yathā yogya*' i.e. in case of *Vāta* resides in *Āmāśaya; Rūkṣa Sveda* should be conducted initially and then go for *Snigdha Sveda.*

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने स्वेदाध्यायो नाम चतुर्दशोऽध्यायः॥14॥

Thus ends the fourteenth chapter of *Ślokasthāna* entitled *Svedādhyāya* which was composed by *Agniveśa* and redacted by *Caraka.*

***

15 CHAPTER

Upakalpanīya Adhyāya

उपकल्पनीयमध्यायं

Necessity for Storage of Drugs 478
Query by Agniveśa 479
Reply by Ātreya 479
Brief Description of Required Equipment & Instruments for Śodhana Therapy 482
Nursing Staff and Other General Requirements of a Hospital 483
Pūrvakarma 486
Vamana Karma 486
Dosage of Emetic Drug 487
Symptoms According to the Drug Action 487
Position of the Patient during Emesis 488
Signs & Symptoms of Proper, Insufficient and Excessive Conduction of Emesis 489
Complications of emetic therapy (Upadrava) 490
Post-operative Care 491
Saṃsarjana-Krama 492
Virecana Karma 493
Purificatory Therapies for the Poor 495
Advantages of Purificatory Therapies 495
To Sum Up 495

Chapter 15

Upakalpanīya Adhyāya

उपकल्पनीयमध्यायं

अथात उपकल्पनीयमध्यायं व्याख्यास्यामः॥1॥
इति ह स्माह भगवानात्रेयः॥2॥

After *Svedādhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Upakalpanīya Adhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

स्नेहस्वेदोपपन्नस्य संशोधनमनन्तरमित्यनेनैवोक्तात् संबन्धात् स्वेदाध्यायानन्तरं शोधनविधेरभिधायकमुपकल्पनीयमाह।- After oleation (*Sneha*) and sudation (*Sveda*) therapies one has to conduct purificatory therapies (*Saṃśodhana*). Keeping this fact in view after describing sudation therapy the author has presented the details of purificatory measures in the present chapter entitled *Upakalpanīya Adhyāya*.

उपकल्पनीयमिति शोधनोपकल्पनामधिकृत्य कृतोऽध्याय उपकल्पनीयः।।- *Upakalpanīya* means to be prepared. As the present chapter is meant for the details of the preparation of purificatory measures, the chapter is so named as *Upakalpanīya Adhyāya*.

Necessity for Storage of Drugs [3]

इह खलु राजानं राजमात्रमन्यं वा विपुलद्रव्यं वमनं विरेचनं वा पाययितुकामेन भिषजा प्रागेवौषधपानात् संभारा उपकल्पनीया भवन्ति सम्यक्चैव हि गच्छत्यौषधे प्रतिभोगार्थाः, व्यापन्ने चौषधे व्यापदः परिसंख्या प्रतीकारार्थाः; न हि सन्निकृष्टे काले प्रादुर्भूतायामापदि सत्यपि क्रयाक्रये सुकरमाशु संभरणमौषधानां यथावदिति॥3॥

The physician wishing for conducting *Vamana*, *Virecana* and other therapeutic procedures to the kings or royal authorities and those who are having great wealth; he should procure all the drugs and the equipment sufficiently before starting these therapies.

The advantages of storing medicine more than the sufficient quantity are as mentioned under:

- If the therapy is successfully carried out within the quantity of the assessed drug, the remaining medicine will be useful for another therapeutic procedure.
- If something went wrong during the course of treatment, the remaining drug will be useful for the management of complications.
- In an emergency, do at times it is not possible to get the required medicine from the market. Hence it is very much essential for being stored all the required drugs as well as antidotes before commencing the treatment.

Cakrapāṇi:

राज्ञ इव मात्रा परिच्छदो यस्य स राजमात्रः।- '*Rājamātra*' means one who claims the title of king or enjoys royal authority.

विपुलद्रव्यस्तु वणिगादिः।- '*Vipuladravya*' means those who are having great wealth such as business people.

परिसंख्यायेति ज्ञात्वा।- '*Parisaṅkhyāya*' means by knowing.

क्रयः पण्यम्, आक्रयो मूल्यम्।- '*Kraya*' means *Paṇyam* i.e. the bazar. '*Ākraya*' means rate or the cost.

Query by Agniveśa [4]

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच- ननु भगवन्! आदावेव ज्ञानवता तथा प्रतिविधातव्यं यथा प्रतिविहिते सिध्येदेवौषधमेकान्तेन, सम्यक्प्रयोगनिमित्ता हि सर्वकर्मणां सिद्धिरिष्टा, व्यापच्चासम्यक्प्रयोगनिमित्ता; अथ सम्यगसम्यक् च समारब्धं कर्म सिद्ध्यति व्यापद्यते वाऽनियमेन, तुल्यं भवति ज्ञानमज्ञानेनेति॥4॥

By hearing *Ātreya's* above explanation, *Agniveśa* has put his doubt before his teacher for clarification.

O Lord! It has been told by you in the beginning itself that the therapies conducted by the learned physicians by considering all the factors carefully shall be successful in their endeavors. Success and failure depends on the proper and improper conduction of therapies.

If the physician is efficient in assessing the result by means of proper conduction of therapies, what is the necessity of storing the medicines in advance?

Cakrapāṇi:

अनियमेनेति सम्यगारब्धं सिध्यति व्यापद्यते च।- *Aniyama* means uncertainty. That means the proper and improper administration of both these therapies do at times gives positive results and at times negative results.

Reply by Ātreya [5]

तमुवाच भगवानात्रेयः- शक्यं तथा प्रतिविधातुमस्माभिरस्मद्विधैर्वाऽप्यग्निवेश! यथा प्रतिविहिते सिध्येदेवौषधमेकान्तेन, तच्च प्रयोगसौष्ठवमुपदेष्टुं यथावत्; नहि कश्चिदस्ति य एतदेवमुपदिष्टमुपधारयितुमुत्सहेत, उपधार्य वा तथा प्रतिपत्तुं प्रयोक्तुं वा; सूक्ष्माणि हि दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्थान्तराणि, यान्यनुचिन्त्यमानानि विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्युः किं पुनरल्पबुद्धेः; तस्मादुभयमेतद्यथावदुपदेक्ष्यामः- सम्यक्प्रयोगं चौषधानां, व्यापन्नानां च व्यापत्साधनानि सिद्धिषूत्तरकालम्॥5॥

O *Agniveśa*! Hear me what I say. "We and the others like us only can give infallible and effective treatment. It is also known

us for giving proper instructions in administration of therapy." But how many are there who would fully comprehend the scriptural instructions and even after comprehension would act accordingly?

Moreover it is not easy to make them understand the variations in the *Doṣa*, *Bheṣaja*, *Deśa*, *Kāla*, *Bala*, *Śarīra*, *Āhāra*, *Sātmya*, *Sattva*, *Prakṛti* and *Vaya* because of their subtlety even by the intelligent. In such case what can you say about the low intellectuals? That means it is very difficult to understand all these variations by the mediocre physicians.

Hence for the sake of less intelligentsia, the proper administration of therapies and the management methods of their complications are going to be described in the *Siddhisthāna* of this treatise.

Cakrapāṇi:

प्रयोगसौष्ठवं प्रयोगसुष्ठुत्वं, यथावदुपदेष्टुं शक्यमस्माभिरस्मद्विधैर्वेति योजना। एतदिति प्रयोगसौष्ठवम्।- *Prayoga-sauṣṭhava* means excellence in practice. To give Proper and intelligible instructions for excellence of medicament can only be possible by the well versed persons like *Ātreya* and other sages only.

एवमिति यथावद्।- *Evaṃ* means appropriately.

उपधारयितुमिति ग्रन्थेन धारयितुम्।- '*Upadhārayitum*' means learning and retaining the scriptural knowledge.

प्रतिपत्तुमिति अर्थतो ग्रहीतुम्।- *Pratipattum* refers to understanding exact the meaning.

सूक्ष्माणीत्यादि सूक्ष्माणीव सूक्ष्माणि दुर्बोधत्वेन; तत्र दोषस्यावस्थान्तराणि- क्षयस्तथा वृद्धिस्तथा समत्वं, एवमूर्ध्वदेहगमनं तथाऽधोदेहगमनं तिर्यग्गमनं वा, तथा शाखाश्रयित्वं कोष्ठाश्रयित्वं मध्यमार्गाश्रयित्वं, तथा स्वदेशगमनं परदेशगमनं, तथा स्वतन्त्रत्वं परतन्त्रत्वं, तथांऽशांशविकल्पः, तथा धातुविशेषाश्रयित्वं, तथा कालप्रकृतिदूष्यानुगुणत्वादिकृत्स्नतन्त्रप्रतिपादितानि ज्ञेयानि;- *Sūkṣmāṇi* refers to minute variations in various aspects like *Doṣa*, *Bheṣaja* etc. It is very difficult to understand the subtlety of these differences.

Variations in Doṣās:

- *Kṣaya* (diminution), *Vṛddhi* (aggravation) and *Samatva* (normalcy).
- *Ūrdhva gamana* (upward movement), *Adho-gamana* (downward movement) and *Tiryak- gamana* (oblique movement).
- *Śākhāśrita* (external pathway i.e. *Śakha*), *Koṣṭhāśrita* (internal pathway i.e. *Koṣṭha*) and *Madhya-mārgāśrita* (middle pathway i.e. *Marma*, *Asthisandhi*).
- *Svadeśa gamana* (moving in its own place) and *Paradeśa gamana* (moving towards the place of other *Doṣās*).
- *Svatantra* (independent i.e. primary) and *Paratantra* (dependent i.e. secondary).
- *Aṃśāṃśa-vikalpana* (fractional variations).
- *Dhātu Viśeṣa āśrayitvaṃ* (location of specific *Dhātūs*).
- *Kāla-prakṛti-dūṣya anuguṇa* (changes in respect of time, body constitution and *Dūṣya* etc. described throughout the text).

एवं भेषजस्यावस्थान्तराणि- तरुणत्वं, वृद्धत्वम्, आर्द्रत्वं, शुष्कत्वं, द्रव्यान्तरसंयुक्तत्वं, स्वरसादिकल्पनायोगित्वं, रसवीर्यविपाकैः प्रभावैश्च तस्मिन् देहे दोषादौ तत्तत्कार्यकर्तृत्वमेवमादीनि;

Variations in Bheṣaja:

- *Taruṇa* (freshly collected) and *Vṛddha* (old).
- *Ārdra* (wet or fresh) and *Śuṣka* (dry).
- *Dravyāntara saṃyuktaṃ* (combining with other drugs).
- *Svarasādi Kalpanā yogitvaṃ* (ability to prepare various forms like *Svarasa* etc.).
- *Rasa vīrya vipākaiḥ prabhāvaiśca tasmin dehae Doṣādau tattat kārya kartṛtvamevamādīni* (ability to act according to *Rasa*, *Vīrya*, *Vipāka*, *Prabhāva* etc. on different *Doṣās* and *Dhātūs* in the body).

देशस्त्वानूपजाङ्गलसाधारणप्रशस्तादिभेदभिन्नः;

Variations in Deśa:

- *Deśa Bheda* means such as *Ānūpa* (marshy), *Jāṅgala* (arid), *Sādhāraṇa* (ordinary) and *Praśasta* (most suitable).

कालावस्थान्तराणि तु ऋतुभेदाः, पूर्वाह्णादिश्च तथा व्याध्यवस्था ज्वराष्टाहादय इत्येवमादीनि;

Variations in Kāla:

- *Ṛtu Bheda* (seasonal variations).
- *Pūrvāhṇādi* (morning, afternoon etc.).
- *Vyādhyavasthā Kāla* (according to disease condition such as the period of 8 days in *Jvara*).

Variations in Bala:

बलं तु सहजं युक्तिकृतं तथा कालकृतमुत्कृष्टापकृष्टमध्यादिभेदभिन्नं;

- *Sahaja* (natural), *Yuktikṛta* (acquired) and *Kālakṛta* (imparted by season).
- *Utkṛṣṭa Bala* (maximum strength), *Alpa bala* (minimum strength) and *Madhyama bala* (medium strength).

शरीरं तु स्थूलत्वकृशत्वसारवत्त्वनिःसारवत्त्वादि, तथा परिपालनीयदृष्टिमर्माद्यवयवविशेषादिभिश्च भिन्नम्;

Variations in Śārīra:

- *Sthūla* (obese) and *Kṛśa* (lean).
- *Sāra* (firm) and *Niḥsāra* (infirm).
- *Marma Ādi Avayava Viśeṣa* (vital organs such as eyes, heart and testicles etc. should be specifically protected while conducting certain therapies).

Variations in Āhāra:

आहारस्तु प्रकृतिकरणसंयोगराशिभेदादिभिर्भिन्नः;- Food also varies from *Prakṛti*, *Karaṇa*, *Saṃyoga*, *Rāśi* etc.

Variations in Sātmya:

सात्म्यं तु देशतः कालतो व्याधितः प्रकृतितः स्वभावतोऽभ्यासतश्च भिन्नं भवति;- *Sātmya* also varies from *Deśa* (habitat), *Kāla* (time), *Vyādhi* (disease), *Prakṛti* (constitution), *Svabhāva* (nature) and *Abhyāsa* (practice).

Variations in Sattva:

सत्त्वं तु भयशौर्यविषादहर्षादियोगभिन्नं भवति;- *Sattva* also varies from *Bhaya* (fear), *Śaurya* (bravery), *Viṣāda* (depression) and *Harṣa* (pleasure) etc.

Variations in Prakṛti:

प्रकृतिभेदास्त्वनेकप्रकारभिन्नवाताद्यारब्धत्वेन बोद्धव्याः;- The body constitution (*Prakṛti*) is also varies according to *Vāta* etc.

Variations in Vaya:

वयोभेदास्तु बाल्ययौवनवार्धक्यतदवान्तरभेदाः;- The age (*Vaya*) also varies according to *Bālya* (childhood), *Yauvana* (middle age) and *Vārdhakya* (old age) and also their sub divisions.

एतानि दोषाद्यवस्थान्तराणि चिकित्साप्रयोगे यथायथाऽपेक्ष्यन्ते, तदुदाहरणं शास्त्रेऽनुसरणीयम्, इह लिख्यमानं तु विस्तरत्वं ग्रन्थस्याबहतीति नोक्तम्।- Knowledge of these aspects is very much essential to plan and administer therapies properly. Only a few examples are quoted here for the fear of expansion of the treatise.

उभयमेतदुत्तरकालं सिद्धिषूपदेक्ष्याम इति योजना।।- The two aspects such as administration of proper application and the complications arise due to improper application of these therapies have been described later on in the *Siddhisthāna* of this treatise.

Brief Description of Required Equipment & Instruments for Śodhana Therapy [6]

इदानीं तावत् संभारान् विविधानपि समासेनोपदेक्ष्यामः; तद्यथा- दृढं निवातं प्रवातैकदेशं सुखप्रविचारमनुपत्यकं धूमातपजलरजसामनभिगमनीयमनिष्टानां च शब्दस्पर्शरसरूपगन्धानां सोदपानोदूखलमुसलवर्चःस्थानस्नानभूमिमहानसं वास्तुविद्याकुशलः प्रशस्तं गृहमेव तावत् पूर्वमुपकल्पयेत्॥6॥

Now the brief description about the requirements of *Śodhana* therapy is going to be presented.

Construction of Hospital Building:

- For conducting *Pañcakarma* therapies methodically, a good hospital building designed by an expert architect should be constructed.
- The land selected for construction ought to be plain and should not be located nearby mountains or skyscrapers.
- The building should be strong, adequately ventilated, having spacious and separate rooms for carrying out different therapies.
- The building is free from undesirable sound, contacts, sight, tastes and smell.
- The building should be well equipped with water facilities along with vessels, mortar and pestle, kitchen and bath rooms.
- By the above description it is clear that the hospital building should be constructed in such way, which is well equipped, sophisticated and having adequate facilities for conducting all the procedures systematically by having separate treatment rooms both for male and female.

Cakrapāṇi:

विविधानपीति अपिशब्दः समासेनापीत्येवंरूपो ज्ञेयः; तेन गृहादयोऽपि विस्तरेणोच्यन्ते, संग्रहणीयादयश्च समासेनेति द्वयमपि सुस्थं स्यात्; यदि वा 'द्विविधानपि' इति पाठः, तेन भोगार्थानि तथा व्यापत्साधनानि गृह्यन्ते।- Here the usage of the word '*Api*' is directly connected to '*Vividhān*', but it is also should be linked to '*Samāsena*' and understood the intension of the author as mentioned under.

Though the entire description is in brief, yet all the material should be understood properly. The procured material should be preserved at the appropriate place.

The other reading such as '*Dvividhān api*' is also available in some manuscripts. It should be understood as two types of material viz. the first one useful for routine therapies and the second one is useful for the management of complications.

अनुपत्यकं यद् विदूरमन्यस्य महतो गृहस्य।- '*Anupatyakam*' means the building selected for hospital should be far away from the skyscrapers for adequate ventilation.

उदकं पीयते येन तदुदपानम्।।- '*Udapāna*' means that it is the vessel useful for drinking water.

Nursing Staff and Other General Requirements of a Hospital [7]

ततः शीलशौचाचारानुरागदाक्ष्यप्रादक्षिण्योपपन्नानुपचारकुशलान् सर्वकर्मसु पर्यवदातान् सूपौदनपाचकस्नापकसंवाहकोत्थापकसंवेशकौषधपेषकांश्च परिचारकान् सर्वकर्मस्वप्रतिकूलान्, तथा गीतवादित्रोल्लापकश्लोकगाथाख्यायिकेतिहासपुराणकुशलानभिप्रायज्ञाननुमतांश्च देशकालविदः पारिषद्यांश्च,

Nursing staff:

- After constructing the hospital building, good nursing staff proficient in various events such as *Pācak* (chef) for cooking soup, gruel etc., *Snāpak* (helps in bathing the patient), *Saṃvāhak* (masseur), *Utthāpak* (helps in lifting the patient), *Saṃveśak* (helps in seating the patient), *Auṣadhapeṣak* (helps in grinding drugs), *Stotrapāṭhak* (who recites spiritual hymns), musicians etc. are to be appointed.
- They are also well versed in reciting verses, ancient tradition and able to tell mythological stories.
- They also should be in a position to grasp the inner desires of the patients and also having the knowledge of time and place.
- They should be endowed with good conduct and character, cleanliness, devotion, skillfulness and sympathetic.



तथा लावकपिञ्जलशशहरिणैणकालपुच्छकमृगमातृकोरभ्रान्, गां दोग्ध्रीं शीलवतीमनातुरां जीवद्वत्सां सुप्रतिविहिततृणशरणपानीयां, पात्र्याचमनीयोदकोष्ठमणिकघटपिठरपर्योगकुम्भीकुम्भकुण्डशरावदर्वीकटोदञ्चनपरिपचनमन्थानचर्मचेलसूत्रकार्पासोर्णादीनि च, शयनासनादीनि चोपन्यस्तभृङ्गारप्रतिग्रहाणि सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानानि सोपाश्रयाणि संवेशनोपवेशनस्नेहस्वेदाभ्यङ्गप्रदेहपरिषेकानुलेपनवमनविरेचनास्थापनानुवासनशिरोविरेचनमूत्रोच्चारकर्मणामुपचारसुखानि, सुप्रक्षालितोपधानाश्च सुश्लक्ष्णखरमध्यमा दृषदः, शस्त्राणि चोपकरणार्थानि, धूमनेत्रं च, बस्तिनेत्रं चोत्तरबस्तिकं च, कुशहस्तकं च, तुलां च, मानभाण्डं च, घृततैलवसामज्जक्षौद्रफाणितलवणेन्धनोदकमधुसीधुसुरासौवीरकतुषोदकमैरेयमेदकदधिदधिमण्डोदश्विद्धान्याम्लमूत्राणि च, तथा शालिषष्टिकमुद्गमाष-

बतिलकुलत्थबदरमृद्वीकाकाश्मर्यपरूषकाभया-मलकबिभीतकानि, नानाविधानि च स्नेहस्वेदोपकरणानि द्रव्याणि, तथैवोर्ध्वहरानुलोमिकोभयभाञ्जि, संग्रहणीयदीपनीयपाचनीयोपशमनीयवातहरादिसमाख्यातानि चौषधानि; यच्चान्यदपि किञ्चिद्व्यापदः परिसंख्याय प्रतीकारार्थमुपकरणं विद्यात्, यच्च प्रतिभोगार्थं, तत्तदुपकल्पयेत्॥7॥

Birds & Animals:

- Birds and animals such as *Lāva* (common quail), *Kapiñjala* (gray partridge), *Śaśa* (hare), *Hariṇa* (black buck), *Eṇa* (antelope), *Kālapucchaka* (black-tailed deer), *Mṛgamātṛka* (red deer), *Aurabhra* (wild sheep) and cows etc. should be reared in the hospital premises for the use of preparing soups and for milk to the patients.
- Proper arrangement should be made for their fodder, dwelling and water.



Birds & Animals

Provision for keeping vessels etc.:

- Water tubs, vessels, earthenware, pitchers, bowls, glasses, saucers, spoons, ladles, cooking pans, churner, leather, cotton, thread etc. should be procured and made provision for keeping them at an appropriate place.

Arrangements for Bedding:

- The arrangements for bedding cots, chairs, stools etc. should be provided. The bedding is well decorated with good looking designs, bed with covers and pillows for sleeping comfortably.

Arrangements for other Equipment:

- Arrangements also should be done for other equipment useful for massaging the body, fomentation, unction, effusion, anointment, emesis, purgation, enema therapies, nasal administration and elimination of urine and stools.
- There should be well cleaned grinding stones of different sizes and shapes (flat and cylindrical) with pestles, which are smooth, moderately rough and very rough.

Instruments & Other Required Material:

- Sharp and blunt instruments, *Dhūmanetra, Vastinetra, Uttaravasti netra* etc. are required.
- Other material such as broom, balance machine, measuring vessels etc. are also required.

Equipment & Instruments

Drugs Required:

- *Ghṛta, Taila, Vasā, Majjā, Kṣaudra, Phāṇita, Lavaṇa, Indhana, Udaka, Madhu, Sīdhu, Surā, Sauvīraka, Tuṣodaka, Maireya, Medaka, Dadhi, Dadhi-maṇḍa, Udasvit, Dhānyāmla* and *Mūtra* etc. are required.
- *Śāli, Ṣaṣṭika, Mudga, Māṣa, Yava, Tila, Kulattha, Badara, Mṛdvīkā, Kāśmarya, Parūṣaka, Abhayā, Āmalaka, Vibhītaka*; Different types of drugs useful for *Sneha, Sveda, Vamana, Virecana* and for both *Vamana & Virecana*; The drugs enumerated in the groups of *Saṅgrahaṇīya, Dīpanīya, Pācanīya, Upaśamanīya, Vātahara* etc. along with the antidotes also should be procured before proceeding to conduct these therapies.

Cakrapāṇi:

प्रादक्षिण्यम् आनुकूल्यम्।- *Prādakṣiṇyam* means who is respectful and obedient to the patient.

उल्लापकं स्तोत्रम्,- '*Ullāpakam*' refers to him who recite auspicious hymns.

इतिहासः अज्ञायमानकर्तृकाप्तोपदेशः।- '*Itihās*' refers to the authoritative testimonials of unknown persons.

मृगमातृका पृथूदरी हरिणः।- '*Mṛgamātṛkā*' means a type of deer with big belly.

शरणं गृहम्।- *Śaraṇam* means a house.

आचमनीयोदकोष्ठम् आचमनार्थमुदककोष्ठं, किंवा आचम्यते येन पात्रेण तदाचमनं;- *Ācamanī* means the vessel useful for sipping water during *Ācamana*.

मणिको गोलकः,- '*Maṇika*' means a big pot.

पिठ्ठरः स्थाली,- '*Piṭhara*' means a cauldron.

पर्योगः कटाहः,- '*Paryoga*' means a frying pan.

कुम्भो दृढावयवोऽल्पमुखो घटः,- '*Kumbha*' means a big pot with small mouth.

कटः तृणादिरचितमासनम्,- '*Kaṭa*' means a mat prepared with sacred grass.

उदञ्चनं पिधानशरावः,- '*Udañcana*' means a saucer useful as lid.

परिपचनं तैलपाचनिका।- '*Paripacana*' means the vessel useful for preparation of oils.

ऊर्णा गड्डुररोमाणि।- '*Ūrṇā*' means woolen thread.

सुप्रक्षालितेत्यादौ उपधानः- *Suprakṣālita Upadhāna*' means pillows and other beddings are washed properly.

शिलापुत्र इति प्रसिद्धः,- '*Śilāputra*' is familiar by its name and which means mortar and pestles.

दृषदः पाषाणपट्टकाः।- '*Dṛṣada*' means a flat grinding stone.

शस्त्राणि चोपकरणार्थानीति कुद्दालकर्तरीप्रभृतीनि।- '*Śastrāṇi*' means the accessory instruments like hoe, axe, spade, shovel, dibble, small mattock and scissors etc.

कुशहस्तकं संमार्जनी;- *Kuśahastaka* means broom. अन्ये तु आर्द्रद्रव्यपरिपचनमभिदधति।- Some others considered *Kuśahastaka* as cooking of wet material.

मानभाण्डं प्रतिमानम्।।- '*Māna-Bhāṇḍa*' means a special vessel useful to measure liquid substances.

Pūrvakarma [8]

ततस्तं पुरुषं यथोक्ताभ्यां स्नेहस्वेदाभ्यां यथार्हमुपपादयेत्, तं चेदस्मिन्नन्तरे मानसः शारीरो वा व्याधिः कश्चित्तीव्रतरः सहसाऽभ्यागच्छेत्तमेव तावदस्योपावर्तयितुं यतेत, ततस्तमुपावर्त्य तावन्तमेवैनं कालं तथाविधेनैव कर्मणोपाचरेत्॥8॥

- After procuring the required equipment and drugs, the person who is suitable for purificatory therapies should be given oleation and sudation therapies initially.
- During the course of oleation and sudation, if the person might have sudden attack of either psychic or somatic disease, immediately stop the therapy and treat the patient accordingly.
- He should be given rest for the number of days of treatment done for the ailment and then administer oleation and sudation therapies again to proceed for *Śodhana* therapy.

Cakrapāṇi:

तं चेत्यादौ अस्मिन्नन्तर इति स्नेहस्वेदकरणसमये। तावन्तमेव कालमिति यावता कालेनागतव्याधिप्रशमः कृतस्तावन्तम्।- The person who has already undergone *Sneha* and *Sveda* and is suffering from a serious disorder before *Sodhana* should be stopped and not allowed to continue the process. He should be given rest till the complete recovery. Afterwards the preoperative procedures should be started again to proceed for purificatory measures.

Vamana Karma [9]

ततस्तं पुरुषं स्नेहस्वेदोपपन्नमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतं देवताग्निद्विजगुरुवृद्धवैद्यानर्चितवन्तमिष्टे नक्षत्रतिथिकरणमुहूर्ते कारयित्वा ब्राह्मणान् स्वस्तिवाचनं प्रयुक्ताभिराशीर्भिरभिमन्त्रितां मधुमधुकसैन्धवफाणितोपहितां मदनफलकषायमात्रां पाययेत्॥9॥

- After the administration of *Sneha* and *Sveda*, the physician should observe the following:
- That the individual should not be having interrupted mind
- The diet taken in the previous night should be properly digested.
- The patient should take head bath and smeared his body with fragrant substances.
- He should wear garlands and clean & pleasant garments.
- The patient should offer prayers to deities, fire god, *Brāhmaṇis*, teachers and elders.
- Then these people are blessed the patient by way of reciting auspicious hymns.
- Afterwards the emetic drug is administered, which is being prepared by mixing *Madhu*, *Madhuka*, *Saindhava* and *Phāṇita* with the decoction of *Madanaphala*.



Cakrapāṇi:

इष्ट इति शोधनकर्तृपुरुषनक्षत्राद्यनुगुणे औषधप्रयोगार्थं विहित इत्यर्थः; यदुक्तं ज्योतिष- "पुष्यो हस्तस्तथा ज्येष्ठा रोहिणी श्रवणाश्विनी। स्वाति सौम्यं च भैषज्ये कुर्यादन्यत्र वर्जयेत्" इत्यादि।- While proceeding to start the therapies, the physician should also take into account for certain astrological considerations and see that in favor of the patient. It has been told in the scriptures that *Puṣya*, *Hastā*, *Jyeṣṭhā*, *Rohiṇī*, *Śravaṇā*, *Aśvini*, *Svāti* and *Mārgaśira* are the auspicious constellations for the administration of medicine and the rest are inauspicious.

कारयित्वेति स्वस्तिवाचनं कारयित्वा।।- '*Kārayitvā*' means after reciting auspicious hymns by the *Brāhmaṇa* the drugs should be administered.

Dosage of Emetic Drug [10]

मदनफलकषायमात्राप्रमाणं तु खलु सर्वसंशोधनमात्राप्रमाणानि च प्रतिपुरुषमपेक्षितव्यानि भवन्ति; यावद्धि यस्य संशोधनं पीतं वैकारिकदोषहरणायोपपद्यते न चातियोगायायोगाय, तावदस्य मात्राप्रमाणं वेदितव्यं भवति॥10॥

- The dosage of *Madanaphala Kaṣāya* intended for emesis is not fixed for all and it varies from person to person.
- The dosage should be decided by the action of the drug that which can be able to eliminate the vitiated *Doṣās* from the body properly and doesn't cause excessive or inadequate elimination.

Cakrapāṇi:

प्रतिपुरुषमपेक्षितव्यानीत्यनेन प्रतिपुरुषं शोधनमात्राभेदं दर्शयति।- The dosage of drugs intended for *Śodhana* therapy differs from one person to the other. Hence the same dosage cannot be administered to every patient and it should be decided by considering various factors like *Rogibala*, *Roga bala* etc.

यावद्धीत्यादि मात्राशितीयोक्तः 'यावद्ध्यस्याशनं' (सू.अ.5) इत्यादिग्रन्थव्याख्यानानुसारेण व्याख्येयम्।- Moreover the dosage of food is clearly mentioned in the 5th chapter of *Sūtrasthāna* i.e. *Mātrāśitīya* as under. Whatever is the quantity of food is digested properly and doesn't cause any inconvenience to the individual is being considered as the proper quantity. Similarly the appropriate dosage of the drug administered does relieve the ailment without causing any complications.

Symptoms According to the Drug Action [11]

पीतवन्तं तु खल्वेनं मुहूर्तमनुकाङ्क्षेत, तस्य यदा जानीयात् स्वेदप्रादुर्भावेण

दोषं प्रविलयनमापद्यमानं, लोमहर्षेण च स्थानेभ्यः प्रचलितं, कुक्षिसमाध्मापनेन च कुक्षिमनुगतं, हल्लासास्यस्त्रवणाभ्यामपि चोर्ध्वमुखीभूतम्, अथास्मै जानुसममसंबाधं सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानं सोपाश्रय-मासनमुपवेष्टुं प्रयच्छेत्, प्रतिग्रहांश्चोपचारयेत्, लालाटप्रतिग्रहे पार्श्वोपग्रहणे नाभिप्रपीडने पृष्ठोन्मर्दने चानपत्रपणीयाः सुहृदोऽनुमताः प्रयतेरन्॥11॥

- After the administration of the emetic drug the patient should be concentrated his mind on the therapeutic action only and wait for a period of at least one *Muhūrta* (48 minutes).
- Onset of perspiration indicates the liquefaction of *Doṣās*.
- Appearance of horripilation (*Lomaharṣa*) indicates the dislodging of *Doṣās* from their places of stagnation.
- Abdominal distension indicates the arrival of *Doṣās* to the stomach region.
- Nausea and salivation indicates the upward movement of *Doṣās*.
- At this juncture the patient is being instructed to sit comfortably in a knee height cushion bedding with pillow.
- Then the close friends of the patient should support in holding his forehead and flanks, pressing the abdominal region and massaging the back.

Cakrapāṇi:

अनुकांक्षेतेति परीक्षयन् धारयेत्।- '*Anukāṅkṣet*' means after the administration of the emetic drug the individual should concentrate on the therapy and try to retain the drug for a period of one *Muhūrta*.

असंबाधमिति असंकीर्णम्।- '*Asambādham*' means the bed should be large and wide.

प्रतिगृह्णन्तीति प्रतिग्रहः पतद्ग्रहाः।- '*Pratigraha*' means a vessel used for to collect the secretions from the mouth i.e. spittoon.

लाटप्रतिग्रहादय अनपत्रपणीया अलज्जाविषयाः।।- '*Lalāṭapratigrahādaya*' refers to those who support the patient in holding the forehead, flanks, to press the abdomen etc. Those persons should do all these activities without feeling shyness. (*Anapatrapaṇīyā*).

Position of the Patient during Emesis [12]

अथैनमनुशिष्यात्- विवृतोष्ठतालुकण्ठो नातिमहता व्यायामेन वेगानुदीर्णानुदीरयन् किञ्चिदवनम्य ग्रीवामूर्ध्वशरीरमुपवेगमप्रवृत्तान् प्रवर्तयन् सुपरिलिखितनखाभ्यामङ्गुलिभ्यामुत्पलकुमुदसौगन्धिकनालैर्वा कण्ठमभिस्पृशन् सुखं प्रवर्तयस्वेति, स तथाविधं कुर्यात्; ततोऽस्य वेगान् प्रतिग्रहगतानवेक्षेतावहितः, वेगविशेषदर्शनाद्धि कुशलो योगायोगातियोगविशेषानुपलभेत, वेगविशेषदर्शी पुनः कृत्यं यथार्हमवबुध्येत लक्षणेन; तस्माद्वेगानवेक्षेतावहितः॥12॥

- Afterwards instruct the patient to open his mouth wide and bent his head forward and allow the urge of vomiting without feeling too much exertion.
- To boost the urge of vomiting instruct the patient for tickling the throat with either of his own fingers or with the stalks of lotus or lily.
- The patient should follow the physician's instructions given during the therapy.

- The physician should observe the vomitus carefully and assess the symptoms.
- A wise physician can be able to identify the adequate, inadequate and excessive administration of the therapy and can manage the situation. Thus it is essential to observe the patient carefully by the physician during the course of therapy.

Cakrapāṇi:

उपवेगं वेगसमीपम्; एतेन सर्वथाऽप्रवृत्ते वेगे प्रवर्तनं निषेधयति।- '*Upavega*' refers to initiation of urge. If the proper urge is not present one should not do any attempt for its forceful expulsion.

वेगविशेषदर्शनाद्धीत्यादिग्रन्थस्य भाविनो योगायोगादीन् वेगविषयानुपलभ्य तर्कयतीत्यर्थः; किंवा, सिद्धौ वैगिकी शुद्धिरभिधातव्या "जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ" (सि.अ.1) इत्यादिना, तामनेन दर्शयति।।- '*Vega-viśeṣa-darśanāt-hi*' By these words it is suggested that a wise physician should assess the proper conduction of *Vamana* by the signs and symptoms of *Yoga*, *Ayoga* and *Atiyoga*, which explained latter. The same has explained by the author in the *Siddhisthāna* of this treatise as under. 4,6 and 8 *Vegās* are considered as *Avara*, *Madhyama* and *Pravara* *Śuddhi* of *Vamana*. By this the physician can understand the proper conduction of emetic therapy.

Signs & Symptoms of Proper, Insufficient and Excessive Conduction of Emesis [13]

तत्रामून्ययोगयोगातियोगविशेषज्ञानानि भवन्ति; तद्यथा- अप्रवृत्तिः कुतश्चित् केवलस्य वाऽप्यौषधस्य विभ्रंशो विबन्धो वेगानामयोगलक्षणानि भवन्ति; काले प्रवृत्तिरनतिमहती व्यथा यथाक्रमं दोषहरणं स्वयं चावस्थानमिति योगलक्षणानि भवन्ति, योगेन तु दोषप्रमाणविशेषेण तीक्ष्णमृदुमध्यविभागो ज्ञेयः; योगाधिक्येन तु फेनिलरक्तचन्द्रिकोपगमनमित्यतियोगलक्षणानि भवन्ति।

The following are the signs and symptoms of proper, insufficient and excessive conduction of emetic therapy.

Insufficient	Proper	Excessive
Absence of vomiting (or) occasional vomiting (*Apravṛtti*)	Appearance of vomiting urges at the appropriate time (*Kāle Pravṛtti*)	Expulsion of frothy vomiting (*Phenila*)
Expulsion of only the medicine (*Kevala Auṣadha Pravṛtti*)	Absence of too much pain (*Anati mahatī vyathā*)	Expulsion of blood in the vomiting (*Rakta*)
Expulsion of the *Doṣās* in the reverse direction (*Vibhraṃsa*)	Expulsion of *Kapha*, *Pitta* and *Vāta* in the succeeding order (*Yathākramaṃ Doṣa- haraṇaṃ*)	Expulsion of shiny particle in the vomiting material (*Candrikopagama*)
Obstruction to each bout (*Vibandha*).	Stoppage of vomiting urges naturally (*Svayaṃ ca Avasthānam*)	
	According to the quantity of expulsion of *Doṣa*, it is of 3 types viz. *Pravara*, *Mṛdu* and *Madhyama*	

Complications of emetic therapy (Upadrava)

तत्रातियोगायोगनिमित्तानिमानुपद्रवान्
विद्यात्- आध्मानं परिकर्तिका परिस्रावो
हृदयोपसरणमङ्गग्रहो जीवादानं विभ्रंशः स्तम्भः
क्लमश्चेत्युपद्रवाः॥13॥

Improper and excessive conduction of emetic therapy leads to the following complications:

- *Ādhmāna* (abdominal distension).
- *Parikartikā* (sharp shooting pain).
- *Parisrāvo* (frequent discharge / salivation).
- *Hṛdayopasaraṇa* (palpitation).
- *Aṅgagraha* (body pains).
- *Jīvādānam* (expulsion of blood i.e. haematemesis).
- *Vibhraṃśa* (perturbation).
- *Stambha* (stiffness in the body).
- *Klama* (fatigue).

Cakrapāṇi:

अप्रवृत्तिः कुतश्चिदिति सर्वस्यैवाप्रवृत्तिः; तथा केवलस्य कृत्स्नस्यशोधनीयदोषस्याप्रवृत्तिः;तथौषधस्यविभ्रंशः प्रातिलोम्येन गमनं; यथा- वमनस्याध ऊर्ध्वं च विरेचनस्य, एतदेव सिद्धावुक्तं- "अयोगः प्रातिलोम्येन नचाऽल्पं वा प्रवर्तनम्" (सि. अ.6) इति।- '*Apravṛtti*' refers to not being expelled the *Doṣās* and other vomitus material after the administration of the emetic drug. Thus it leads to adverse effect such as acting the emetic drug as purgative and vice versa. This also mentioned in the 6th chapter of *Siddhisthāna* by quoting "*Ayogaḥ*............... *Pravartanam*". That means in case of *Ayoga* the *Doṣās* will be expelled from the reverse direction or not at all being expelled or even being expelled the quantity is very little. किंवा, कुतश्चिद्धाऽप्रवृत्तिः स्तोकदोषप्रवृत्तिरित्यर्थः, तथा केवलस्य चाप्यौषधस्य प्रवृत्तिरिति योजना।- It can be also understood that expulsion of little quantity of *Doṣās* or expulsion of the ingested drug only.

यथाक्रममिति वमने प्रथमं श्लेष्मा, तदनु पित्तं, तदनु वायुः; यदुक्तं- 'क्रमात् कफः पित्तमथानिलश्च यस्यैति सम्यग्वमितः स इष्टः' (सि. अ.1) इति।- '*Yathākramam*' means the order of expulsion of *Doṣās* during emetic therapy is *Kapha* the first one followed by *Pitta* and then *Vāyu*. The same is mentioned by the author in the 1st chapter of *Siddhisthāna* while describing the proper signs of emetic therapy.

सम्यग्योगोऽपि हर्तव्यदोषस्याल्पत्वमध्यत्वोत्कृष्टत्वेन त्रिविधो भवतीति दर्शयन्नाह- योगेन त्वित्यादि।- *Samyak Yoga* is also of 3 types basing on the quantity of expulsion of *Doṣās* i.e. *Alpa*, *Madhyama* and *Utkṛṣṭa*.

तुशब्दोऽवधारणे, तेन योगेनैव यः प्रमाणविशेषोऽल्पादिस्तेन, न त्वयोगातियोगाभ्यामित्यर्थः; अयं च तीक्ष्णादियोगविभागः पेयाक्रमोत्कर्षार्थः, तथाहि वक्ष्यति सिद्धौ- "पेयां विलेपीं" (सि. अ.1.) इत्यादि।- The word '*Tu*' indicates the terms *Alpa*, *Madhyama* and *Utkṛṣṭa* are the 3 varieties of proper emetic therapy only but not taken them as *Ayoga* and *Atiyoga*.

This type of classification is also helpful to guide the duration of *Peya* and other types of specific type of diet after *Śodhana* therapy.

तत्रातियोगेत्यादौ आध्मानादयः शोधनसिद्धौ "बहुदोषस्य रूक्षस्य" (सि. अ.6) इत्यादिना ग्रन्थेन प्रपञ्चेन वक्तव्याः, अतस्तत्रैषां योगातियोगजन्यो यश्चायोगजन्यः स स्फुटो ज्ञेयः॥- It is discussed in detail about the complications arises such as *Ādhmāna* due to excessive utilization of emetic therapy (Ca. Si. 6/58). It is clearly told that these complications are arised due to vitiation of *Doṣās* in excess as well as roughness.

Post-operative Care [14-15]

योगेन तु खल्वेनं छर्दितवन्तमभिसमीक्ष्य
सुप्रक्षालितपाणिपादास्यं मुहूर्तमाश्वास्य,
स्नैहिकवैरेचनिकोपशमनीयानां
धूमानामन्यतमं सामर्थ्यतः पाययित्वा,
पुनरेवोदकमुपस्पर्शयेत्॥14॥
उपस्पृष्टोदकं चैनं निवातमागारमनुप्रवेश्य
संवेश्य चानुशिष्यात्- उच्चैर्भाष्यमत्याशनम-
तिस्थानमतिचङ्क्रमणं क्रोधशोकहिमातपा-
वश्यायातिप्रवातान् यानयानं ग्राम्यधर्ममस्वपनं
निशि दिवा स्वप्नं विरुद्धाजीर्णासात्म्याकालप्र
मितातिहीनगुरु-विषमभोजनवेगसन्धारणोदीर
णमिति भावानेतान्मनसाऽप्यसेवमानः सर्वमहो
गमयस्वेति । स तथा कुर्यात्॥15॥

- After proper conduction of emetic therapy advise the patient to wash his hands, foot and mouth and take him rest for a period of one *Muhūrta* (48 minutes).
- Then administer any one of the kinds of *Dhūmapāna* i.e. *Snaihika*, *Vairecanika* or *Upaśamanīya* according to his strength. Afterwards he has to wash his hands, foot and mouth again.
- Later on advise the patient to have rest in room which is devoid of breeze and give the following instructions to adopt strictly. He should not even think to violate any one of the instructions.
- Should not speak loudly (*Uccairbhāṣyam*).
- Should not take excessive food (*Atyaśana*).
- Should not sit or stand for a longer period (*Atisthānam*).
- Should not walk for a long distance (*Ati-caṅkramaṇam*).
- Control the emotions like anger (*Krodha*) and grief (*Śoka*).
- Should not expose to cold (*Hima*), sunlight (*Ātapa*) and strong breeze (*Ati Pravāta*).
- Avoid travelling by vehicles (*Yānāyāna*).
- Avoid sexual intercourse (*Grāmyadharma*).
- Avoid night vigilance (*Asvapnam Niśi*) and day sleep (*Divāsvapna*).
- Avoid of taking incompatible food (*Viruddhāhāra*), that are not digestible (*Ajīrṇa*) unwholesome (*Asātmya*), untimely (*Akāla*), having only one taste (*Pramitāśana*), excess in quantity (*Ati*), less in quantity (*Hīna*), heavy (*Guru*) and irregular meals (*Viṣama bhojana*).
- Avoid in suppressing and premature initiation of natural urges (*Vega Sandhāraṇa-Udīraṇa*).

Cakrapāṇi:

स्नैहिकादिधूमपानविकल्पः पुरुषप्रकृत्यपेक्षः; अत एव सामर्थ्यत इत्युक्तं, यद्यस्य युज्यत इत्यर्थः।- Different types of *Dhūmapāna* viz. *Snaihika*, *Vairecanika* and *Upaśamanīya* should be conducted after *Vamana* to the persons according to their body constitution. Hence the author has mentioned that *Dhūmapāna* is to be conducted according to the individual capacity. That means whatever type is useful to that particular individual, such *Dhūmapāna* is conducted.

अतिस्थानमिति अत्यर्थं दण्डायमानत्वेनावस्थितिः।- '*Atisthānam*' means standing for a longer period.

प्रमितभोजनम् एकरसाभ्यासः।- '*Pramitabhojana*' means continuous intake of food having only one type of taste.

अतिहीनं नष्टशक्तिकं धान्यादि।- '*Atihīnaṃ*' means the food substances which have lost their potency.

गुरुशब्देन स्वभावगुरुलड्डुकचिपिटकादेर्यथोक्तमात्रयाऽपि भोजननिषेधः।।- The word '*Guru*' refers to naturally heavy substances like *Laṭṭu*, *Cipiṭaka* (flattened rice) etc.

Saṃsarjana-Krama [16]

अथैनं सायाह्ने परे वाऽह्नि सुखोदकपरिषिक्तं पुराणानां लोहितशालितण्डुलानां स्ववक्लिन्नां मण्डपूर्वां सुखोष्णां यवागूं पाययेदग्निबलमभिसमीक्ष्य, एवं द्वितीये तृतीये चान्नकाले, चतुर्थे त्वन्नकाले तथाविधानामेव शालितण्डुलानामुत्स्विन्नां विलेपीमुष्णोदकद्वितीयामस्नेहलवणामल्प-स्नेहलवणां वा भोजयेत्, एवं पञ्चमे षष्ठे चान्नकाले, सप्तमे त्वन्नकाले तथाविधानामेव शालीनां द्विप्रसृतं सुस्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत्, एवमष्टमे नवमे चान्नकाले, दशमे त्वन्नकले लावकपिञ्जलादीनामन्यतमस्य मांसरसेनौदकलावणिकेन नातिसारवता भोजयेदुष्णोदकानुपानम्; एवमेकादशे द्वादशे चान्नकाले; अत ऊर्ध्वमन्नगुणान् क्रमेणोपभुञ्जानः सप्तरात्रेण प्रकृतिभोजनमागच्छेत्॥16॥

- Afterwards the patient is advised to take bath with hot water and give the gruel (*Yavāgū*) prepared with old red variety of rice (*Purāṇa Rakta Śāli*) in the same day evening or on the next day morning after assessing the digestive power. The gruel should be thin and having more liquid portion and comfortably hot. The same diet is to be given on the 2[nd] and 3[rd] *Anna-kāla* also.
- For the 4th *Anna-kāla*, it is suggested to give thick gruel (*Vilepī*) prepared with old red variety of rice (*Purāṇa Rakta Śāli*) either added or without added slightly salt and unctuous substances. The same diet is to be given on the 5th and 6th *Anna-kāla* also.
- For the 7[th] *Anna-kāla*, it is suggested to prepare rice (*Odana*) with 2 *Prasṛta* quantities of old red variety of rice (*Purāṇa Rakta Śāli*) and to be given with *Mudga Yūṣa* added with salt and unctuous substances. The same diet is to be given on the 8[th] and 9[th] *Anna-kāla* also.
- For the 10[th] *Anna-kāla* thin meat soup (*Māṃsarasa*) is prepared with the meat of *Lāva*, *Kapiñjala* etc. and to be given with *Śāli* Rice. Afterwards hot water should be given as postprandial drink. The same diet is to be given on the 11[th] and 12[th] *Anna-kāla* also.
- After that the diet should be increased gradually and on the 7[th] day onwards he will be given normal diet.

Cakrapāṇi:

सायाह्न इत्यादौ सम्यगग्निशुद्धिलक्षणभूते सायाह्ने, किंचित्त्वविशुद्धावपरेऽह्नि।- If the symptoms of proper digestion are noticed specific food can be given on the same day evening, otherwise diet should be given on the next day morning.

यदुक्तं सिद्धौ- "वमितं लङ्घयेत् सम्यग्जीर्णलिङ्गान्यवेक्षयन्। तानि दृष्ट्वा तु पेयादिक्रमं कुर्यान्न लङ्घनम्" (सि. अ.6) इति।- The same is also mentioned in the 6[th] chapter of *Siddhisthāna*.

मण्डपूर्वां मण्डप्रधानाम्।- '*Maṇḍapūrva*' means with more of scum.

अयं च द्वादशकालनिवर्तनीयः क्रमः प्रधानशुद्धिशुद्धे ज्ञेयः, मध्ये त्वष्टानुकालिकः, तथाऽल्पे चतुरनुकालिकः; उक्तं हि- "पेयां विलेपीं" (सि. अ.1) इत्यादि।- The regimen of diet such as 12 *Anna-kāla*, 8 *Anna-kāla* and 4 *Anna-kāla* are meant for *Pravara Śuddhi*, *Madhyama Śuddhi* and *Avara Śuddhi* respectively as mentioned in the 1st chapter of *Siddhisthāna*.

अन्नगुणान् मधुरादीन् गुरुकठिनादींश्च।- '*Annaguṇa*' refers to the different tastes of the food like sweet, sour, salt etc. and also the attributes like heaviness, lightness, hardness etc.

एतच्च संसर्जनक्रमादूर्ध्वं सप्तरात्रेण प्रकृतिभोजनगमनं तदा कर्तव्यं यदि वमनानन्तरं विरेचनं न कर्तव्यं भवति, तत्करणे तु संसर्जनक्रमादूर्ध्वमेव स्नेहपानं; यदुक्तं- "संसृष्टभक्तं नवमेऽह्नि सर्पिस्तं पाययेद्वाऽप्यनुवासयेद्वा" (सि. अ.1) इति। तथा सुश्रुतेऽप्युक्तं- "पक्षाद्विरेको वान्तस्य" (सु.चि. अ.36) इति।- After 7 days of *Saṃsarjanakrama* it is advised to take normal diet. This is indicated for the persons who are not undergoing *Virecana* after *Vamana*. Whereas the same individual is planned to conduct *Virecana* after *Vamana* he should be given *Snehapāna* on the 9[th] day as mentioned in the 1st chapter of *Siddhisthāna*. *Ācārya Suśruta* also quoted in the 36[th] chapter of *Cikitsā Sthāna* that after *Vamana*, the individual should be administered purgative drug on the 15[th] day.

यदि संसर्जनक्रमं तथाऽनुगुणाभ्यासं च कृत्वा स्नेहः क्रियते, तदा पक्षाद्विरेको वान्तस्य न स्यात्।।- If oleation is done by following *Samsarjanakrama* and practicing beneficial food, then the person is need not go for purgation after 15 days.

Virecana Karma [17]

अथैनं पुनरेव स्नेहस्वेदाभ्यामुपपाद्यानुपहतमन-समभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं कृतहोमबलिमङ्गलजपप्रायश्चित्तमिष्टे तिथिनक्षत्रकरणमुहूर्ते ब्राह्मणान् स्वस्ति वाचयित्वा त्रिवृत्कल्कमक्षमात्रं यथार्हालोडनप्रतिविनीतं पाययेत् प्रसमीक्ष्य दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्व-प्रकृतिवयसामवस्थान्तराणि विकारांश्च, सम्यक् विरिक्तं चैनं वमनोक्तेन धूमवर्जेन विधिनोपपादयेदाबलवर्णप्रकृतिलाभात्, बलवर्णोपपन्नं चैनमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतमनुरूपालङ्कारा-लङ्कृतं सुहृदां दर्शयित्वा ज्ञातीनां दर्शयेत्, अथैनं कामेष्ववसृजेत्॥17॥


Virecana

Pūrvakarma:

न सुषूयते न सहते; स्पर्शनं च न सहते, उष्णं च न सहते।- '*Na Suṣūyate*' means unable to tolerate. The person suffering from *Pittaja Śotha* cannot tolerate the touch of others as well as hotness

Kaphaja Śotha Nidāna, Samprāpti, Lakṣaṇa

गुरुमधुरशीतस्निग्धैरतिस्वप्नाव्यायामादिभिश्च श्लेष्मा प्रकुपितस्त्वङ्मांसशोणितादीन्यभिभूय शोथं जनयति; स कृच्छ्रोत्थानप्रशमो भवति, पाण्डुश्वेतावभासो गुरुः स्निग्धः श्लक्ष्णः स्थिरः स्त्यानः शुक्लाग्ररोमा स्पर्शोष्णसहश्चेति श्लेष्मशोथः (3);

Nidāna:

The following are the causative factors of *Kaphaja Śotha.*

- Excessive intake of foods and drinks having the properties such as *Guru* (heavy), *Madhura* (sweet), *Śīta* (cold) and *Snigdha* (unctuous).
- *Atinidra* (excessive sleep).
- *Avyāyāma* (lack of physical exercises).

Samprāpti:

By the above factors the *Kapha* gets aggravated and afflicts *Tvak* (skin), *Māṃsa* (muscle tissue), *Rakta* (blood) etc. and results in *Śopha*.

Lakṣaṇa:

- The swelling develops as well as disappears slowly (*Kṛcchra-Utthāna-Praśamo- Bhavati*).
- The swelling may be pale or whitish in color (*Pāṇḍu-Śvetāvabhāsa*).
- It is heavy (*Guru*), unctuous (*Snigdha*), smooth (*Ślakṣṇa*), immobile (*Sthira*) and bulky (*Styāna*).
- The color of hair on the swelling appears as whitish (*Śuklā*).
- Can tolerate touch and heat (*Sparśoṣṇa Sahaśceti*).

Cakrapāṇi:

स कृच्छ्रोत्थानप्रशम इति चिरोत्थानप्रशमः।- '*Kṛcchrottha Praśama*' means growth and subsiding of *Kaphaja Śotha* is very gradual.

Dvandaja & Sannipātaja Śotha [7]

यथास्वकारणाकृतिसंसर्गाद्द्विदोषजास्त्रयः शोथा भवन्ति; यथास्वकारणाकृतिसन्निपातात् सान्निपातिक एकः; एवं सप्तविधो भेदः॥7॥

- According to *Kāraṇa* (etiology) and *Ākṛti* (features), 3 types of *Dvidoṣaja Śotha* are formed by the combination of two-two *Doṣās* i.e. *Vāta-pittaja*, *Vāta-kaphaja* and *Pitta-kaphaja Śotha.*
- Similarly by the combination of all the three *Doṣās*, one more type i.e. *Sannipātaja Śotha* is manifested.
- Thus the total number of types of *Śotha* is of 7 types.

Classification of Śotha [8]

प्रकृतिभिस्ताभिस्ताभिर्भिद्यमानो द्विविधस्त्रिविधश्चतुर्विधः सप्तविधोऽष्टविधश्च शोथ उपलभ्यते, पुनश्चैक एवोत्सेधसामान्यात्॥8॥

Based on etiology, *Śotha* is classified in various types as mentioned under.

- *Dvividha* means 2 types i.e. *Bāhya* (exogenous) and *Ābhyantara* (endogenous) *Śotha.*
- *Trividha* means 3 types i.e. *Vātaja, Pittaja* and *Kaphaja Śotha.*
- *Caturvidha* means 4 types i.e. *Vātaja, Pittaja, Kaphaja* and *Sannipātaja Śotha.*
- *Saptavidha* means 7 types i.e. *Vātaja, Pittaja, Kaphaja, Vāta-pittaja, Vāta-kaphaja, Pitta-kaphaja* and *Sannipātaja Śotha.*
- *Aṣṭavidha* means 8 types i.e. the above 7 types of *Ābhyantara Śotha* (endogenous) plus 1 type of *Bāhya Śotha* (exogenous).
- As swelling is the common feature found in all the types of *Śotha* and hence *Śotha* can be categorized under one group only.

Śotha
- **2 Types**: Bāhya, Ābhyantara
- **3 Types**: Vātaja, Pittaja & Kaphaja
- **4 Types**: Vātaja, Pittaja, Kaphaja &Sannipātaja
- **7 Types**: Ekadoṣaja 3, Dvidoṣaja 3 & Sannipātaja 1
- **8 Types**: The above 7 + Bāhya Śotha

Cakrapāṇi:

प्रकृतिभिरिति कारणैः।- '*Prakṛtibhiḥ*' means *Kāraṇa* i.e. causative factors.

उत्सेध उन्नतत्वम्।- '*Utsedha*' means protrusion.

Vātaja Śotha Lakṣaṇa [9-10]

भवन्ति चात्र-

शूयन्ते यस्य गात्राणि स्वपन्तीव रुजन्ति च।
पीडितान्युन्नमन्त्याशु वातशोथं तमादिशेत्॥9॥
यश्चाप्यरुणवर्णाभः शोथो नक्तं प्रणश्यति।
स्नेहोष्णमर्दनाभ्यां च प्रणश्येत् स च वातिकः॥10॥

Thus it is said:

The following are the features of *Vātaja Śotha.*

- Swelling (*Śūyante*), numbness (*Svapanti iva*) and pain in the body (*Rujanti*).
- Pits on pressure and regains its normal position immediately the withdrawal of the pressure (*Pīḍitānyunnamanti āśu*).
- The swelling is reddish in color (*Aruṇa Varṇābhaḥ*).
- Swelling is relieved during nighttime (*Naktaṃ praṇaśyati*).
- Swelling is subsided by means of massaging (*Mardana*) with unctuous (*Snehana*) and hot substances (*Uṣṇa*).

Cakrapāṇi:

शूयन्त इत्यादि। पुनः श्लोकेन लक्षणाभिधानं प्रायोभाविलक्षणदर्शनार्थम्।– The author has started the verse with the word '*Śūnyatā*' to present the features of *Vātaja Śotha* etc. Mentioning of the symptoms again is probably to indicate their presence in the later stage.

स्वपन्तीवेति निर्वेदनः। एतेन वायोश्चलत्वेन क्षणाच्च रुक्, क्षणाच्च तदभाव इति ज्ञेयम्।– '*Svapanti iva*' means *Nirvedana* i.e. painlessness. As the *Vāta* possesses mobile attribute, *Vātaja Śotha* exhibits pain at one moment and painlessness in the other moment.

Pittaja Śotha Lakṣaṇa [11-12]

यः पिपासाज्वरार्तस्य दूयतेऽथ विदह्यते।
स्विद्यति क्लिद्यते गन्धी स पैत्तः स्वयथुः स्मृतः॥११॥
यः पीतनेत्रवक्त्रत्वक् पूर्वं मध्यात् प्रशूयते।
तनुत्वक् चातिसारी च पित्तशोथः स उच्यते॥१२॥

The following are the features of *Pittaja Śotha.*

- Feeling of thirst (*Pipāsā*), fever (*Jvara*), hotness (*Dūyate*) and burning sensation (*Vidahyate*).
- Sweating (*Svidyati*), moisture (*Klidyate*) and foul smelling (*Gandhī*).
- Yellowish discoloration of eyes (*Netra*), face (*Vaktra*) and skin (*Tvak*).
- Swelling commences from the middle part of the body (*Pūrvaṃ Madhyāt Praśūyate*).
- Skin becomes thin (*Tanu tvak*).
- Suffers from diarrhea (*Atīsāra*).

Cakrapāṇi:

मध्यादिति शरीरमध्यात्।– '*Madhyāt*' means *Śarīra Madhyāt* i.e. middle part of the body, the trunk.

Kaphaja Śotha Lakṣaṇa [13-14]

शीतः सक्तगतिर्यस्तु कण्डूमान् पाण्डुरेव च।
निपीडितो नोन्नमति श्वयथुः स कफात्मकः॥१३॥
यस्य शस्त्रकुशच्छिन्नाच्छोणितं न प्रवर्तते।
कृच्छ्रेण पिच्छा स्रवति स चापि कफसंभवः॥१४॥

The following are the features of *Pittaja Śotha.*

- Swelling is cold in touch (*Śīta*), non-spreading in nature (*Sakta-Gati*), itchy (*Kaṇḍūmān*) and pale in color (*Pāṇḍu*).
- Swelling doesn't regain its normal position after the withdrawal of the pressure (*Nipīḍito na Unnamati*).
- Doesn't bleed even if the swelling is incised with a sharp instrument and *Kuśa* etc. (*Śastra kuśāt chinnāt śoṇitaṃ na pravartate*).
- Presence of slimy exudation with difficulty (*Kṛcchreṇa Picchā Sravati*).

Cakrapāṇi:

सक्तगतिः अविसारी।– '*Saktagati*' means *Avisārī* i.e. it doesn't spread.

शस्त्रकुशच्छिन्नादिति शस्त्रकुशकृताच्छेदात्।।– '*Chinnāt*' means *Chhedāt* cutting off. In case of *Kaphaja Śotha*, if it is being cut by an instrument or by the sharp blade of *Kuśa* grass, it doesn't bleed.

Dvandaja and Sannipātaja Śotha Lakṣaṇa [15]

निदानाकृतिसंसर्गाच्छ्वयथुः स्याद्द्विदोषजः।
सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रहेतुजः॥१५॥

- The swelling due to combination of two *Doṣās* (*Saṃsargaja*) and all three *Doṣās* (*Sannipātaja*) can be diagnosed on the basis of etiological factors (*Nidāna*) and features (*Lakṣaṇa*).

Prognosis of Śotha [16-17]

यस्तु पादाभिनिर्वृत्तः शोथः सर्वाङ्गगो भवेत्।
जन्तोः स च सुकष्टः स्यात्
प्रसृतः स्त्रीमुखाच्च यः॥१६॥
यश्चापि गुह्यप्रभवः स्त्रिया वा पुरुषस्य वा।
स च कष्टतमो ज्ञेयो यस्य च स्युरुपद्रवाः॥१७॥

- In case of male patients if the swelling started from the feet and spread all over the body, it is difficult to manage.
- Similarly in case of female patients if the swelling started from the face and spread all over the body, it is difficult to manage.
- In case of both male and female patients if the swelling started from the patients the genital region and associated with complications, it is very difficult to cure.

Cakrapāṇi:

पादाभिनिर्वृत्तः शोथः पुरुषाणां लघावधोदेशे जातः सन् यदा न जीयते तदा गुरूमूर्ध्वदेशं गतः स न पार्यते जेतुं, यो हि लघौ प्रदेशे जेतुं न पार्यते स गुरुप्रदेशगतो नितरामेव न पार्यते; एवं प्रसृतः स्त्रीमुखाच्च य इत्यपि ज्ञेयम्। वचनं हि– "अधोभागो गुरुः स्त्रीणामूर्ध्वः पुंसां गुरुस्तथा" (सु. सू.अ.46) इति।– In case of men, the swelling originated in the lower part of the body (i.e. the feet) and spreads to the upper part of the body (i.e. the face) is difficult to manage. Similarly if the swelling is started from the face and spreads towards foot is difficult to manage in case of women.

The reason for that is the lower part of the body of male and the upper part of the body of female is lighter. The same has been mentioned in the 46th chapter of *Suśruta Saṃhitā Sūtrasthāna* that "Lower part of the female and upper part of the male is heavier" (Su. Sū. 46 / 132).

If it is unable to treat when the swelling is located in the lighter part of the body, how can it is possible to treat it when it reaches to heavier part of the body?

Upadrava of Śotha [18]

छर्दिः श्वासोऽरुचिस्तृष्णाज्वरोऽतीसारएव च।
सप्तकोऽयं सदौर्बल्यः शोफोपद्रवसंग्रहः॥१८॥

The following seven are the complications (*Upadrava*) of *Śotha.*

to *Piḍakā; Visarpa* is having spreading type nature, whereas *Piḍakās* are having stable nature. Thus the term '*Avatiṣṭhate*' is mentioned in the *Samprāpti* of *Piḍakās*.

Tilakā, Piplava, Vyaṅgā, Nīlikā [25]

यस्य प्रकुपितं पित्तं शोणितं प्राप्य शुष्यति।
तिलकापिप्लवोव्यङ्गानीलिकातस्यजायते॥25॥

➢ Whenever *Pitta* is vitiated it reaches *Rakta* and dries it up and develops *Tilakā* (black moles), *Piplava* (pimples), *Vyaṅgā* (red moles) and *Nīlikā* (blue moles).

Cakrapāṇi:

यस्य पित्तमित्यादौ पित्तं प्राप्य शोणितं कर्तृ शुष्यतीति योजनीयम्।- In the pathogenesis *of Tilakā, Piplava, Vyaṅgā* etc. it should be understood that the blood gets dried up in conjunction with *Pitta* and gives raise all these disorders.

पिप्लव: 'जटुला' इति प्रसिद्ध:।- The term '*Piplava*' is popular in the name of *Jaṭulā* i.e.

Śaṅkhaka [26]

यस्य पित्तं प्रकुपितं शङ्खयोरवतिष्ठते।
श्वयथुः शङ्खको नाम दारुणस्तस्य जायते॥26॥

➢ When *Pitta* is vitiated and localized in the temples (*Saṅkha*) and develops dreadful swelling and it is known as *Śaṅkhaka* (temporal headache).



Cakrapāṇi:

दारुण: अनुपक्रमादाशुमारक:।- '*Dāruṇa*' means it is going to become fatal if not treated.

Karṇamūla Śotha [27]

यस्य पित्तं प्रकुपितं कर्णमूलेऽवतिष्ठते।
ज्वरान्ते दुर्जयोऽन्ताय शोथस्तस्योपजायते॥27॥

➢ When *Pitta* is vitiated and localized at the root of ears (*Karṇamūla*) and develops swelling especially after fever (*Jvarānte*) and it is known as *Karṇamūla Śotha*. It is difficult to manage and may leads to death also.

Cakrapāṇi:

दुर्जयोऽन्तायेति दुर्जयो वा यथाक्रममुपक्रम्यमाण: अन्ताय वा मिथ्योपक्रमाद्वेति मन्तव्यम्। अयमेव शोथोऽन्यत्राप्युक्त:- "सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणा:। शोथ: संजायते तेन कश्चिदेव प्रमुच्यते" इति।- '*Durjayo-Antāya iti*' means *Durjaya* (difficult to manage) or *Antāya* (becomes fatal). That means *Karṇamūla Śotha* is difficult to manage even it is being treated properly. Similarly if it is not treated properly it is going to be fatal.

It is also told elsewhere that if the swelling occurs at the root of ears during the state of decrease of *Sannipāta Jvara*, the patients rarely survive.

Plīha Vṛddhi [28]

वात: प्लीहानमुद्धूय कुपितो यस्य तिष्ठति।
शनै: परितुदन् पार्श्वं प्लीहा तस्याभिवर्धते॥28॥

➢ When *Vāta* is vitiated and localized at the region of spleen (*Plīha*) and develops pain in the flanks and develops swelling gradually in the spleen and it is known as *Plīha Vṛddhi*.



Gulma [29]

यस्य वायु: प्रकुपितो गुल्मस्थानेऽवतिष्ठते।
शोफं सशूलं जनयन् गुल्मस्तस्योपजायते॥29॥

➢ When *Vāta* is vitiated and localized at the regions of *Gulma* (*Hṛdaya, Nābhi, Vasti* and *Pārśva*) and develops swelling associated with pain and it is known as *Gulma*.



Cakrapāṇi:

गुल्मादयो विस्तरवक्तव्या अपि इहोत्सेधसामान्याल्लेशत उच्यन्ते।- In spite of the detailed description of *Gulma* and other conditions are discussed in the later part of the treatise; here in the present context it is briefly mentioned because of the swelling is the common with these diseases.

Vṛddhi [30]

यस्य वायुः प्रकुपितः शोफशूलकरश्चरन्।
वङ्क्षणाद्वृषणौ याति वृद्धिस्तस्योपजायते॥३०॥

- When *Vāta* is vitiated and moves from *Vaṅkṣaṇa* (groin) to *Vṛṣaṇa* (testicles) and develops swelling associated with pain and it is known as *Vṛddhi.*



Udararoga [31]

यस्य वातः प्रकुपितस्त्वङ्मांसान्तरमाश्रितः।
शोथं संजनयेत् कुक्षावुदरं तस्य जायते॥३१॥

- When *Vāta* is vitiated and localizes within the skin and muscles of the abdomen (*Tvak, Māṃsāntarm Āśritāḥ*) and develops swelling in the abdomen and it is known as *Udararoga.*

Ānāha [32]

यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति।
नाधो व्रजति नाप्यूर्ध्वमानाहस्तस्य जायते॥३२॥

- When *Vāta* is vitiated and localizes in the abdomen (*Kukṣiṃ Āśritya*) and unable to move either in the upward direction or in the downward direction and develops *Ānāha.*

Adhimāṃsa & Arbuda [33]

रोगाश्चोत्सेधसामान्यदधिमांसार्बुदादयः ।
विशिष्टा नामरूपाभ्यां निर्देश्याः शोथसंग्रहे॥३३॥

- Even though *Adhimāṃsa* and *Arbuda* etc. are having typical characteristic features by their name and form, they are also included under the group of *Śotha* because of the swelling is common feature.

Cakrapāṇi:

शोथसंग्रह इति शोथत्वेनोत्सेधरूपेण संग्रहः शोथसंग्रहः।।- '*Śotha Saṅgraha*' means enumeration of *Adhimāṃsa* and *Arbuda* etc. are under the

group of *Śotha* because of all these are having the common features of swelling (*Śotha*) and protrusion (*Utsedha*).

Rohiṇī [34-36]

वातपित्तकफा यस्य युगपत् कुपितास्त्रयः।
जिह्वामूलेऽवतिष्ठन्ते विदहन्तः समुच्छ्रिताः॥३४॥
जनयन्ति भृशं शोथं वेदनाश्च पृथग्विधाः।
तं शीघ्रकारिणं रोगं रोहिणीति विनिर्दिशेत्॥३५॥
त्रिरात्रं परमं तस्य जन्तोर्भवति जीवितम्।
कुशलेन त्वनुक्रान्तः क्षिप्रं संपद्यते सुखी॥३६॥

- Whenever all the three *Doṣās* viz. *Vāta, Pitta* and *Kapha* vitiates simultaneously and localizes at the root of the tongue (*Jihvā mūla*) causes burning sensation and swelling. Thereby it develops further swelling and severe pain of various types. This becomes acute and is known as *Rohiṇī* (diphtheria).
- The patient of *Rohiṇī* can hardly survives for 3 nights only.
- If the skilled physician can treat it in the beginning, he can be survived.



Cakrapāṇi:

समुच्छ्रिता अतिरिक्तप्रमाणाः।- '*Samucchritā*' means excessive vitiation all the *Tridoṣās.*

भृशम् अत्यर्थदुःखकारिणम्।- '*Bhṛśaṃ*' means it is the cause for severe miseries.

क्षिप्रमित्यनुक्रान्त इत्यनेन संबध्यते, तेन त्रिरात्रघातित्वं यस्य तस्य कथं शीघ्रप्रशम इति चोद्यं नोत्तिष्ठते; किंवा क्षिप्रं संपद्यते सुखीति व्याधिमहिम्ना भवति। व्याधेरेवैतत् स्वरूपं यच्छीघ्रं हन्ति, शीघ्रं प्रशाम्यतीति। यदुक्तं- "स शीघ्रं शीघ्रकारित्वात् प्रशमं याति हन्ति वा" (चि. अ. ३) इति।- *Kṣipram* means instantaneously or very quickly. Even though it is mentioned that *Rohiṇī* type of swelling causes death within three days, the patient can recover speedily if he is being given appropriate treatment. Here a doubt may arise that how it happens? This is the nature of the disease. If the treatment is given properly he will be recovered quickly, otherwise dies quickly.

It has been also stated in the 3rd chapter of *Cikitsā Sthāna* that "The diseases having acute onset may subside or kills quickly" (Ca. Ci. 3 / 55).

Nature of Diseases [37-41]

सन्ति ह्येवंविधा रोगाः साध्या दारुणसंमताः।
ये हन्युरनुपक्रान्ता मिथ्याचारेण वा पुनः॥३७॥
साध्याश्चाप्यपरे सन्ति व्याधयो मृदुसंमताः।
यत्नायत्नकृतं येषु कर्म सिध्यत्यसंशयम्॥३८॥
असाध्याश्चापरे सन्ति व्याधयो याप्यसंज्ञिताः।
सुसाध्वपि कृतं येषु कर्म यात्राकरं भवेत्॥३९॥
सन्ति चाप्यपरे रोगा येषु कर्म न सिध्यति।
अपि यत्नकृतं बालैर्न तान् विद्वानुपाचरेत्॥४०॥
साध्याश्चैवाप्यसाध्याश्च व्याधयो द्विविधाः स्मृताः।
मृदुदारुणभेदेन ते भवन्ति चतुर्विधाः॥४१॥

There are different types of diseases by their nature as mentioned under.

- There are certain curable diseases of serious nature may become fatal, if they are not treated or by wrong treatment.
- There are certain diseases of mild nature are definitely curable by treatment with or without any special care.
- Some other diseases are there which are palliable. Though they are not curable, the life can be drag on by giving effective treatment.
- Some more diseases are there which are incurable, in which no treatment can respond. Hence wise physicians will never attempt to treat such cases, whereas an ignorant physicians attempts and fails.
- Thus diseases are of 2 types viz. *Sādhya* (curable) and *Asādhya* (incurable). Both of them are further divided into 2 more types such as *Mṛdu* (mild) and *Dāruṇa* (severe). Hence by taking together the diseases are of 4 types.

Cakrapāṇi:

एतदेव शीघ्रकारित्वमन्येष्वपि ज्वरान्तकर्णशोथवलया-दिष्वस्तीत्याह- सन्तीत्यादि।- By mentioning the words '*Santi* and *Evaṃ vidhā*' the author has described the other acute diseases like *Karṇamūla Śotha*, *Valaya* etc. similar to *Rohiṇī*.

दारुणा इति संमता दारुणसंमता:।- '*Dāruṇa Sammatā*' means the acute diseases are being considered as dreadful.

दारुणत्वप्रसङ्गेन मृद्वादिभेदानप्याह- साध्याश्चेत्यादि।- While enumerating *Dāruṇa Vyādhi*, the other types of diseases viz. mild (*Mṛdu*) also mentioned, and they are easily curable.

यात्राकरं यापनाकरम्।- '*Yātrākara*' means *Yāpanākara* i.e. the treatment which is not be helpful for the cure of disease but useful to drag on the lifespan of the patient.

बालैः अज्ञैः, असाध्ये अज्ञा एवोत्साहात् प्रवर्तन्त इत्यर्थः।- '*Bāla*' means ignorant or unwise. The ignorant physicians are usually enthusiastic in treating incurable disease.

असाध्यस्य मृदुदारुणत्वं याप्यप्रत्याख्येयभेदेन, तथा सद्यःप्राणहरकालान्तरप्राणहरत्वादिना च।।- Incurable diseases are also of 2 types viz. *Mṛdu* (*Yāpya*) and *Dāruṇa* (*Pratyākhyeya*). In addition to the above *Sadyaḥ-Prāṇahara* (causes instantaneous death) and *Kālāntara-Prāṇahara* (causes death in due course) etc. also can be incorporated under the category of *Asādhya Vyādhi*.

Innumerable Number of Diseases [42-43]

त एवापरिस्संख्येया भिद्यमाना भवन्ति हि।
रुजावर्णसमुत्थानस्थानसंस्थाननामभिः ॥42॥
व्यवस्थाकरणं तेषां यथास्थूलेषु संग्रहः।
तथा प्रकृतिसामान्यं विकारेषूपदिश्यते॥43॥

- There is innumerable number of diseases depending upon *Rujā* (pain), *Varṇa* (color), *Samutthāna* (nature of their onset), *Sthāna* (location), *Saṃsthāna* (signs and symptoms) and *Nāma* (by nomenclature).
- However the important diseases are enumerated in the 19th chapter entitled *Aṣṭodarīya Adhyāya*. Other diseases are classified on the basis of the factors involved in their manifestation.

Cakrapāṇi:

त एवेत्यादि। समुत्थानभेदा हेतुभेदाः; रूक्षभोजनरात्रिजागरणादिभिन्नहेतुजन्यो हि वातो भिन्नोपक्रमसाध्यश्च भवतीति भावः।- In the present verse the author has explained innumerable number of diseases based on different aspects by starting with the word '*Sa Eva*'.

'*Samutthāna Bheda*' means different types of causative factors such as excessive intake of un-unctuous food substances and night vigilance, the *Vāta* gets aggravated. Thus the management of vitiated *Vāta* also differs according to the type of causative factors.

स्थानभेदा आमाशयादयो रसादयश्च।- '*Sthāna-bheda*' means the site of manifestation such as *Āmāśayā*, *Pakvāśaya* etc. and also *Rasa* and others. Based on the site of manifestation also the signs and symptoms as well as treatment differ.

संस्थानम् आकृतिः, यथा- गुल्मार्बुदादिः।- '*Samsthāna*' means *Ākṛti* i.e. the shape such as *Gulma*, *Arbuda* etc.

नामभेदो यथा- एकस्मिन्नेव राजयक्ष्मणि राजयक्ष्मशोषादिसंज्ञा।- '*Nāma-bheda*' means differentiation in the nomenclature. The same disease is called with different names at different places such as *Rājayakṣma*, *Kṣaya* and *Śoṣa*.

नन्वेवमपरिसंख्येयत्वे कथं व्यवहार इत्याह- व्यवस्थेत्यादि। व्यवस्थाकरणं चिकित्साव्यवहारार्थं संख्याकथनम्।- Now the question arise that if the number of diseases is innumerable and how they should be treated? The doubt has been clarified by mentioning the word '*Vyavasthā-karaṇam*'.

'*Vyavasthā-karaṇam*' means the classification of diseases are made only for the purpose of treatment.

यथास्थूलेष्विति ये ये स्थूला उदरमूत्रकृच्छ्रादयस्तेषु; संग्रहः अष्टोदरीयरोगसंग्रहे (उदिश्यते) इत्यर्थः।- '*Yathā-sthūleṣu*' means the diseases which are major and more common such as *Udararoga*, *Mūtrakṛcchra* etc. are broadly mentioned in the chapter entitled '*Aṣṭodarīya Adhyāya*'

अस्थूलेषु विकारेषु अष्टोदरीये संज्ञयाऽनुक्तेषु कथं व्यवस्थाकरणमित्याह- तथेत्यादि।- '*Asthūleṣu*' means the minor diseases which are not mentioned in the chapter *Aṣṭodarīya Adhyāya*. For the treatment of such diseases the author has given clarification by starting the verse with the word '*Tathā*'.

प्रकृतिसामान्यं समानकारणता; तेनानुक्तेषु साक्षाद्धाधिषु वातजोऽयं श्लेष्मजोऽयमिति, तथा रसजोऽयं रक्तजोऽयमित्यादिका चिकित्साव्यवहारार्थं व्यवस्था कर्तव्येति भावः।- Such minor ailments should be treated on the basis of similarity in nature such as *Vātaja*, *Śleṣmaja*, *Rasaja* and *Raktaja* etc. differentiation for the purpose of treatment is to be done.

अत एवाष्टोदरीये वक्ष्यति- "सर्वे विकारा वातपित्तकफान्नातिवर्तन्ते" (सू. अ. 19) इति।।- Thus it is clearly stated in the chapter *Aṣṭodarīya Adhyāya* that "No disease will manifest without the involvement of *Tridoṣa*" (Ca. Sū. 19 / 5).

Principles of Treatment in the Management of Diseases [44-47]

विकारनामाकुशलो न जिह्रीयात् कदाचन।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः॥44॥
स एव कुपितो दोषः समुत्थानविशेषतः।
स्थानान्तरगतश्चैव जनयत्यामयान् बहून्॥45॥
तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च।
समुत्थानविशेषांश्च बुद्ध्वा कर्म समाचरेत्॥46॥
यो ह्येतत्त्रितयं ज्ञात्वा कर्माण्यारभते भिषक्।
ज्ञानपूर्वं यथान्यायं स कर्मसु न मुह्यति॥47॥

- The physician need not feel shy if he is unable to name a disease because it is not possible to give nomenclature for

every disease.

- The same *Doṣās* gets aggravated by different causative factors and lodges at different places and produces many a number of diseases.
- Hence the physician should initiate treatment after knowing the nature of vitiated *Doṣa*, the site of manifestation and etiological factors.
- The physician who is well versed all these factors and scriptural instructions never commit a mistake in his endeavor of treating a patient.

Cakrapāṇi:

ज्वररक्तपित्तादिवन्नामाज्ञानेऽपि वातादिजन्यत्वज्ञानेनैव प्रचरितव्यमित्याह- विकारेत्यादि।- In the present verse the author has tried to present the details of treating a patient even without knowing the name of a disease such as *Jvara*, *Raktapitta* etc., by simply knowing the specific type of *Doṣik* involvement by starting with the word '*Vikāra*'.

स्थानान्तरगतश्चेत्यत्र चकार एकस्थानगतोऽपि बहुविकारं करोतीति समुच्चिनोति।- Here by adding the letter '*Ca*' to the word '*Sthānāntaragataḥ*' refers to that along with the *Doṣa* which came from other place, the *Doṣa* residing in that place also causes for the manifestation of several kinds of disorders.

यतो वक्ष्यति- "करोति गलमाश्रितः। कण्ठोद्ध्वंसं च कासं च स्वरभेदमरोचकम्" (चि. अ. 8) इति।-It is described in the treatment section as "The vitiated *Vāta* resides in the throat and causes *Kaṇṭhoddhvaṃsaṃ* (laryngitis), *Kāsa* (cough), *Svarabheda* (hoarseness) and *Arocaka* (anorexia) (Ca. Ci. 8 / 16).

अधिष्ठानान्तराणि आशयान्तराणि।- '*Adhiṣṭhānāntarāṇi*' means *Āśaya Anatrāṇi* i.e. different types of *Āśayās* such *Āmaśāya*, *Pakvāśaya*, *Mūtrāśaya* etc.

ज्ञानपूर्वमिति चिकित्साज्ञानपूर्वकम्।- '*Jñāna-Pūrvam*' means the physician must have complete knowledge about the disease before treating a patient.

यथान्यायं यथागमम्।- '*Yathānyāyaṃ*' means *Yathā-Āgamam* i.e. one has to follow the guide lines whatever is mentioned in the scriptures.

एवं मन्यते- यद्वातारब्धत्वादिज्ञानमेव कारणं रोगाणां चिकित्सायामुपकारि, नामज्ञानं तु व्यवहारमात्रप्रयोजनार्थं न स्वरूपेण चिकित्सायामुपकारीति।- In a nutshell to treat a patient the knowledge of the *Doṣās* is most important rather than knowing the nomenclature of disease. Knowing the name of disease is useful for general purpose but of no use in treating a patient.

Knowledge of Doṣās is only worth knowing [48]

नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः।
विकृताः प्रकृतिस्था वा तान् बुभुत्सेत पण्डितः॥48॥

- The three *Doṣās* viz. *Vāta*, *Pitta* and *Kapha* exists always in the living beings. The intelligent physician should be desirous to know (*Bubhutseta*) their normal (*Prakṛtistha*) and abnormal states (*Vikṛtistha*).

Cakrapāṇi:

संप्रति वातादिज्ञानेन रोगज्ञानमुद्दिष्टं तेनोपोद्धातेन वातादीनां प्रकृतिस्थानामप्रकृतिस्थानां च लक्षणं वक्तुमाह- नित्या इत्यादि।- As the knowledge of *Vāta* and the other *Doṣās* is important in knowing about the disease, the author has presented the normal and abnormal features of *Doṣās* as an introduction by starting the verse with the word '*Nityā*'.

बुभुत्सेत ज्ञातुमिच्छेत्॥४८॥- '*Bubhutseta*' means whoever is enthusiastic for learning.

Normal Functions of Vāta [49]

उत्साहोच्छ्वासनिः श्वासचेष्टा धातुगतिः समा।
समो मोक्षो गतिमतां वायोः कर्माविकारजम्॥49॥

The following are the normal functions of *Vāta*, when it is not in the deranged state:

- Enthusiasm (*Utsāha*).
- Expiration (*Ucchvāsa*).
- Inspiration (*Niḥśvāsa*).
- All the activities of the body and mind (*Ceṣṭā*).
- Maintenance of normal state of bodily tissues (*Dhātu Gatiḥ Samā*).
- Proper elimination of body wastes (*Samo Mokṣo Gati matāṃ*).

Normal Functions of *Vāta*

Cakrapāṇi:

चेष्टेति अविकृता चेष्टा।- '*Ceṣṭā*' means *Avikṛtā Ceṣṭā* i.e. normal functions of the body.

धातुगतिरिति रसादीनां पोष्यं धातुं प्रति गमनम्।- '*Dhātu-gati*' means transformation of *Rasa* and other *Dhātūs*.

गतिमतामिति पुरीषादीनां बहिर्निःसरताम्।- '*Gatimatām*' means elimination of urine, faeces etc. from the body.

Normal Functions of Pitta [50]

दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्।
प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्॥50॥

The following are the normal functions of *Pitta*, when it is not in the deranged state:

- Good vision (*Darśana*).
- Good digestion (*Pakti*).
- Normal temperature of the body (*Ūṣmā*).
- Normal hunger and thirst (*Kṣut-Tṛṣṇā*).
- Softness of the body (*Deha Mārdava*).
- Brightness or radiance (*Prabhā*).
- Wellbeing (*Prasāda*).
- Intelligence (*Medhā*).

Normal Functions of *Pitta*

Cakrapāṇi:

प्रसादः मनःप्रसादः।- '*Prasāda*' means *Manaḥ Prasāda* i.e. calmness of the mind.

Normal Functions of Kapha [51]

स्नेहो बन्धः स्थिरत्वं च गौरवं वृषता बलम्।
क्षमा धृतिरलोभश्च कफकर्माविकारजम्॥51॥

The following are the normal functions of *Kapha*, when it is not in the deranged state:

- Unctuousness (*Sneha*).
- Cohesion (*Bandha*).
- Steadiness (*Sthiratva*).
- Heaviness (*Gaurava*).
- Virility (*Vṛṣatā*).

- Strength (*Bala*).
- Toleration (*Kṣamā*).
- Courage or steadiness of mind (*Dhṛti*).
- Absence of greed (*Alobha*).

Normal Functions of *Kapha*

Cakrapāṇi:

बन्धः सन्धिबन्धः।- '*Bandha*' means *Sandhi-Bandha* i.e. boney joints.

स्थिरत्वम् अशैथिल्यम्।- '*Sthiratva*' means *Aśaithilya* i.e. steadiness or not become flaccid.

गौरवं प्राकृतं शरीरगौरवम्।- '*Gaurava*' means normal weight of the body.

क्षमा सहिष्णुता।- '*Kṣamā*' means patience or tolerance.

धृतिः मनसोऽचाञ्चल्यम्।- '*Dhṛti*' means not to have fickle mindedness.

क्षमादयश्च श्लेष्मणः प्रभावात् क्रियन्ते; एवमन्यत्रापि ज्ञेयम्।।- '*Kṣamā*' etc. are the normal functions of *Kapha*. These are all happens due to *Prabhāva* only. In the same fashion the functions of other *Doṣās* can be inferred.

Doṣa Kṣaya Lakṣaṇa [52]

वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते ।
कर्मणः प्राकृताद्धानिर्वृद्धिर्वाऽपि
विरोधिनाम् ॥52॥

- The decreased state of *Vāta*, *Pitta* and *Kapha* can be understood by the decrease of their normal functions as well as the increase of their respective opposite actions.

Cakrapāṇi:

क्षयलक्षणमाह- वाते इत्यादि।- In the present verse the author has presented *Doṣa Kṣaya Lakṣaṇa* by starting with the word '*Vāte*'.

कर्मणः प्राकृतादितिवातादिप्रकृतिकर्मत्वेनोक्तादुत्साहादेः।- '*Karmaṇaḥ-Prākṛtād-iti*' means normal functions of *Vāta* and the other *Doṣās* which are already mentioned such as *Utsāhāt* etc.

हानिः अपचयः।- *Hāni* means *Apacaya* i.e. decrease of their normal functions.

वृद्धिर्वाऽपि विरोधिनामिति उक्तप्राकृतलक्षणविरोधिनां कर्मणां वृद्धिः; यथा वातक्षये उत्साहविरोधिनो विषादस्य वृद्धिः, पित्तक्षयेऽदर्शनापत्त्यादीनां, श्लेष्मक्षये रौक्ष्यादीनां वृद्धिः।- '*Vṛddhiḥ va api virodhinām*' means increase of the opposite of the above mentioned normal functions of the *Doṣās*.

For example in case of *Vāta Kṣaya*, the increase of the opposite of normal function of *Utsāha* (enthusiasm) means *Viṣāda* (depression) develops. Similarly in case of *Pitta Kṣaya*; *Adarśana* (loss of vision), *Apakti* (indigestion) etc. develops. In the same way *Rauksya* (roughness /dryness) and the others increase in *Kapha Kṣaya*.

इह प्राकृतकर्महानौ सत्यां नावश्यं विरोधिकर्मवृद्धिरत उक्तं- वृद्धिर्वेत्यादि; न ह्यवश्यमुत्साहहानावल्पमात्रायां सत्यां विषादो वर्धते, अलोभन्यूनत्वे वा मनाग्लोभो वर्धते; किंवा, उत्साहाद्यभावेनाभावमुखेन ज्ञानार्थं 'कर्मणः प्राकृताद्धानिः' इत्युक्तं, विषादादिवृद्ध्या तु विधिमुखेन ज्ञानार्थं 'वृद्धिर्वाऽपि विरोधिनाम्' इत्युक्तम्।- However deficiency of normal functions doesn't necessarily increase of their opposite ones. In case of slight decrease of *Utsāha*, it is not a must for the increase of *Viṣāda*.

If there is decrease of *Alobha* (absence of greed), it doesn't necessarily follows the increase of *Lobha* (greediness).

In other words it is explained that knowledge of *Doṣa Kṣaya* can be obtained by two ways i.e. negative and positive ways. The negative aspect means the decrease of the normal functions of the *Doṣās*. The positive aspect means the increase of the opposite functions.

यदुच्यते- वृद्धिर्वाऽपि विरोधिनामिति विरोधिदोषाणां, यथा- पित्तवृद्धौ श्लेष्मक्षयो जायते, इत्येवमादि; तत्र, यतोऽन्यदोषवृद्धावन्यस्यावश्यं न ह्यपायो भवति, तथाहि सति पित्तवृद्धौ सत्यां सर्वदा श्लेष्मक्ष्यः स्यात्; न च दोषाः परस्परघातका इति प्रागेव प्रतिपादितं; प्रदेशान्तरेऽपि दोषाणां स्वलक्षणहानिरेव परं क्षयलक्षणं- "क्षीणा जहति लिङ्गं स्वं" (सू.अ.17) इत्यनेनोक्तम्।।- Some scholars opined that in the event of deficiency in one *Doṣa*, the *Doṣa* of opposite quality gets aggravated. That means in case of the decrease of *Kapha*, *Pitta Vṛddhi* should take place and vice versa. But it is not correct. The increase or the decrease of one *Doṣa* doesn't necessarily cause the decrease or increase of other *Doṣa* respectively. If it were so, the *Kapha* will be always in the diminished state in case of aggravation of *Pitta*.

It was stated earlier that the *Doṣās* do not harm each other and coexist in the body. In the other context also it is clearly mentioned that the decrease of normal functions of *Doṣās* can be considered as the decreased state of *Doṣās* (Ca. Sū. 17/62).

Doṣa Vṛddhi Lakṣaṇa [53-56]

दोषप्रकृतिवैशेष्यं नियतं वृद्धिलक्षणम्।
दोषाणां प्रकृतिर्हानिर्वृद्धिश्चैवं परीक्ष्यते॥53॥

- The increased state of *Doṣās* can be understood by means of their respective increased normal functions.
- Thus one should examine the normal, decreased and increased state of *Doṣās* in this way.

Cakrapāṇi:

वृद्धिलक्षणमाह- दोषेत्यादि। प्रकृतिः स्वभावः, तस्य वैशेष्यमाधिक्यं; श्लेष्मणः स्नेहशैत्यमाधुर्यादिर्या प्रकृतिस्तस्या अतिस्निग्धातिशैत्यातिमाधुर्यादिवैशेष्यं वृद्धिलक्षणम्।- Here the author has presented the *Doṣa Vṛddhi Lakṣaṇa* by starting the verse with the word '*Doṣa*'

'*Prakṛti*' means *Svabhāva* i.e. the normalcy. '*Tasya Vaiśeṣya*' means its increase.

For example: *Sneha* (unctuousness), *Śaitya* (coldness), *Mādhurya* (sweetness) etc. are the normal features (*Prakṛti*) of *Kapha*.

Ati-Snigdhātva (excessive unctuousness), *Ati-śaitya* (excessive coldness) and *Ati-Mādhurya* (excessive sweetness) etc. are *Vaiśeṣya* or *Vṛddhi* of *Kapha*.

नियतमिति प्रतिनियतं, यद्यस्य प्रकृतिलक्षणं तद्वृद्धं सप्तस्यैव वृद्धिलक्षणमित्यर्थः; अन्ये तु निश्चितमित्याहुः।।- '*Niyata*' means *Prati-Niyata*. That means the increase of the specific function of the *Doṣa*. Some others opined that *Niyata* means *Niścita* i.e. there will be certainty of increase.

To Sum up [54-56]

तत्र श्लोकाः:-
संख्यांनिमित्तंरूपाणिशोथानांसाध्यतांनच।
तेषां तेषां विकाराणां शोथांस्तांस्तांश्च पूर्वजान्॥54॥
विधिभेदं विकाराणां त्रिविधं बोध्यसंग्रहम्।
प्राकृतं कर्म दोषाणां लक्षणं हानिवृद्धिषु॥55॥
वीतमोहरजोदोषलोभमानमदस्पृहः ।
व्याख्यातवांस्त्रिशोथीयेरोगाध्यायेपुनर्वसुः॥56॥

In this chapter entitled *Triśothīya Adhyāya*, Lord *Punarvasu* (who is free from attachment, *Rajas*, other blemishes, greed, ego, pride and desire) has explained - The Types of *Śotha* - Causative Factors

- Signs and Symptoms - Prognosis - *Śotha* related to various Diseases - Swelling as Premonitory Symptoms- Different Types of Diseases - Important points to remember while treating a patient - Normal Functions of *Doṣās* - Features of Decreased and Increased State of *Doṣās* etc. in a lucid manner.

Cakrapāṇi:

संग्रहे शोथानां साध्यतामिति भेषजविशेषसाध्यत्वम्, उपशय इत्यर्थः;- By the mention of the words '*Śothānāṃ Sādhyatāṃ*' it can be understood that the curability of swellings is by means of specific therapies.

तच्च 'स्नेहौष्ण्यमर्दनाभ्यां च प्रणश्येत् स च वातिक' इत्युक्तं ज्ञेयम्।- For example: *Vātika Śopha* subsides by the application of specific therapies such as unction (*Sneha*), hot application (*Uṣṇa*) and massage (*Mardana*) etc.

न चेति न च साध्यतां, यथा- 'यश्च पादाभिनिर्वृत्तः' इत्यादि।- '*Na ca*' means not curable such as the origin of swelling starts from foot etc.

तेषां तेषामिति उपजिह्वादीनाम्।- '*Teṣāṃ Teṣāṃ*' means *Upajihvā* and other diseases.

शोथान् पूर्वजानित्यभिदधान उपजिह्वादिषु पूर्वं शोथो भवति, पश्चादुपजिह्वादिरोगव्यक्तिरिति दर्शयति।- '*Śothān Pūrvajān*' means the swelling develops initially and later on *Upajihvikā* and the other diseases manifests.

अत एव 'आशु संजनयेच्छोथं' इत्युत्त्वा 'जायतेऽस्योपजिह्विका' इत्युक्तम्।- '*Āśuṃ Sañjanayet Śothaṃ*' means in *Upajihvikā*, the swelling develops very quickly.

बोध्यः बोद्धव्यो विकारप्रकृत्यादिः।- '*Bodhyaḥ*' means one should be aware of the causative factors, location etc. of the swellings.

तस्य त्रिविधं संग्रहमिति 'तस्माद्विकारप्रकृतीः' इत्याद्युक्तं त्रयम्।।- The threefold description of *Śotha* refers to know the causative factors (*Karaṇa*), location (*Adhiṣṭhāna*) and the specificity of its development (*Viśeṣatā*).

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने त्रिशोथीयो नामाष्टादशोऽध्यायः॥18॥

Thus ends the eighteenth chapter of *Ślokasthāna* entitled *Triśothīya Adhyāya* which was composed by *Agniveśa* and redacted by *Caraka*.

***

Benefits of Pañcakarma

तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत्प्रशमनानां

-Ca.Sū. 25/40

Takrābhyāsa (regular intake of buttermilk) is the best one for curing Grahaṇī doṣa (dysentery), oedema, and hemorrhoids. It is also useful for the management of the complications arises due to improper administration of ghee.

19

CHAPTER



8

Aṣṭodarīya Adhyāya

अष्टोदरीयोऽध्यायः

Enumeration of 48 Types of Diseases 576
Classification of 8 Types of Diseases 577
Classification of 7 Types of Diseases 578
Classification of 6 Types of Diseases 579
Classification of 5 Types of Diseases 580
Classification of 4 Types of Diseases 582
Classification of 3 Types of Diseases 583
Classification of 2 Types of Diseases 584
Classification of 1Type of Diseases 585
Classification of 20 Types of Diseases 586
Tridoṣās are Only the Cause for All Diseases - A Simile 587
To Sum up 591

Chapter 19

8 Aṣṭodarīya Adhyāya

अष्टोदरीयोऽध्यायः

अथातोऽष्टोदरीयमध्यायं व्याख्यास्यामः॥1॥
इति ह स्माह भगवानात्रेयः॥2॥

After *Triśothīya Adhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Aṣṭodarīya Adhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

पूर्वाध्याये प्रोक्तं "व्यवस्थाकरणं तेषां यथास्थूलेषु संग्रहः" (सू. 18) इति, तदनु जिज्ञासायामष्टावुदराणीत्यादि यथास्थूलं संग्रहोऽभिधीयते। अष्टोदरीय इति चार्थपरा संज्ञा।।– In the previous chapter it is mentioned that systematization of diseases has been made in the chapter *Aṣṭodarīya* (Ca. Sū. 18 / 43). Basing on that the eight types of abdominal disorders (*Aṣṭa Udara*) and other are described in the present chapter. Thus the name of the chapter is given as *Aṣṭodarīya Adhyāya*.

Enumeration of 48 Types of Diseases [3]

इह खल्वष्टावुदराणि, अष्टौ मूत्राघाताः, अष्टौ क्षीरदोषाः, अष्टौ रेतोदोषाः; सप्त कुष्ठानि, सप्त पिडकाः, सप्त वीसर्पाः; षडतीसाराः, षडुदावर्ताः; पञ्च गुल्माः, पञ्च प्लीहदोषाः, पञ्च कासाः, पञ्च श्वासाः, पञ्च हिक्काः, पञ्च तृष्णाः, पञ्च छर्दयः, पञ्च भक्तस्यानशनस्थानानि, पञ्च शिरोरोगाः, पञ्च हृद्रोगाः, पञ्च पाण्डुरोगाः, पञ्चोन्मादाः, चत्वारोऽपस्माराः, चत्वारोऽक्षिरोगाः, चत्वारः कर्णरोगाः, चत्वारः प्रतिश्यायाः, चत्वारो मुखरोगाः, चत्वारो ग्रहणीदोषाः, चत्वारो मदाः, चत्वारो मूर्च्छायाः, चत्वारः शोषाः, चत्वारि क्लैब्यानि; त्रयः शोफाः, त्रीणि किलासानि, त्रिविधं लोहितपित्तं; द्वौ ज्वरौ, द्वौ व्रणौ, द्वावायामौ, द्वे गृध्रस्यौ, द्वे कामले, द्विविधमामं, द्विविधं वातरक्तं, द्विविधान्यर्शांसि; एक ऊरुस्तम्भः, एकः संन्यासः, एको महागदः; विंशतिः क्रिमिजातयः, विंशतिः प्रमेहाः, विंशतिर्योनिव्यापदः; इत्यष्टचत्वारिंशद्रोगाधिकरणान्यस्मिन् संग्रहे समुद्दिष्टानि॥3॥

In this chapter the author has enumerated the following 48 types of diseases.

1. Eight types of *Udara* (abdominal disorders).
2. Eight types of *Mūtrāghāta* (retention of urine).
3. Eight types of *Kṣīra-Doṣa* (disorders of breast milk).
4. Eight types of *Reto-Doṣa* (seminal disorders).
5. Seven types of *Kuṣṭha* (skin disorders).
6. Seven types of *Piḍakā* (carbuncles).
7. Seven types of *Vīsarpa* (erysipelas).
8. Six types of *Atīsāra* (diarrhea).
9. Six types of *Udāvarta* (distension of abdomen).
10. Five types of *Gulma* (abdominal tumors).
11. Five types of *Plīha Doṣa* (splenic disorders).
12. Five types of *Kāsa* (cough).
13. Five types of *Śvāsa* (dyspnea).

14. Five types of *Hikkā* (hiccup).
15. Five types of *Tṛṣṇā* (thirst).
16. Five types of *Chardi* (vomiting).
17. Five types of *Arocaka* (anorexia).
18. Five types of *Śiroroga* (diseases of head).
19. Five types of *Hṛdroga* (heart diseases).
20. Five types of *Pāṇḍu* (anemia).
21. Five types of *Unmāda* (insanity).
22. Four types of *Apasmāra* (epilepsy).
23. Four types of *Akṣiroga* (eye disorders).
24. Four types of *Karṇaroga* (ear disorders).
25. Four types of *Pratiśyāya* (coryza).
26. Four types of *Mukharoga* (diseases of the mouth).
27. Four types of *Grahaṇī-doṣa* (sprue syndrome).
28. Four types of *Mada* (intoxication).
29. Four types of *Mūrcchā* (syncope).
30. Four types of *Śoṣa* (consumption).
31. Four types of *Klaibya* (impotency).
32. Three types of *Śopha* (swellings).
33. Three types of *Kilāsa* (leucoderma).
34. Three types of *Raktapitta* (hemorrhagic disorders)
35. Two types of *Jvara* (fever)
36. Two types of *Vraṇa* (ulcers)
37. Two types of *Āyāma* (bending of the body).
38. Two types of *Gṛdhrasī* (sciatica).
39. Two types of *Kāmalā* (jaundice).
40. Two types of *Āma* (disorders of indigestion).
41. Two types of *Vātarakta* (gout).
42. Two types of *Arśas* (hemorrhoids).
43. One type of *Ūrustambha* (stiffness in the thighs).
44. One type of *Sannyāsa* (coma).
45. One type of *Mahāgada* (*Atatvābhiniveśa*).
46. Twenty types of *Kṛmi* (worms).
47. Twenty types of *Pramehā* (urinary disorders).
48. Twenty types of *Yonivyāpat* (gynecological disorders).

Cakrapāṇi:

उदराभिधानमादौ पूर्वाध्यायोक्तशोथसामान्यात्; उदराण्युत्सेधसामान्याच्छोथप्रभेदा एव।।– In the previous chapter the details regarding the swellings have been discussed. As *Śopha* is one of the main features in *Udara* and hence the diseases related to the abdomen are going to be enumerated initially

Classification of 8 Types of Diseases

एतानि यथोद्देशमभिनिर्देक्ष्यामः:-
अष्टावुदराणीति वातपित्तकफसन्निपातप्लीहबद्धच्छिद्रदकोदराणि, अष्टौ मूत्राघाता इति वातपित्तकफसन्निपाताश्मरीशर्कराशुक्रशोणितजाः, अष्टौ क्षीरदोषा इति वैवर्ण्यं वैगन्ध्यं वैरस्यं पैच्छिल्यं फेनसङ्घातो रौक्ष्यं गौरवमतिस्नेहश्च, अष्टौ रेतोदोषा इति तनु शुष्कं फेनिलमश्वेतं पूत्यतिपिच्छलमन्यधातूपहितमवसादि च (1);

1. Eight types of *Udara* (abdominal disorders):
   - *Vātaja Udara*
   - *Pittaja Udara*
   - *Kaphaja Udara*
   - *Sannipātaja Udara*
   - *Plīhodara* (splenomegaly)
   - *Baddhagudodara* (intestinal obstruction)
   - *Chidrodara* (intestinal perforation)
   - *Udakodara* (ascites)
2. Eight types of *Mūtrāghāta* (retention of urine):

- Vātaja Mūtrāghāta.
- Pittaja Mūtrāghāta.
- Kaphaja Mūtrāghāta.
- Sannipātaja Mūtrāghāta.
- Aśmarīja Mūtrāghāta.
- Śarkaraja Mūtrāghāta.
- Śukraja Mūtrāghāta.
- Śoṇitaja Mūtrāghāta.



3. Eight types of *Kṣīra-Doṣa* (disorders of breast milk):
   - *Vaivarṇya* (discoloration).
   - *Vaigandhya* (bad smell).
   - *Vairasya* (distaste).
   - *Paicchilya* (slimy).
   - *Phena-saṅghāta* (foamy).
   - *Raukṣya* (un-unctuous).
   - *Gaurava* (hard to digest).
   - *Ati-Sneha* (excessive unctuous).
4. Eight types of *Reto-Doṣa* (seminal disorders):
   - *Tanu* (thinness).
   - *Śuṣka* (dryness).
   - *Phenila* (foamy).
   - *Aśveta* (not in white).
   - *Pūti* (putrefied smell).
   - *Ati-picchila* (over sliminess).
   - *Anya-dhātūpahita* (combined with other tissues).
   - *Avasādī* (high density).

Cakrapāṇi:

इहैकादि संख्यापरित्यागादष्टसंख्याग्रहणमादौ कृतम्, अष्टसंख्याया बहुत्वेन प्राधान्यात्;- Here in the present context while enumerating the diseases the author has started from the number of eight types of disease instead of to start with one type of diseases. Because the eight types of diseases are having greatness in quantity or degree of intensity, they are described initially.

विंशतिसंख्यमेहादीनामूनविंशत्याद्यष्टःसंख्यानुपूर्वीप्राप्त्यभावात्र कृतः प्रथमं निवेशः।- Even though 20 types of diseases like *Prameha*, *Kṛmi* etc. are there, they are not mentioned initially since number twenty comes after nineteen.

यद्यपि चिकित्सितेऽष्टादश कुष्ठानि, तथाऽपीह महाकुष्ठाभिप्रायेण सप्तोच्यन्ते।- Though eighteen types of *Kuṣṭha* are described in the section of treatment, but here in the present context seven major varieties are only enumerated.

षड्दावर्ता इत्यत्र नवेगान्धारणीयोक्तन्यायेनोच्चारादिनिरोधजादय उदावर्ता इहोच्यन्ते।- In the chapter of '*Navegāndhāraṇīya Adhyāya*', even though 13 types of non-suppressible urges are mentioned, however *Udāvarta* develops due to the suppression of urine, faeces etc.; hence only 6 types of *Udāvarta* are enumerated here.

Classification of 7 Types of Diseases

सप्त कुष्ठानीति कपालोदुम्बरमण्डलर्ष्यजिह्वपुण्डरीकसिध्मकाकणानि, सप्त पिडका इति शराविका कच्छपिका जालिनी सर्षपलजी विनता विद्रधी च, सप्त विसर्पा इति वातपित्तकफाग्निकर्दमकग्रन्थिसन्निपाताख्याः (2);

5. Seven types of *Kuṣṭha* (skin disorders):
   - *Kapāla Kuṣṭha*
   - *Udumbara Kuṣṭha*
   - *Maṇḍala Kuṣṭha*
   - *Ṛṣyajihva Kuṣṭha*
   - *Puṇḍarīka Kuṣṭha*
   - *Sidhma Kuṣṭha*
   - *Kākaṇa Kuṣṭha*

6. Seven types of *Piḍakā* (carbuncles):
   - *Śarāvikā*
   - *Kacchapikā*
   - *Jālinī*
   - *Sarṣapa*
   - *Alajī*
   - *Vinatā*
   - *Vidradhī*
7. Seven types of *Visarpa* (erysipelas):
   - *Vātika Visarpa*
   - *Paittika Visarpa*
   - *Śleṣmika Visarpa*
   - *Agni Visarpa*
   - *Kardamaka Visarpa*
   - *Granthi Visarpa*
   - *Sannipātaka Visarpa*

Classification of 6 Types of Diseases

षडतीसारा इति वातपित्तकफसन्निपातभयशोकजाः, षड्दावर्ता इति वातमूत्रपुरीषशुक्रच्छर्दिक्षवथुजाः (3);

8. Six types of *Atīsāra* (diarrhea):
   - *Vātaja Atīsāra*
   - *Pittaja Atīsāra*
   - *Kaphaja Atīsāra*
   - *Sannipātaja Atīsāra*
   - *Bhayaja Atīsāra*
   - *Śokaja Atīsāra*

9. Six types of *Udāvarta* (distension of abdomen):
   - *Vātaja Udāvarta*
   - *Mūtraja Udāvarta*
   - *Purīṣaja Udāvarta*
   - *Śukraja Udāvarta*
   - *Chardija Udāvarta*
   - *Kṣavathuja Udāvarta*

Classification of 5 Types of Diseases

पञ्च गुल्मा इति वातपित्तकफसन्निपातशोणितजाः, पञ्च प्लीहदोषा इति गुल्मैर्व्याख्याताः, पञ्च कासा इति वातपित्तकफक्षतक्षयजाः, पञ्च श्वासा इति महोर्ध्वच्छिन्नतमकक्षुद्राः, पञ्च हिक्का इति महती गम्भीरा व्यपेता क्षुद्राऽन्नजा च, पञ्च तृष्णा इति वातपित्तामक्षयोपसर्गात्मिकाः, पञ्च छर्दय इति द्विष्टार्थसंयोगजा वातपित्तकफसन्निपातोद्रेकोत्थाश्च पञ्च भक्तस्यानशनस्थानानीति वातपित्तकफसन्निपातद्वेषाः, पञ्च शिरोरोगा इति पूर्वोद्देशमभिसमस्य वातपित्तकफसन्निपातक्रिमिजाः, पञ्च हृद्रोगा इति शिरोरोगैर्व्याख्याताः, पञ्च पाण्डुरोगा इति वातपित्तकफसन्निपातमृद्भक्षणजाः, पञ्चोन्मादा इति वातपित्तकफसन्निपातागन्तुनिमित्ताः (4);

10. Five types of *Gulma* (abdominal tumors):
   - *Vātaja Gulma*
   - *Pittaja Gulma*
   - *Kaphaja Gulma*
   - *Sannipātaja Gulma*
   - *Raktaja Gulma*
11. Five types of *Plīha Doṣa* (splenic disorders):
   - *Vātaja Plīha*
   - *Pittaja Plīha*
   - *Kaphaja Plīha*
   - *Sannipātaja Plīha*
   - *Raktaja Plīha*
12. Five types of *Kāsa* (cough):
   - *Vātaja Kāsa*
   - *Pittaja Kāsa*
   - *Kaphaja Kāsa*
   - *Kṣataja Kāsa*
   - *Kṣayaja Kāsa*

13. Five types of *Śvāsa* (dyspnea):
   - *Mahā Śvāsa*
   - *Ūrdhva Śvāsa*
   - *Chinna Śvāsa*
   - *Tamaka Śvāsa*
   - *Kṣudra Śvāsa*

14. Five types of *Hikkā* (hiccup):
   - *Mahatī Hikkā*
   - *Gambhīrā Hikkā*
   - *Vyapetā Hikkā*
   - *Kṣudra Hikkā*
   - *Annajā Hikkā*
15. Five types of *Tṛṣṇā* (thirst):
   - *Vātaja Tṛṣṇā*
   - *Pittaja Tṛṣṇā*
   - *Āmaja Tṛṣṇā*
   - *Kṣayaja Tṛṣṇā*
   - *Upasargātmika Tṛṣṇā* (secondary)
16. Five types of *Chardi* (vomiting):
   - *Dviṣṭārtha-saṃyoga Chardi* (due to contact with bad articles)
   - *Vātaja Chardi*
   - *Pittaja Chardi*
   - *Kaphaja Chardi*
   - *Sannipātaja Chardi*
17. Five types of *Arocaka* (anorexia):
   - *Vātaja Arocaka*
   - *Pittaja Arocaka*
   - *Kaphaja Arocaka*
   - *Sannipātaja Arocaka*
   - *Dveṣaja Arocaka*
18. Five types of *Śiroroga* (diseases of head):
   - *Vātaja Śiroroga*
   - *Pittaja Śiroroga*
   - *Kaphaja Śiroroga*
   - *Sannipātaja Śiroroga*
   - *Kṛmija Śiroroga*
19. Five types of *Hṛdroga* (heart diseases):
   - *Vātaja Hṛdroga*
   - *Pittaja Hṛdroga*
   - *Kaphaja Hṛdroga*
   - *Sannipātaja Hṛdroga*
   - *Kṛmija Hṛdroga*
20. Five types of *Pāṇḍu* (anemia):
   - *Vātika Pāṇḍu*
   - *Paittika Pāṇḍu*
   - *Śleṣmika Pāṇḍu*
   - *Sannipātaka Pāṇḍu*
   - *Mṛt-bhakṣaṇa janya Pāṇḍu* (due to intake of mud)
21. Five types of *Unmāda* (insanity):
   - *Vātika Unmāda*
   - *Paittika Unmāda*
   - *Śleṣmika Unmāda*
   - *Sannipātaka Unmāda*
   - *Āgantuja Unmāda*

Cakrapāṇi:

गुल्मैर्व्याख्याता इति यथा गुल्मभेदास्तथा प्लीहदोषाः।– '*Gulmairvyākhyāta*' means similar to the types of *Gulma* (*Vātaja, Pittaja, Kaphaja, Sannipātaja and Raktaja*), *Plīha* is also of the same 5 types.

पञ्च तृष्णेति संभोजनस्नेहादिजनितानामपि वातादिजास्वेवावरोधात्।– By mentioning the word '*Pañca Tṛṣṇā*', it clearly indicates that *Tṛṣṇā* caused by excessive intake of food or unctuous substances also are incorporated in the above mentioned 5 groups such as *Vātaja, Pittaja* etc.

स्थानमिव स्थानं कारणं; तेन, अनशनस्थानान्यरोचकानि; अनेन कारणेन कार्याण्यरोचकानि लक्ष्यन्ते तेन रोगसंग्रहे कारणाभिधानमन्याय्यमिति न भवति।– '*Sthāna*' means *Kāraṇa* i.e. the cause. Due to *Anaśana*

(food not being consumed) *Arocaka* develops. That means anorexia develops due to food not being consumed. It infers that the cause and the effect are akin. Thus by mentioning the reference of cause as being effect is not contradictory.

पूर्वोद्देशमभिसमस्येति कियन्त:शिरसीये विस्तरोक्तान् संक्षिप्य; किंवा कियन्त:शिरसीय एव "अर्धावभेदको वा स्यात्" (सू. अ. 17) इत्याद्युद्दिष्टानभिसमस्य परित्यज्य शिरस्येव रुजारूपा ये पञ्च त उच्यन्ते।– In the previous chapter '*Kiyantaḥ Śirasīya Adhyāya*' the diseases of the head are discussed in detail. In order to concise the description of *Śiroroga* and also confined to the pain as the salient feature 5 types are enumerated briefly in the present context by excluding *Ardhāvabhedaka* (Ca. Sū. 17 / 13).

Classification of 4 Types of Diseases

चत्वारोऽपस्मारा इति वातपित्तकफसन्निपातनिमित्ता:, चत्वारोऽक्षिरोगाश्चत्वार: कर्णरोगाश्चत्वार: प्रतिश्यायाश्चत्वारो मुखरोगाश्चत्वारो ग्रहणीदोषाश्चत्वारो मदाश्चत्वारो मूर्च्छाया इत्यपस्मारैर्व्याख्याता:, चत्वार: शोषा इति साहससन्धारणक्षयविषमाशनजा:, चत्वारि क्लैब्यानीति बीजोपघाताद्ध्वजभङ्गाज्जराया: शुक्रक्षयाच्च (5);

22. Four types of *Apasmāra* (epilepsy):
   - *Vātaja Apasmāra*
   - *Pittaja Apasmāra*
   - *Kaphaja Apasmāra*
   - *Sannipātaja Apasmāra*
23. Four types of *Akṣiroga* (eye disorders):
   - *Vātaja Akṣiroga*
   - *Pittaja Akṣiroga*
   - *Kaphaja Akṣiroga*
   - *Sannipātaja Akṣiroga*

4

1. **Apasmāra**
2. **Akṣiroga**
3. **Karṇaroga**
4. **Pratiśyāya**
5. **Mukharoga**
6. **Grahaṇī**
7. **Mada**
8. **Mūrchā**
9. **Śoṣa**
10. **Klaibya**

24. Four types of *Karṇaroga* (ear disorders):
   - *Vātaja Karṇaroga*
   - *Pittaja Karṇaroga*
   - *Kaphaja Karṇaroga*
   - *Sannipātaja Karṇaroga*
25. Four types of *Pratiśyāya* (coryza):
   - *Vātaja Pratiśyāya*

   - *Pittaja Pratiśyāya*
   - *Kaphaja Pratiśyāya*
   - *Sannipātaja Pratiśyāya*
26. Four types of *Mukharoga* (diseases of the mouth):
   - *Vātaja Mukharoga*
   - *Pittaja Mukharoga*
   - *Kaphaja Mukharoga*
   - *Sannipātaja Mukharoga*
27. Four types of *Grahaṇī-doṣa* (sprue syndrome):
   - *Vātaja Grahaṇī-doṣa*
   - *Pittaja Grahaṇī-doṣa*
   - *Kaphaja Grahaṇī-doṣa*
   - *Sannipātaja Grahaṇī-doṣa*
28. Four types of *Mada* (intoxication):
   - *Vātaja Mada*
   - *Pittaja Mada*
   - *Kaphaja Mada*
   - *Sannipātaja Mada*
29. Four types of *Mūrcchā* (syncope):
   - *Vātaja Mūrcchā*
   - *Pittaja Mūrcchā*
   - *Kaphaja Mūrcchā*
   - *Sannipātaja Mūrcchā*
30. Four types of *Śoṣa* (consumption):
   - *Sāhasaja Śoṣa* (due to over exertion)
   - *Vegāsandhāraṇaja Śoṣa* (due to suppression of natural urges)
   - *Kṣayaja Śoṣa* (due to wasting)
   - *Viṣamāśanaja Śoṣa* (due to irregular dieting)
31. Four types of *Klaibya* (impotency):
   - *Bījopaghātaja Klaibya* (due to the disorders of sperm)
   - *Dhvajabhaṅgāja Klaibya* (due to erectile dysfunction)
   - *Jarāja Klaibya* (due to old age)
   - *Śukra-kṣayaja Klaibya* (due to decrease of semen)

Cakrapāṇi:

'साहसं सन्धारणं क्षयो विषमाशनम्' इति पाठे कारणेन कार्यं चतुर्विध: शोष उच्यते।– As *Sāhasa* (adventures), *Sandhāraṇa* (suppression of natural urges), *Kṣayā* (depletion of bodily tissues) and *Viṣamāśana* (irregular food habits) are the 4 types of causative factors and thus *Śoṣa* also should be understood as 4 types.

Classification of 3 Types of Diseases

त्रय: शोथा इति वातपित्तश्लेष्मनिमित्ता:, त्रीणि किलासानीति रक्तताम्रशुक्लानि, त्रिविधं लोहितपित्तमिति ऊर्ध्वभागमधोभागमुभयभागं च (6);

32. Three types of *Śotha* (swellings):
   - *Vātaja Śotha*
   - *Pittaja Śotha*
   - *Kaphaja Śotha*
33. Three types of *Kilāsa* (leucoderma):
   - *Rakta Kilāsa*
   - *Tāmra Kilāsa*
   - *Śukla Kilāsa*
34. Three types of *Raktapitta* (hemorrhagic disorders):
   - *Ūrdhvagata Raktapitta*
   - *Adhogata Raktapitta*
   - *Ubhaya-Bhāga Raktapitta*



Classification of 2 Types of Diseases

द्वौ ज्वराविति उष्णाभिप्रायः शीतसमुत्थश्च शीताभिप्रायश्चोष्णसमुत्थः, द्वौ व्रणाविति निजश्चागन्तुजश्च, द्वावायामाविति बाह्यश्चाभ्यन्तरश्च, द्वे गृध्रस्याविति वाताद्वातकफाच्च, द्वे कामले इति कोष्ठाश्रया शाखाश्रया च, द्विविधमाममिति अलसको विसूचिका च, द्विविधं वातरक्तमिति गम्भीरमुत्तानं च, द्विविधान्यर्शांसीति शुष्काण्यार्द्राणि च (7);

35. Two types of *Jvara* (fever):

- *Śīta Samuttha Jvara* (fever caused by cold and the patient is desirous of hot substances)
- *Uṣṇa Samuttha Jvara* (fever caused by heat and the patient is desirous of cold substances)

36. Two types of *Vraṇa* (ulcers):

- *Nija Vraṇa* (endogenous ulcers)
- *Āgantuja Vraṇa* (exogenous ulcers)

37. Two types of *Āyāma* (bending of the body):

- *Bahirāyāma* (opisthotonos)
- *Antarāyāma* (emprosthotonos)

38. Two types of *Gṛdhrasī* (sciatica):

- *Vātaja Gṛdhrasī*
- *Vāta-Kaphaja Gṛdhrasī*

39. Two types of *Kāmalā* (jaundice):

- *Koṣṭhāśrita Kāmalā*
- *Śākhāśrita Kāmalā*

40. Two types of *Āma* (disorders of indigestion):

- *Alasaka* (intestinal hypotony)
- *Visūcikā* (cholera)

41. Two types of *Vātarakta* (gout):

- *Gambhīrā Vātarakta* (deep seated)
- *Uttāna Vātarakta* (superficial)

42. Two types of *Arśas* (hemorrhoids):

- *Śuṣka Arśas* (non-bleeding piles)
- *Ārdra Arśas* (bleeding piles)

Cakrapāṇi:

द्वौ ज्वरावित्यादौ शीतसमुत्थत्वेनैवोष्णाभिप्रायता लब्धा, यतो निदानविपरीतमिच्छति ज्वरी; तदिहोष्णाभिप्रायताविशेषणं शीतर्तुसमुत्थत्वेन पैत्तिकस्यापि ज्वरस्य शीतसमुत्थत्वनिरासार्थम्; एवं शीताभिप्रायेऽपि वाच्यम्।- '*Dvau Jvara*' means *Jvara* is of two types viz. *Śīta Samuttha* and *Uṣṇa Samuttha*. By the mentioning of *Śīta Samuttha*, it can be inferred that he is in desirous of hot substances, because the patient of fever always desirous of opposite to causative factors.

But the author has specifically mentioned the word '*Uṣṇābhiprāyeṇa*' in order to exclude the cases like *Pitta Jvara* which even though arising out of heat might occur in winter. Similarly the same analogy is also applicable for '*Śītābhiprāyeṇa*'.

द्विविधमाममिति आमविषस्य त्रिविधकुक्षीये वक्ष्यमाणस्यालसक एवान्तर्भावात्; अन्ये त्वामविषस्य विषत्वेनान्यविषतन्त्रविषयत्वादिहाग्रहणमिति ब्रुवते।- The word '*Dvividhamāmam*' refers to the two types of diseases due to indigestion viz. *Alasaka* and *Visūcikā* considered under *Āmaviṣa*, which are going to be described in the chapter *Trividha Kukṣīya Adhyāya* of *Vimāna Sthāna*. Hence *Āmaviṣa* is not separately mentioned.

Some other scholars opined that *Āmaviṣa* is related to poison since it is a separate subject matter pertaining to *Viṣa-Tantra* and thus it is not included here.

Classification of 1 Type of Diseases

एक ऊरुस्तम्भ इत्यामत्रिदोषसमुत्थः, एकः संन्यास इति त्रिदोषात्मको मनःशरीराधिष्ठानः, एको महागद इति अतत्त्वाभिनिवेशः (8);

43. One type of *Ūrustambha* (stiffness in the thighs)

- *Ūrustambha* is only one type and it is manifested by *Āmadoṣa* mixed with *Tridoṣa*.

44. One type of *Sannyāsa* (coma)

- *Sannyāsa* is also one type and it is manifested by all the *Tridoṣa* and resides both the body and mind.

45. One type of *Mahāgada* (*Atattvābhiniveśa*)

- *Mahāgada* is only one type and it is *Atattvābhiniveśa* (schizophrenia).



Cakrapāṇi:

अतत्त्वाभिनिवेशो मानसो विकारः, स च सर्वसंसारिदुःखहेतुतया गद इत्युच्यते।- *Atattvābhiniveśa* is one of the psychological

disorders, and cause all the worldly miseries; thus it is called by name 'Gada'.

Classification of 20 Types of Diseases

विंशतिः क्रिमिजातय इति यूका पिपीलिकाश्चेति द्विविधा बहिर्मलजाः, केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातरश्चेति षट् शोणितजाः, अन्त्रादा उदरावेष्टा हृदयादाश्चुरवो दर्भपुष्पाः सौगन्धिका महागुदाश्चेति सप्त कफजाः, ककेरुका मकेरुका लेलिहाः सशूलकाः सौसुरादाश्चेति पञ्च पुरीषजाः; विंशतिः प्रमेहा इत्युदकमेहश्चेक्षुबालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्लमेहश्च शुक्रमेहश्च शीतमेहश्च शनैर्मेहश्च सिकतामेहश्च लालामेहश्चेति दश श्लेष्मनिमित्ताः, क्षारमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मञ्जिष्ठामेहश्च हरिद्रामेहश्चेति षट् पित्तनिमित्ताः, वसामेहश्च मज्जामेहश्च हस्तिमेहश्च मधुमेहश्चेति चत्वारो वातनिमित्ताः, इति विंशतिः प्रमेहाः; विंशतिर्योनिव्यापद इति वातिकी पैत्तिकी श्लेष्मिकी सान्निपातिकी चेति चतस्रो दोषजाः, दोषदूष्यसंसर्गप्रकृतिनिर्देशैरवशिष्टाः षोडश निर्दिश्यन्ते, तद्यथा- रक्तयोनिश्चारजस्का चाचरणा चातिचरणा च प्राक्चरणा चोपप्लुता च परिप्लुता चोदावर्तिनी च कर्णिनी च पुत्रघ्नी चान्तर्मुखी च सूचीमुखी च शुष्का च वामिनी च षण्ढयोनिश्च महायोनिश्चेति विंशतिर्योनिव्यापदो भवन्ति (9);

46. Twenty types of *Kṛmi* (worms):

- *Yūkā* and *Pipīlikā* are originated from *Bahirmala* (external wastes) - 2
- *Keśādā, Lomādā, Lomadvīpā, Saurasā, Audumbarā* and *Jantumātara* (These 6 are born from blood -*Śoṇitaja*). - 6
- *Antrādā, Udarāveṣṭā, Hṛdayāda, Curava, Darbhapuṣpā, Saugandhikā* and *Mahāgudā* (these 7 are *Kaphaja*) - 7
- *Kakerukā, Makerukā, Leliha, Saśūlakā* & *Sausurādā* (These 5 are born out of *Purīṣa*)- 5

47. Twenty types of *Prameha* (urinary disorders):

- *Udakameha, Ikṣumeha, Sāndrameha, Sāndraprasāda Meha, Śuklameha, Śukrameha, Śītameha, Śanairmeha, Sikatāmeha* and *Lālāmeha* (These 10 are *Kaphaja Prameha*). - 10
- *Kṣārameha, Kālameha, Nīlameha, Lohitameha, Mañjiṣṭhāmeha* & *Haridrāmeha* (These 6 are *Pittaja Prameha*)- 6
- *Vasāmeha, Majjāmeha, Hastimeha, Madhumeha* (*Vātaja Prameha*)- 4

48. Twenty types of *Yonivyāpat* (gynecological disorders):

- *Vātaja Yonivyāpat*
- *Pittaja Yonivyāpat*
- *Kaphaja Yonivyāpat*
- *Sannipātaja Yonivyāpat*
- *Raktayoni*
- *Arajaskā*
- *Ācaraṇā*
- *Aticaraṇā*
- *Prākcaraṇā*
- *Upaplutā*

- *Pariplutā*
- *Udāvartinī*
- *Karṇinī*
- *Putraghnī*
- *Antarmukhī*
- *Sūcīmukhī*
- *Śuṣka*
- *Vāminī*
- *Ṣaṇḍha-yoni*
- *Mahāyoni*



केवलश्चायमुद्देशो यथोद्देशमभिनिर्दिष्टो भवति॥4॥

Here in the present context 48 types of diseases have been described briefly by the author. The details will be discussed subsequently.

Cakrapāṇi:

क्रिमीणां संज्ञा प्रायो रूढा ज्ञातव्या।- The word '*Kṛmi*' is conventional name for germs rather than etymological.

पिपीलिका लिख्या:।- '*Pipīlikā*' means *Likhyā* i.e. young louse.

दोषस्य दूष्येण रक्तादिना संसर्गो दोषदूष्यसंसर्गः,- '*Doṣa-Dūṣya Saṃsarga*' means combining the *Doṣās* with the *Dūṣyās* such as *Rakta* etc.

प्रकृतिः कारणम्; तत्र दोषदूष्यसंसर्गनिर्देशेन रक्तयोन्यादयः, प्रकृतिनिर्देशेन प्राक्चरणादयो योनिव्यापत्तिचिकित्सितं वीक्ष्य व्याकर्तव्याः।- '*Prakṛti*' means *Kāraṇa*. *Rakta-yoni* etc. are described that they are produced on the basis of the combination of *Doṣa* and *Dūṣya*, while *Prākcaraṇā* and others are produced on the basis of *Prakṛti*.

अत्र मदा एव मदात्ययरूपतां यान्तीति कृत्वा मदात्ययाः पृथङ्नोक्ताः।- As *Madā* goes to be transformed into *Madātyaya*, they are not mentioned separately.

इह चोक्तानां रोगाणां यद्यपि प्रकारान्तरेणान्यथाऽपि संख्या भवति; तथा हि- अष्टौ ज्वराः, द्वावुन्मादौ निजागन्तुकभेदेनेत्यादि, तथाऽपि प्रधानविवक्षया एत एव भेदा गृहीताः; प्राधान्यं च स्वाधिकारे रोगाणामनुसरणीयम्।- The numbers of diseases enumerated in the present chapter may differ with another context. For example *Jvara* is of eight types (instead of two) and *Unmāda* is of 2 types viz. *Nija* and *Āgantuja* (instead of five). Since the present classification is based on the predominant distinctive features of various types of diseases, the other possible types are not included here and are made available at the relevant chapters of other sections.

Tridoṣās are Only the Cause for All Diseases - A Simile

सर्व एव निजा विकारा नान्यत्र वातपित्तकफेभ्यो निर्वर्तन्ते, यथाहि- शकुनिः सर्वं दिवसमपि परिपतन् स्वां छायां नातिवर्तते, तथा स्वधातुवैषम्यनिमित्ताः सर्वे विकारा वातपित्तकफान्नातिवर्तन्ते।
वातपित्तश्लेष्मणां पुनः स्थानसंस्थानप्रकृतिविशेषानभिसमीक्ष्य तदात्मकानपि च सर्वविकारां स्तानेवोपदिशन्ति बुद्धिमन्तः॥5॥

- All the endogenous diseases (*Nija Vikāra*) arise always due to the vitiation of the *Tridoṣa* i.e. *Vāta, Pitta* and *Kapha* only.
- Just as the bird cannot transcend its own shadow even though flying all over the day, no endogenous disease caused by the disturbance of the equilibrium of the *Dhātūs* can't occur without the vitiation of *Tridoṣa*.
- Thus the wise physicians describe that all the diseases produced by *Vāta, Pita* and *Kapha* in their different aspects like *Sthāna* (location), *Saṃsthāna* (signs and symptoms), *Prakṛti* (causative factors) and say that all are caused by *Doṣās* only.



Cakrapāṇi:

संप्रत्यष्टोदरादीनां तथा वक्ष्यमाणानां महारोगे तथाऽनुक्तानामिह तन्त्रे रोगाणां निजानां वातपित्तश्लेष्माण एव व्यस्ताः समस्ता वा कारणं भवन्तीत्येतद्रूपं रोगाणां चिकित्सोपयोगि सूत्रं दर्शयितुमाह- सर्व इत्यादि। सर्व इत्युक्ता अनुक्ताश्च।- The *Tridoṣās* viz. *Vāta, Pitta* and *Kapha* either independently or jointly are held responsible for the manifestation of all the disease conditions mentioned in the present chapter and in the next chapter as well as the other endogenous disorders either mentioned or non-mentioned in this treatise. This is all mentioned for the practical utility in the management of various diseases.

यद्यप्यागन्तुष्वपि दोषसंबन्धो न व्यभिचरति, तथाऽप्यागन्तौ रोगे दोषापेक्षया न चिकित्सेत्यागन्तुव्युदासार्थं निजा इत्युक्तम्।- The word '*Sarva*' means both the things which are mentioned and not mentioned. Even though the involvement of *Doṣās* takes place in the latter stage of exogenous disorders, the treatment is not based on *Doṣās*. Hence to exclude *Āgantuja Roga*, the word '*Nija*' is specifically used by the author in the above verse and to establish the above passage as a guiding principle for the management of endogenous disorders.

स्वशब्देनागन्तुकृतं धातुवैषम्यं निराकरोति।- The word '*Sva*' is used to refute the vitiation of *Dhātūs* takes place in the exogenous disorders.

ननु, यदि वातादिजन्या एव सर्वविकारास्तत् किमर्थमन्यथाऽप्युदरादयः प्लीहजत्वादिभिर्निर्दिश्यन्त इत्याह- वातपित्तेत्यादि।- Now the question arises that if all the diseases are manifested by means of *Tridoṣās*, how the *Plīhaja Udara* is included under the abdominal disorders? The doubt has been clarified by stating that even such diseases are ultimately involved by *Tridoṣās*.

स्थानं रसादयो बस्त्यादयश्च,- '*Sthāna*' means the site such as *Rasa* and other bodily tissues as well as urinary balder and other organs of the body.

संस्थानम् आकृतिर्लक्षणमिति यावत्,- '*Saṃsthāna*; means the complete signs and symptoms.

प्रकृतिः कारणम्,- '*Prakṛti*' means *Kāraṇa* i.e. causative factors.

एषां विशेषानभिसमीक्ष्य तांस्तानुपदिशन्तीति 'अष्टावुदराणि' इत्येवमाद्युपदिशन्ति।- By keeping all the above said specific factors in view the nomenclature of diseases is given such as 8 types of *Udara* and other diseases.

तदात्मकानपीति वातादिजनितानपि।- This is also applicable to all the diseases including the diseases manifested by the vitiation of

Tridoṣās.

तत्र, स्थानविशेषादुपदेशो यथा- ऊरुस्तम्भरक्तयोनि-कामलाप्रभृतयः;- For example *Ūrustambha, Rakta-yoni, Kāmalā* etc. are derived their name based on the site of manifestation (*Sthāna*).

संस्थानविशेषात् पिडकागुल्मप्रभृतयः;- Similarly the nomenclature for *Piḍakā, Gulma* etc. are given due to their features (*Saṃsthāna*).

प्रकृतिविशेषाच्छ्लेष्मप्लीहोदरप्रभृतयः।- In the same way *Śleṣmodara* and *Plīhodara* etc. derive their names from their cause (*Prakṛti*)

अन्ये तु व्याख्यानयन्ति- यतस्तानेवेति वातादिजानेवेति व्यपदिशन्ति; तदात्मकानपीति यथोक्ताष्टादिसंख्यायुक्तानपि। यद्यपि प्लीहादिकारणान्तरेण भिन्ना अपि रोगास्तथाऽपि वातादिस्थानजन्यत्वेन तथा वातादिलक्षण युक्तत्वेन तथा वातादिकारणजातत्वेन वातादिजा एव सर्वविकारा इति वाक्यार्थः।।- Some other scholars opined that even though all the diseases which are manifested with their specificity of *Sthāna, Saṃsthāna, Ākṛti* and *Prakṛti* are treated as *Doṣa Vaiṣamya* only. Some are described the classification of diseases as number eight, seven etc.

Others opined differently that by using the word '*Plīha*' and other factors.

Though all these diseases manifested by different sites, features, shapes and causative factors all these should be considered because of the vitiation of *Vāta* and other *Doṣās* only.

भवतश्चात्र-

स्वधातुवैषम्यनिमित्तजा ये विकारसंघा बहवः शरीरे।
न ते पृथक् पित्तकफानिलेभ्य आगन्तवस्त्वेव ततो विशिष्टाः॥6॥

Thus it is said:

All these number of diseases of the body manifested by the vitiation of bodily tissues (endogenous diseases) are not separate from *Tridoṣa*, whereas *Āgantuja Rogās* (exogenous diseases) are manifested by different factors.

Cakrapāṇi:

अमुमेवार्थं श्लोकेनाह- स्वधात्वित्यादि।- In the present verse the author has presented that all the endogenous disorders are manifested by the disturbance of the equilibrium state of bodily tissues by starting with the word '*Svadhātu*'.

स्वशब्दोऽग्रे वक्ष्यमाणशरीरापेक्षः; तेन शरीरधातुवैषम्यं गृह्यते, मानसं तु प्रतिक्षिप्यते।- The word '*Sva*' refers to body. That means the bodily diseases are manifested due to the disturbance in the balance of *Dhātūs*. The psychic disorders (*Manāsika Roga*) are not included in this category.

धातवश्च न स्वरूपेण रोगकारणमिति वैषम्यपदं कृतम्।- It is clear that the *Dhātūs*, they themselves are not causing any diseases in the body independently. That means whenever their equilibrium is disturbed, then only they cause diseases. That's why the author has specifically used the word '*Dhātu Vaiṣamya*' in the verse.

आगन्तवो हि रोगा अभिघातज्वरादयो धातुवैषम्यजा भवन्ति, अतस्तद्व्युदासार्थं निमित्तपदम्; आगन्तुषु वैषम्यं विद्यमानमपि कारणत्वेन न व्यपदिश्यते, अप्रधानत्वात्; किंत्वागन्तुरेव लगुडादिप्रहारस्तत्र चिकित्साविशेषप्रयोजकः कारणं, निजे तु वैषम्यमेव चिकित्साप्रयोजकम्।- In fact the disturbance in the equilibrium of *Dhātūs* also takes place at one point of time in case of *Abhighātaja Jvara* etc. But it should not be considered as the prime cause for its manifestation. The disturbance in the equilibrium of *Dhātūs* is the secondary.

As the prime cause for *Abhighātaja Jvara* is assault and hence such factors should be considered while treating.

निमित्तजा इति च स्वधातुवैषम्यपदस्य कर्मधारयत्वेन,

बहुव्रीहिपक्षे त्वनर्थकमेव स्यात्।– '*Nimittaja*' means manifestation of diseases by the vitiation of *Doṣās*. Here the term *Nimittaja* has been used as *Karmadhāraya Samāsa*, because if it is used as *Bahūvrīhi Samāsa*, it becomes useless.

विकारसंघा इति 'अष्टावुदराणि' इत्यादयः।– '*Vikāra-Saṅghā*' refers to the groups of diseases such as eight types of *Udara* etc. which are enumerated in the chapter *Aṣṭodarīya Adhyāya*.

बहुवचनेनैव बहुत्वे लब्धे पुनः 'बहवः' इति वचनं बहुवचनस्य त्रित्वमात्रेणैव चरितार्थत्वनिषेधार्थम्।– As the word '*Vikāra-Saṅghā*' itself is the plural number and thus it is understood that diseases are many. In such circumstances what is the necessity of mentioning another word '*Bahavaḥ*'?

The word '*Bahavaḥ*' is specifically used in this context is since to highlight the significance of the plurality of *Doṣās*.

न ते पित्तकफानिलेभ्यः पृथगिति पित्तकफानिला एव ते दूष्यादिविशेषभाज इत्यर्थः।– All the above mentioned groups of diseases are not separate from the involvement of *Pitta*, *Kapha* and *Anila* (*Vāta*). Initially the *Doṣās* gets vitiated and they further vitiate *Dhātūs* and leads to the manifestation of diseases.

इह पित्तमादौ कृतं छन्दोऽनुरोधात्; किंवा प्राधान्यानियमज्ञापनार्थं कृतम्।– Here the order of mentioning of *Pitta* initially is to maintain the metre of the verse (*Chandas*) only but not for showing their importance in the order of preference.

अत्र च धातुवैषम्यमात्रं विकारो नोक्तः, तस्य वातादिवैषम्यरूपत्वेन सिद्धत्वादेव; यस्तु धातुवैषम्यविशेषो धातुवैषम्यजातो ज्वरादिरूपः, स इह शिष्यं प्रति विकृतवाताद्यभेदेन प्रतिपाद्यते।– Simply by the abnormality of *Dhātūs* cannot be considered as the disease. It is the end result of disturbance in the equilibrium of *Dhātūs* caused by the vitiated *Doṣās* such as fever etc.

In a nutshell it can be concluded that all the endogenous disorders are produced by the disturbance in the equilibrium of *Dhātūs*, which are ultimately caused by the vitiation of *Tridoṣās* only and nothing else. This concept has been elaborated for the better understanding of the student community.

तत इति पूर्वोक्तविकारसंघात्। विशिष्टा इति पित्तकफानिलव्यतिरिक्ताः।– Thus the exogenous disorders are different from the diseases manifested by the vitiation of *Pitta*, *Kapha* and *Anila* (*Vāta*).

आगन्तुरन्वेति निजं विकारं निजस्तथाऽऽगन्तुमपि प्रवृद्धः।
तत्रानुबन्धं प्रकृतिं च सम्यग् ज्ञात्वा ततः कर्म समारभेत॥7॥

At times *Āgantuja Roga* (exogenous diseases) follows *Nija Vikāra* (endogenous diseases) when greatly advanced, and vice versa. Thus the physician should understand the primary and secondary nature of the disease properly and commence the treatment.

Cakrapāṇi:

संप्रति भिन्नयोर्निजागन्त्वोः संबन्धमाह– आगन्तुरित्यादि।– Now the author has tried to present differentiation and relation between *Nija Roga* and *Āgantuja Roga* by starting the verse with the word '*Āgantu*'.

निजं प्रथमसमुत्पन्नं विकारमागन्तुर्भूतादिजन्यो विकारः अन्वेति अनुगतो भवति, यथा– दोषज एव ज्वरे उन्मादे वा पश्चाद्भूतनिवेशोऽपि भवति; तथाऽऽगन्तुमुत्पन्नमभिघातजं ज्वरं भूतजं चोन्मादं पश्चाद्धेतुमासाद्य निजोऽपि तत्र दोषलक्षणलक्षितो गदो भवति।– In fact overlapping of *Nija* and *Āgantuja Rogās* are seen occasionally. It is seen that if a disease is originated as *Nija Roga* (endogenous) initially and it may subsequently develop the features

of *Āgantuja Roga* (exogenous).

For example: *Jvara* and *Unmāda*. Both these diseases are primarily manifested as endogenous disorders due to the vitiation of *Doṣās* and subsequently are combined with the features demonic seizers (*Bhūta*), which is considered as exogenous disorder. Similarly the fever caused by assault (*Abhighātaja Jvara*) and the insanity caused by demonic seizures (*Bhūtonmāda*) may subsequently develop features of endogenous diseases.

'अपि प्रवृद्धः' इति वचनेन आगन्त्ववस्थायामपि निजदोषो वृद्धोऽस्त्येव, परं प्रवृद्धोऽसौ न भवति स्वलक्षणाकर्तृत्वेनेति दर्शयति। अपिशब्देन निजस्य निजेन तथाऽऽगन्तोरप्यागन्तुनाऽनुबन्धः सूच्यते। अत्र निजागन्त्वोरनुबन्धे कार्यमाहतत्रेत्यादि।– The word '*Api Pravṛddha*' means that in an exogenous disorder, the increase of *Doṣās* also may be seen up to certain extent, but unable to exhibit their symptoms. However sometimes one endogenous disorder may associate with another endogenous disorder; and one exogenous disorder associate with another exogenous disorder may be happen. Thus the development of secondary disease takes place.

अनुबन्धः पश्चात्कालजातः।– '*Anubandha*' means the ailment which has developed afterwards i.e. the secondary disorder.

प्रकृतिः मूलभूतः।– '*Prakṛti*' means *Mūlabhūta* i.e. the primary disorder.

सम्यग्ज्ञात्वेति बलवत्त्वाबलवत्त्वादिना; किंवा, अनुबन्धः अप्रधानः; प्रकृतिः अनुबन्ध्यः प्रधानमित्यर्थः। यदुक्तं– "स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानप्रशमो भवत्यनुबन्ध्यः, अतो विपरीतस्त्वनुबन्धः" (वि. अ. 6) इति।– '*Samyak Jñātva*' means assessment of the strength of the primary as well as secondary disorders. In other words *Anubandha* is *Apradhāna* i.e. secondary and *Prakṛti* is *Anubandhya* i.e. primary disorder. It is also told in the 6th chapter of *Vimānasthāna* as "*Anubandhya Vyādhi* (primary disease) is independent (*Svatantra*), having well established signs and symptoms (*Vyakta Liṅga*) and the causative factors and management methods are as per the scriptures (*Yathokta Samuttāna* and *Praśama*), while the *Anubandha Vyādhi* (secondary) is having exactly opposite features to the above mentioned" (Ca. Vi. 6 / 11).

To Sum up [8-9]

तत्र श्लोकौ–
विंशकाश्चैककाश्चैव त्रिकाश्चोक्तास्त्रयस्त्रयः।
द्विकाश्चाष्टौ, चतुष्काश्च दश, द्वादश पञ्चकाः॥8॥
चत्वारश्चाष्टका वर्गाः, षट्कौ द्वौ, सप्तकास्त्रयः।
अष्टोदरीये रोगाणां रोगाध्याये प्रकाशिताः॥9॥

In the present chapter entitled *Aṣṭodarīya Adhyāya* the author has enumerated - 20 Types of Diseases in 3 Groups - 1 Type of Diseases are 3 - 3 Types of Diseases in 3 Groups - 2 Types of Diseases in 8 Groups - 4 Types of Diseases in 10 Groups - 5 Types of Diseases in 12 Groups - 8 Types of Diseases in 4 Groups - 6 Types of Diseases in 2 Groups - 7 Types of Diseases in 3 Groups briefly.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थानेऽष्टोदरीयो नामोनविंशोऽध्यायः ॥19॥

Thus ends the nineteenth chapter of *Ślokasthāna* entitled *Aṣṭodarīya Adhyāya* which was composed by *Agniveśa* and redacted by *Caraka*.

***

आविकं सर्पिरहृद्यानाम्

Āvi Sarpi (sheep's ghee) is not good for heart as it stands first than all other substances in producing bad effect on heart.

- *Ca. Sū. 25/40*

20

CHAPTER



Mahāroga Adhyāya

महारोगाध्यायः

General Classification of Diseases 594
General Causes of Diseases 595
Initiating Causes for both Exogenous (Āgantuja) & Endogenous (Nija) Diseases 596
Mutual conjunction of Exogenous (Āgantuja) & Endogenous (Nija) Diseases 596
Difference between Exogenous (Āgantuja) & Endogenous (Nija) Diseases 597
Tridoṣa and their Location in the Body 597
Normal and Abnormal Functions of Doṣās 598
Types of Diseases According to Doṣa 598
80 Types of Nānātmaja Vāta Vikāra 599
Inherent Qualities and Actions of Vāta 602
General Principles of Treatment for Vāta Disorders 603
40 Types of Nānātmaja Pitta Vikāra 604
Inherent Qualities and Actions of Pitta 605
General Principles of Treatment for Pitta Disorders 606
20 Types of Nānātmaja Kaphaja Vikāra 607
Inherent Qualities and Actions of Kapha 607
General Principles of Treatment for Kapha Disorders 608
To Sum Up 610

Chapter 20



Mahāroga Adhyāya

महारोगाध्यायः

अथातो महारोगाध्यायं व्याख्यास्यामः ॥1॥

इति ह स्माह भगवानात्रेयः ॥2॥

After *Aṣṭodarīya Adhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Mahāroga Adhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

पूर्वं सामान्येन वातादिजन्या गदा उक्ताः, संप्रत्यवशिष्टान् केवलवातादिजन्यानभिधातुं महारोगाध्याध्योऽभिधीयते।।- In the previous chapter, the author has enumerated the diseases which are produced by the vitiation of *Vāta*, *Pitta* and *Kapha* in general, whereas in the present chapter entitled *Mahāroga Adhyāya*, the diseases which were not dealt earlier and which are especially originated by the vitiation of only single *Doṣa* has been dealt.

Mahāroga doesn't mean that these are major diseases and difficult to manage. As these diseases are more important than the diseases dealt in the previous chapter and hence the name of the chapter is given as *Mahāroga Adhyāya* and is more apt.

General Classification of Diseases [3]

चत्वारो रोगा भवन्ति- आगन्तुवातपित्तश्लेष्मनिमित्ताः; तेषां चतुर्णामपि रोगाणां रोगत्वमेकविधं भवति, रुक्सामान्यात्; द्विविधा पुनः प्रकृतिरेषाम्, आगन्तुनिजविभागात्; द्विविधं चैषामधिष्ठानं, मनःशरीरविशेषात्; विकाराः पुनरपरिसंख्येयाः, प्रकृत्यधिष्ठानलिङ्गायतनविकल्पविशेषापरिसंख्येयत्वात्॥3॥

- In general the diseases are of 4 types viz.
    - *Āgantuja Vyādhi* (diseases arising accidentally).
    - *Vātaja Vyādhi* (diseases caused by the vitiation of *Vāta*).
    - *Pittaja Vyādhi* (diseases caused by the vitiation of *Pitta*).
    - *Kaphaja Vyādhi* (diseases caused by the vitiation of *Kapha*).
- Even though they are 4 in number all of them can be incorporated into one group based on pain as a common feature.
- They are again classified into 2 types based on *Prakṛti* (origin) viz.
    - *Āgantuja Vyādhi* (exogenous diseases).
    - *Nija Vyādhi* (endogenous diseases).
- Diseases are also classified depending upon *Adhiṣṭhāna* (the seats of manifestation) viz.
    - *Manāsika Vyādhi* (psychic disorders).
    - *Śarīraka Vyādhi* (somatic disorders).
- As a matter of fact diseases are innumerable due to variations in *Prakṛti* (constitution / nature), *Adhiṣṭhāna* (site), *Liṅga* (signs and symptoms), *Āyatana* (causative factors) etc.



Cakrapāṇi:

आगन्तोरुक्तस्यापि त्रिशोथीये पुनरिह विशेषेण लक्षणाद्यभिधानार्थमभिधानम्।- Although *Āgantuja Rogās* have been described in the chapter named *Triśothīya Adhyāya*, the details of those disorders have been presented here again to explain their specific characteristics.

प्रकृतिरिह स्वभावः।- Here the word *Prakṛti* refers to nature.

मनःशरीरविशेषादिति आगन्तोरपि मनः शरीरं चाधिष्ठानम्, एवं निजस्यापि; आगन्तुग्रहणेन च मानसोऽपि कामादिर्गृह्यते।- '*Manaḥ-śarīra-viśeṣāt*' means the place of manifestation of both *Āgantuja* and *Nija Vikāra* are the body and the mind. *Kāma* (passion), *Śoka* (grief) etc. are considered as the psychological disorders of *Āgantuja* type.

एवं चतुर्विधत्वादि प्रतिपाद्य पुनः प्रकारान्तरेणापरिसंख्येयतां रोगाणामाह- विकारा इत्यादि।- Thus, four types of diseases (*Āgantuja*, *Vātaja*, *Pittaja* and *Kaphaja*) have been mentioned earlier and again the diseases have been classified in another way and their countless is depicted.

पुनरिति वक्ष्यमाणप्रकारान्तरेण।- The word '*Punaḥ*' refers to alternative classification.

प्रकृतिः प्रत्यासन्नं कारणं वातादि, अधिष्ठानं दूष्यं, लिङ्गानि लक्षणानि, आयतनानि बाह्यहेतवो दुष्टाहाराचाराः; एषां विकल्परूपो विशेषो विकल्पविशेषः, तेषामपरिसंख्येयत्वादिति।- '*Prakṛti*' means immediate causative factors for the vitiation of *Vāta* etc. *Adhiṣṭhāna* means *Dūṣya* i.e. *Rasa*, *Rakta* and other bodily tissues. *Liṅga* means *Lakṣaṇa* i.e. the signs and symptoms. *Āyatana* means the external causative factors such as defective food and lifestyle.

'*Vikalpa Viśeṣa*' means the above options in specific variation makes the disorders countless.

अत्र दोषाः संसर्गांशांशविकल्पादिभिरसंख्येयाः, दूष्यास्तु शरीरावयवा अणुशः परस्परमेलकेन विभज्यमाना असंख्येयाः, लिङ्गानि कृत्स्नविकारगतान्यसंख्येयान्येव, आविष्कृतानि तु तन्त्रे कथितानि, हेतवश्चावान्तरविशेषादसंख्येयाः प्रव्यक्ता एव।- Due to different variations in combination and permutations, *Doṣās* are countless. Similarly the *Dūṣyas* are innumerable due to cellular division and combination, clinical features and etiological factors. Therefore, diseases are also innumerable.

केचित् पुनः 'एषां विकाराः' इति पठन्ति, स तु पाठो नानुमतस्तावत्; यदि च स्यात्तदा देहमनःप्रत्यवमर्शकम् 'एषाम्' इतिपदं, बहुवचनं तु मनःशरीरयोर्बहुत्वविवक्षया।।- Some people read "*Eṣām Vikārāḥ*" instead of '*Vikārāḥ*', which has not been accepted because it will also denote the multiplicity of mind and body, thus it is not accepted.

General Causes of Diseases [4]

मुखानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गाभिघातव्यधबन्धनवेष्टनपीडनरज्जुदहनशस्त्राशनिभूतोपसर्गादीनि, निजस्य तु मुखं वातपित्तश्लेष्मणां वैषम्यम्॥4॥

The following are the general causes of exogenous diseases (*Āgantuja Vyādhi*):

- *Nakha, Daśana* (injury by nail and teeth).
- *Patana* (by falling from height).
- *Abhicāra* (employment of spells for a malevolent purpose).
- *Abhiśāpa* (by curse).
- *Abhiṣaṅga* (by the state of being possessed by evil spirits).
- *Abhighāta* (by assault).
- *Vyadha* (by piercing); *Bandhana* (by bandaging); *Veṣṭana* (by wrapping); *Pīḍana* (by the application of pressure); *Rajju* (by tying with rope).
- *Dahana* (by burns); *Śastra* (injury by weapon); *Aśani* (by thunderbolt).
- *Bhūtopasarga* (infection by microorganisms).

Causes for endogenous diseases (*Nija Vyādhi*):

- The endogenous diseases are caused by the vitiation of *Vāta*, *Pitta* and *Kapha*.

Cakrapāṇi:

मुखानि कारणानि; यथा "रजस्वलागमनमलक्ष्मीमुखानाम्" (सू. अ. 25) इति।।- '*Mukhāni*' means the causative factor. It has also been said that "sexual intercourse with a menstrual woman is the main reason of *Alakṣmī*" (Ca. Sū. 25/40).

Initiating Causes for both Exogenous (Āgantuja) & Endogenous (Nija) Diseases [5]

द्वयोस्तु खल्वागन्तुनिजयोः प्रेरणमसात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति।।5।।

The initiating causative factors (*Preraṇa*) for both exogenous (*Āgantuja*) and endogenous (*Nija*) diseases are:

- *Asātmyendriyārtha Saṃyoga* (unwholesome conjunction of sense organs and objects).
- *Prajñāparādha* (intellectual error).
- *Pariṇāma* (seasonal variations).

Cakrapāṇi:

प्रेरणमिति कारणम्, अनेकार्थत्वाद्धातूनाम्।।- '*Preraṇa*' means the cause that it is due to the origin (*Dhātu*) meaning.

Mutual conjunction of Exogenous (Āgantuja) & Endogenous (Nija) Diseases [6]

सर्वेऽपि तु खल्वेतेऽभिप्रवृद्धाश्चत्वारो रोगाः परस्परमनुबध्नन्ति, न चान्योन्येन सह सन्देहमापद्यन्ते ।।6।।

When all these 4 types of diseases (i.e. *Āgantuja* and *Tridoṣa*) grow and are connected to each other, even then specific characteristics are clearly identified without giving the scope of doubt.

Cakrapāṇi:

अनुबध्नन्ति अनुगच्छन्ति।- '*Anubadhnanti*' means both exogenous and endogenous are being interconnected.

न सन्देहमापद्यन्त इति न सन्देहविषयतामापद्यन्ते; मिश्रीभूता अपि प्रतिस्वं भिन्नैर्लक्षणैर्भेदेन ज्ञायन्त इत्यर्थः।।- '*Na Sandehamāpadyante*' means without the scope of doubt.

Although both types of diseases are interconnected, but due to the specialty of the symptoms, they can easily be differentiated.

Difference between Exogenous (Āgantuja) & Endogenous (Nija) Diseases [7]

आगन्तुर्हि व्यथापूर्वं समुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति; निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते जघन्यं व्यथामभिनिर्वर्तयन्ति।।7।।

- In the case of *Āgantuja Roga* (exogenous disorders) the pain develops initially and after this there is a disturbance in the balance of *Vāta*, *Pitta* and *Kapha*.
- On the other hand, endogenous disorder (*Ābhyantara Roga*) begins with a disturbance in the balance of *Vāta*, *Pitta* and *Kapha* and then develops pain.

Cakrapāṇi:

आगन्तुनिजयोर्भेदकं लक्षणमाह- आगन्तुर्हीत्यादि।- In the present verse the author has presented the differences between the exogenous and endogenous disorders by starting with the term '*Āganturhi*'.

आगन्तुरुत्पन्नः सन्, व्यथापूर्वमिति पीडां प्रथमं कृत्वा, पश्चाद्दोषाणां वैषम्यमिति दोषवैषम्यलक्षणमुक्तं; स्वलक्षणकारकं तु वैषम्यमागन्तोरादितःप्रभृति विद्यमानमप्यकिंचित्करमिति भावः।।- In the case of *Āgantuja Roga*, the pain develops initially and later on the vitiation of *Doṣa*. Even though the symptoms of deformity are present from the beginning, because of their insignificance they are unable to produce any symptoms.

Tridoṣa and their Location in the Body [8]

तेषां त्रयाणामपि दोषाणां शरीरे स्थानविभाग उपदेक्ष्यते; तद्यथा- बस्तिः पुरीषाधानं कटिः सक्थिनी पादावस्थीनि पक्वाशयश्च वातस्थानानि, तत्रापि पक्वाशयो विशेषेण वातस्थानं; स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि, तत्राप्यामाशयो विशेषेण पित्तस्थानम्; उरः शिरो ग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मस्थानानि, तत्राप्युरो विशेषेण श्लेष्मस्थानम्।।8।।

Now the places of *Tridoṣās* in the body are given below.

Location of Vāta:

- *Vasti* (urinary bladder), *Purīṣādhāna* (rectum), *Kaṭi* (waist), *Sakthi* (thighs), *Pāda* (feet), *Asthi* (bones) and *Pakvāśaya* (colon) are the places of *Vāta* in the body. Among them *Pakvāśaya* (colon) is the most important site for *Vāta*.

Important Sites of *Tridoṣās* in the Body

Location of Pitta:

- *Sveda* (sweat), *Rasa* (plasma), *Lasīkā* (lymph), *Rudhira* (blood) and *Āmāśaya*

(stomach) are the places of *Pitta* in the body. Among them *Āmāśaya* (stomach) is the most important site for *Pitta*.

Location of Kapha:

- *Uras* (chest), *Śiras* (head), *Grīva* (neck), *Parvāṇi* (joints), *Āmāśaya* (stomach) and *Medas* (fatty tissue) are the places of *Kapha* in the body. Among them *Uras* (chest) is the most important site for *Kapha*.

***Cakrapāṇi*:**

आगन्तुनिजयोर्भेदकं लक्षणमभिधाय निजविकारकरणां वातादीनां भेदज्ञानार्थमाह- तेषामित्यादि।- After presenting the difference between exogenous and endogenous disorders, now the author is going to present the various attributes of endogenous disorders due to *Vāta* and other *Doṣās* by starting the verse with the term '*Teṣāṃ*'.

पुरीषाधानं पक्वाशयः- '*Purīṣādhāna*' means *Pakvāśaya* i.e. large intestines.

यद्यपि प्राणादिभेदभिन्नस्य वायोः पृथगेव स्थानानि वक्ष्यति; यथा- "स्थानं प्राणस्य शीर्षोरःकण्ठजिह्वास्यनासिकाः" (चि. अ. 28) इत्यादि; तथाऽपीदं वैशेषिकं स्थानं ज्ञेयं, यतोऽत्र प्रायो वातविकारा भवन्ति, भूताश्च दुर्जयाः; अत्र च विजिते वाते सर्ववातविकारावजय इति।- Actually *Vāta* has been divided into 5 types like *Prāṇavāta* etc. and they are mentioned in the verses 6 of Chapter 28 of *Cikitsāsthāna*, "*Prāṇāvāta's* place is head (*Śīrṣa*), chest (*Uras*), throat (*Kaṇṭha*), tongue (*Jihvā*), mouth (*Āsya*), nose (*Nāsikā*)" (Ca. Ci. 28 / 6).

Yet the specific place of the *Vāta* is known as *Pakvāśaya*, because most *Vāta* disorders are produced and it is difficult to manage them. However, if the *Vāta* is controlled at the level of the *Pakvāśaya*, then all types of *Vāta* disorders can be managed.

लसीका उदकस्य पिच्छाभागः।- '*Lasīkā*' is the slimy portion of body fluid and hence it can be compared to lymph.

पित्तस्थानेषु आमाशय इति आमाशयाधोभागः, श्लेष्मस्थानेष्वामाशय आमाशयोर्ध्वभागः॥८॥- The location of *Pitta* is the lower part of *Āmāśaya* and the location of *Kapha* is the upper part of *Āmāśaya*.

Normal and Abnormal Functions of Doṣās [9]

सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरीरे कुपिताकुपिताः शुभाशुभानि कुर्वन्ति- प्रकृतिभूताः शुभान्युपचयबलवर्णप्रसादादीनि, अशुभानि पुनर्विकृतिमापन्ना विकारसंज्ञकानि॥९॥

- *Doṣās* means that *Vāta*, *Pitta* and *Kapha* continue to move inside the body and are responsible for the auspicious and inauspicious functions during their normal and unusual state respectively.
- When they are in the normal state they produce good effects like growth (*Upacaya*), strength (*Bala*), complexion (*Varṇa*), cheerfulness (*Prasāda*) etc. If the *Doṣās* are in the abnormal state they are held responsible for various types of disorders.

Types of Diseases According to Doṣa [10]

तत्र विकाराः सामान्यजा, नानात्मजाश्च। तत्र सामान्यजाः पूर्वमष्टोदरीये व्याख्याताः, नानात्मजांस्त्विहाध्यायेऽनुव्याख्यास्यामः। तद्यथा- अशीतिर्वातविकाराः, चत्वारिंशत् पित्तविकाराः, विंशतिः श्लेष्मविकाराः॥१०॥

- There are two types of diseases, according to kind of vitiation of *Doṣa* viz.
  - *Sāmānyaja Vyādhi* (diseases caused generally by *Tridoṣās* either singly or jointly).
  - *Nānātmaja Vyādhi* (diseases due to a specific *Doṣa*).
- Among them the first type of diseases i.e. *Sāmānyajā Vyādhi* (diseases caused by *Tridoṣa* in general) has been discussed in the previous chapter entitled *Aṣṭodarīya Adhyāya*.
- The present chapter is intended to describe the second type of diseases viz. *Nānātmaja Vyādhi* (diseases due to a specific *Doṣa*).

- The purpose of the present chapter is to describe the other types of diseases such as the *Nānātmaja Vikāra* (diseases caused by a specific *Doṣa*).
- The number of *Nānātmaja Vikāra* is mentioned below.
  - *Vātaja* - 80
  - *Pittaja* - 40
  - *Kaphaja* - 20

80 Types of Nānātmaja Vāta Vikāra [11]

तत्रादौ वातविकारराननुव्याख्यास्यामः। तद्यथा- नखभेदश्च, विपादिका च, पादशूलं च, पादभ्रंशश्च, पादसुप्तता च, वातखुड्डता च, गुल्फग्रहश्च, पिण्डिकोद्वेष्टनं च, गृध्रसी च, जानुभेदश्च, जानुविश्लेषश्च, ऊरुस्तम्भश्च, ऊरुसादश्च, पाङ्गुल्यं च, गुदभ्रंशश्च, गुदार्तिश्च, वृषणाक्षेपश्च शेफस्तम्भश्च, वङ्क्षणानाहश्च, श्रोणिभेदश्च, विड्भेदश्च, उदावर्तश्च, खञ्जत्वं च, कुब्जत्वं च, वामनत्वं च, त्रिकग्रहश्च, पृष्ठग्रहश्च, पार्श्वावमर्दश्च, उदरावेष्टश्च, हृन्मोहश्च, हृद्द्रवश्च, वक्षौद्घर्षश्च, वक्षौपरोधश्च, वक्षस्तोदश्च, बाहुशोषश्च, ग्रीवास्तम्भश्च, मन्यास्तम्भश्च, कण्ठोद्ध्वंसश्च, हनुभेदश्च, ओष्ठभेदश्च, अक्षिभेदश्च, दन्तभेदश्च, दन्तशैथिल्यं च, मूकत्वं च, वाक्सङ्गश्च, कषायास्यता च, मुखशोषश्च, अरसज्ञता च, घ्राणनाशश्च, कर्णशूलं च, अशब्दश्रवणं च, उच्चैःश्रुतिश्च, बाधिर्यं च, वर्त्मस्तम्भश्च, वर्त्मसङ्कोचश्च, तिमिरं च, अक्षिशूलं च, अक्षिव्युदासश्च, भ्रूव्युदासश्च, शङ्खभेदश्च, ललाटभेदश्च, शिरोरुक् च, केशभूमिस्फुटनं च, अर्दितं च, एकाङ्गरोगश्च, सर्वाङ्गरोगश्च, पक्षवधश्च, आक्षेपकश्च, दण्डकश्च, तमश्च, भ्रमश्च, वेपथुश्च, जृम्भा च, हिक्का च, विषादश्च, अतिप्रलापश्च, रौक्ष्यं च, पारुष्यच, श्यावारुणावभासता च, अस्वप्नश्च, अनवस्थितचित्तत्वं च; इत्यशीतिर्वातविकारा वातविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः॥११॥

Initially the diseases caused by *Vāta* are going to be explained as under.

- *Nakhabheda* (cracking of nails).
- *Vipādikā* (cracking of feet).
- *Pāda-śūla* (pain in foot).
- *Pāda-bhraṃśa* (foot drop).
- *Pāda-suptatā* (numbness of foot).
- *Vāta-khuḍḍatā* (club foot).
- *Gulphagraha* (stiffness of ankle).
- *Piṇḍikodveṣṭa* (cramps in the calf muscles).
- *Gṛdhrasī* (sciatica).
- *Jānubheda* (tearing pain in the knee).
- *Jānuviśleṣa* (dislocation of knee).
- *Ūrustambha* (stiffness of thigh).
- *Ūrusāda* (weakness of the thigh).
- *Pāṅgulya* (lameness).
- *Gudabhraṃśa* (prolapsed rectum)..
- *Gudārti* (pain in the anus).
- *Vṛṣaṇākṣepa* (pain in the scrotum).
- *Śephastambha* (stiffness of penis).
- *Vaṅkṣaṇānāha* (tension in groin).
- *Śroṇibheda* (pain in the pelvis).
- *Viḍbheda* (diarrhea).
- *Udāvarta* (upward movement of *Vāta*).
- *Khañjatva* (limping).
- *Kubjatva* (kyphosis).
- *Vāmanatva* (dwarfism).
- *Trikagraha* (stiffness in the sacrum).
- *Pṛṣṭhagraha* (stiffness of back).
- *Pārśvāvamarda* (pain in the flanks).
- *Udarāveṣṭā* (griping pain in abdomen).
- *Hṛnmoha* (bradycardia).
- *Hṛddrava* (tachycardia).
- *Vakṣa-udgharṣa* (rubbing pain in chest).
- *Vakṣa-uparodha* (impairment of chest movement).
- *Vakṣastoda* (stabbing pain in the chest).
- *Bāhuśoṣa* (wasting in the arm).
- *Grīvāstambha* (stiffness of the neck).
- *Manyāstambha* (torticollis).
- *Kaṇṭhoddhvaṃsa* (hoarseness of voice).
- *Hanubheda* (pain in the jaw).
- *Oṣṭhabheda* (pain in the lips).
- *Akṣibheda* (pain in the eyes).
- *Dantabheda* (toothache).
- *Dantaśaithilya* (looseness of tooth).
- *Mūkatva* (dumbness).
- *Vāksaṅga* (stammering).
- *Kaṣāyāsyatā* (astringent taste in the mouth).
- *Mukhaśoṣa* (dryness of mouth).
- *Arasajñatā* (tastelessness).
- *Ghrāṇanāśa* (loss of smell perception).
- *Karṇaśūla* (ear ache).
- *Aśabdaśravaṇa* (tinnitus).
- *Uccaiḥśruti* (hardness of hearing).
- *Bādhirya* (deafness).
- *Vartma-stambha* (stiffness of eyelid).
- *Vartma-saṅkoca* (contracture of eyelid).
- *Timira* (defect of vision).
- *Akṣiśūla* (pain in the eyes).
- *Akṣi-vyudāsa* (drooping of eyeball).
- *Bhrū-vyudāsa* (drooping of eyebrow).
- *Śaṅkhabheda* (pain in the temporal region).
- *Lalāṭabheda* (pain in the forehead).
- *Śiroruk* (headache).
- *Keśabhūmisphuṭana* (cracking of scalp).
- *Ardita* (facial paralysis).
- *Ekāṅgaroga* (monoplegia).
- *Sarvāṅgaroga* (polyplegia).
- *Pakṣavadha* (hemiplegia).
- *Ākṣepaka* (clonic convulsion).
- *Daṇḍaka* (tonic convulsion).
- *Tama* (feeling of darkness).
- *Bhrama* (giddiness).
- *Vepathu* (tremors).
- *Jṛmbhā* (yawning).
- *Hikkā* (hiccup).
- *Viṣāda* (depression).
- *Atipralāpa* (delirium).
- *Raukṣya* (dryness).
- *Pāruṣya* (hardness).
- *Śyāvāruṇa-avabhāsita* (dusky red appearance).
- *Asvapna* (insomnia).
- *Anavasthita-cittatva* (instability of mind).

➤ Even though these kinds of diseases are innumerable, but the above eighty important diseases have been mentioned here.

Cakrapāṇi:

सामान्यजा इति वातादिभिः प्रत्येकं मिलितैश्च ये जन्यन्ते।– '*Sāmānyajā*' means the diseases manifested by the vitiation of *Doṣās* either singly or jointly.

नानात्मजा इति ये वातादिभिर्दोषान्तरासंपृक्तैर्जन्यन्ते।– '*Nānātmaja*' means the diseases manifested by the vitiation of one *Doṣa* specifically. This means that it cannot be produced for reasons other than specific *Doṣa*.

विपादिका पाणिपादस्फुटनम्।– '*Vipādikā*' means cracks in the soles and palms

पादभ्रंशः पादस्यारोपविषयदेशादन्यत्र पतनम्।– '*Pādabhraṃśa*' means that there is a fall in place other than the desired location.

सुप्तिः पादयोर्निष्क्रियत्वं स्पर्शाज्ञता वा।– '*Supti*' means that there is either loss of movement or sensation in the feet.

वातखुड्डता 'चालुक' इति प्रसिद्धः।– '*Vātakhuḍḍatā*' is commonly defined as the popular word '*Cāluka*' or clubfoot.

गृध्रसीशब्देन गृध्रसीशूलं गृह्यते।– The term '*Gṛdhrasī*' should be interpreted as i.e. the pain in the sciatic nerve.

ऊरुस्तम्भेन च ऊरुस्तम्भनमात्रं वातजन्यत्वेन गृह्यते।– The term '*Ūrustambha*' should be specifically interpreted as the stiffness of the thigh due to the vitiation of *Vāta*.

एवं कर्णाक्षिशूलयोः शूलमात्रम्।– Here *Karṇākṣi Śūlayoḥ* should be understood as pain in the ear, pain in the eye etc. are all due to *Vāta* only.

वातजातीसारेऽपि विड्भेदो वातजः।– Here *Vātaja Atīsāra* also should be known as excretion of watery stools with pain, but not the disease *Vātātīsāra*.

एवं च न गृध्रस्यादीनां सामान्यजत्वं, यथोक्तांशस्य केवलवातजन्यत्वात्।– Likewise, '*Gṛdhrasī*' and other conditions are not the diseases of general type. They are being manifested exclusively from the vitiation of the *Vāta* alone.

उदरस्यावेष्टनमिवोदरावेष्टः।– '*Udarāveṣṭā*' refers to feeling something wrap around the abdomen.

अशब्दश्रवणं शब्दाभावेऽपि शब्दश्रवणम्।– '*Aśabdaśravaṇaṃ*' means to hear some sounds without sound.

उच्चैःश्रुतिः तारस्वरमात्रश्रवणम्, अल्पशब्दस्य तु सर्वथैवाश्रवणम्।– '*Uccaiḥśruti*' means only listening to loud voices and not listening to low voices

बाधिर्यं शब्दमात्रस्यैवाश्रवणम्।- 'Bādhirya' means the total absence of hearing.

तिमिरं तु वातजमेव, दोषान्तरसंबन्धस्तत्रानुबन्धरूपः।- 'Timira' is only due to Vāta. But in a short time it may be associated with other Doṣās, yet they are secondary.

एकाङ्गरोगः सर्वाङ्गरोगश्चेति ज्वरादिषु उष्णत्वशीतत्वादीनां कदाचिदेकाङ्गव्यापकत्वेनैकाङ्गरोगः, तेषामेव कदाचित् सर्वाङ्गव्यापकत्वेन सर्वाङ्गरोगः; दोषान्तरसंबन्धेऽपि व्याप्त्यव्याप्ती वातकृते एव, "वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्" इति वचनात्।- 'Ekāṅga-roga' and 'Sarvāṅga-roga' is explained that feeling of heat or coldness due to fever etc. at one part of the body or all over the body. This can be due to any Doṣa but its external perception is due to Vāta only. It has been explained that wherever the clouds are taken away by wind, there it rains. Similarly wherever the Doṣās are carried away by Vāta inside the body, there they produce the symptoms.

तथा भ्रमश्च वातिकः स्मृतिमोहरूपः।- 'Bhrama' has been interpreted as Smṛtimoha i.e. confusion of memory due to Vāta.

अत्र कस्यचिदङ्गस्य पादादेः शूलादयोऽभिहिता न हस्तादीनां; तत्र येऽभिहितास्ते प्रधानभूताः प्रायोभावित्वेन, अनुक्तास्तु वातविकाराणामपरिसंख्येयत्वेन ग्राह्याः।।- Here pain in leg, feet etc. only few are quoted but not the arms etc. Enumeration of Nānātmaja Vikāra in this context is based on the commonly seen symptoms only. Thus there is no restriction of incorporating the other conditions into the group of Nānātmaja. The reason for not described everything here is because they are innumerable.

Inherent Qualities and Actions of Vāta [12]

सर्वेष्वपि खल्वेतेषु वातविकारेषूक्तेष्वन्येषु चानुक्तेषु वायोरिदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं, यदुपलभ्य तदवयवं वा विमुक्तसन्देहा वातविकारमेवाध्यवस्यन्ति कुशलाः; तद्यथा- रौक्ष्यं शैत्यं लाघवं वैशद्यं गतिरमूर्तत्वमनवस्थितत्वं चेति वायोरात्मरूपाणि; एवंविधत्वाच्च वायोः कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः; तद्यथा- स्रंसभ्रंसव्याससङ्गभेदसादहर्षतर्षकम्पवर्तचालतोदव्यथाचेष्टादीनि, तथा खरपरुषविशदसुषिरारुणवर्णकषायविरसमुखत्वशोषशूलसुप्तिसङ्कोचनस्तम्भनखञ्जतादीनि च वायोः कर्माणि; तैरन्वितं वातविकारमेवाध्यवस्येत्॥12॥

- In all types of Vāta disorders which are mentioned here and also not mentioned here have the following the natural inherent qualities and actions wholly or partially. Thus it is not difficult for a wise physician to diagnose the Vātik disorders without any doubt.
-Raukṣya (roughness), Śaitya (coolness), Laghu (lightness), Vaiśadya (non-sliminess), Gati (movement), Amūrtatva (shapelessness) and Anavasthitatva (instability) etc. are natural inherent qualities of Vāta.
- The Vāta which has these inherent properties transmits in different parts of the body and performs the following actions. Sraṃsa (looseness), Bhraṃśa (dislocation), Vyāsa (expansion), Saṅga (obstruction), Bheda (separation), Sāda (depression), Harṣa (excitation), Tarṣa (desire), Kampa (tremors), Varta (circular movement), Cāla (vibration), Toda (piercing pain), Vyathā (aching pain), Khara (coarseness), Paruṣa (roughness), Viśada (non-sliminess), Suṣira (porousness), Aruṇa-varṇa (reddishness), Kaṣāya-virasa-mukhatva (astringent taste and tastelessness in the mouth), Śoṣa (wasting), Śūla (colic), Supti (numbness), Saṅkoca (contraction), Stambha (rigidity) and Khañja (lameness). These are all the features that help an intelligent physician to fully diagnose Vāta disorders.

Cakrapāṇi:

वायोरिदमित्यादौ वायोरिदमात्मरूपं स्वरूपम्।- 'Vāyoridam' means Ātmarūpaṃ i.e. the specific characteristic features of Vāta.

अपरिणामीति सहजसिद्धं नान्योपाधिकृतमित्यर्थः।- 'Apariṇāmi' means natural and it is not being produced by any other agent.

कर्मणश्चेति विकृतस्य वायोः कर्मणः।- 'Karma' refers to the abnormal functions of Vāta in the present context.

स्वलक्षणमिति आत्मीयं लक्षणम्। अत्राप्यपरिणामीति संबध्यते; अपरिणामीति पित्तश्लेष्मसंबन्धनिरपेक्षं, न तु शरीरावयवानपेक्षमिति; यतः ब्रूते- तं तं शरीरावयवमाविशतः इति; अत एव च स्रंसादीनां शरीरावयवापेक्षत्वेन न सर्वदा भावः।- 'Svalakṣaṇa' means natural features of Vāta and not associated with Pitta and Kapha and though not irrespective of body parts; as it said "entering into respective body parts". Thus Sraṃsa etc. don't always occur according to body part.

एवं च पित्तश्लेष्मणोरपि चात्मरूपादि व्याख्येयम्।- In the same way the Ātma-Rūpa of Pitta and Kapha should also be understood.

अमूर्तत्वमिति अदृश्यत्वम्।-'Amūrtam' means invisibility.

एवंविधत्वादिति रौक्ष्यादियुक्तत्वाद्वायोरिति संबन्धः।- In this way Raukṣya and other qualities are related to Vāta.

स्रंसः किंचित्स्वस्थानचलनम्,- 'Sraṃsa' means slight displacement.

भ्रंशस्तु दूरगतिः।- 'Bhraṃśa' means more degree of displacement.

व्यासः विस्तरणम्।- 'Vyāsa' means expansion or dilatation

हर्षः वायोरनवस्थितत्वेन प्रभावाद्वा क्रियते।- 'Harṣa' is produced by the instability or effect of Vāta.

वर्तुलीकरणं वर्तः।- 'Varta' means Vartulīkāraṇa i.e. circular

चालः स्पन्दः।- 'Cāla' means Spanda i.e. throbbing.

रसवर्णौ वायुना रसवर्णरहितेनापि प्रभावात् क्रियेते।।- Despite the absence of taste and color in the Vāta, it produces due to its specific action.

General Principles of Treatment for Vāta Disorders [13]

तं मधुराम्ललवणस्निग्धोष्णैरुपक्रमैरुपक्रमेत, स्नेहस्वेदास्थापनानुवासननस्तःकर्मभोजनाभ्यङ्गोत्सादनपरिषेकादिभिर्वातहरैर्मात्रां कालं च प्रमाणीकृत्य; तत्रास्थापनानुवासनं तु खलु सर्वत्रोपक्रमेभ्यो वाते प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एव पक्वाशयमनुप्रविश्य केवलं वैकारिकं वातमूलं छिनत्ति; तत्रावजितेऽपि वाते शरीरान्तर्गता वातविकाराः प्रशान्तिमापद्यन्ते, यथा वनस्पतेर्मूले छिन्ने स्कन्धशाखाप्ररोहकुसुमफलपलाशादीनां नियतो विनाशस्तद्वत्॥13॥

In general, the following measures should be taken for the management of the Vāta.

- Administration of the drugs having the properties such as Madhura (sweet), Amla (sour), Lavaṇa (salt), Snigdha (unctuous) and Uṣṇa (hot).
- Therapeutic procedures like Sneha (oleation therapy), Sveda (fomentation),

Āsthāpanavasti (decoction enemata), *Anuvāsanavasti* (enemata with unctuous substance), and *Nasyakarma* (nasal administration), *Abhyaṅga* (massage), *Utsādana* (unction) and *Pariṣeka* (effusion) with *Vātahara* drugs and *Bhojana* (diet having *Vātahara* properties) and all the above measures should be employed considering proper dosage and time.

➤ Among all the above measures *Āsthāpanavasti* and *Anuvāsanavasti* are considered to be the best treatment modalities for the management of *Vāta* disorders, because the administered drug directly reaches the colon and strikes at the very root of the *Vāta* and controls the *Vāta* present anywhere in the body and relieves all types *Vātaroga*. As the root of the tree is cut, the trunk, branch, leaves, flowers and fruits are destroyed, in the same way, enema therapy is used to cure the diseases afflicting the entire body.

Cakrapāṇi:

प्रस्तावागतत्वेन चिकित्सासूत्रमाह- तं मधुरेत्यादि।- In the context of *Vāta Vikāra*, the author has presented the general line of treatment for *Vāta* by starting the verse with the term '*Madhura*'.

आदित एवेति शीघ्रमेव।- '*Ādita*' refers to immediately.

केवलं वैकारिकमिति सकलविकारकारकम्।।- '*Kevalaṃ Vaikārikaṃ*' means all the types of disorders of *Vāta*.

40 Types of Nānātmaja Pitta Vikāra [14]

तत्र वातमूर्च्छाये श्यावारुणा छाया रिष्टरूपत्वान्मरणाय स्याद् वायव्यत्वादिति चोद्यं कुर्वन्ति; उक्तं हि- "वायव्या सा विनाशाय क्लेशाय महतेऽपि वा" (इं. अ. 7) इति। तत्र, अनिमित्ता हि छाया रिष्टं न तु दृश्यमाननिमित्ता, इह च वातसंबन्धो दृश्यत एव निमित्तं; किंवा "क्लेशाय महतेऽपि वा" इति वचनादेव वायव्यच्छायाया मारकत्वं व्यभिचरितम्।- Some scholars opined that blackish or reddish discoloration of the skin represents a bad prognostic sign, because such complexions are caused by *Vāta*. It is also quoted in the 7[th] chapter of *Indriyasthāna* that "the appearance blackish or reddish discoloration of the skin is indicative of death" vide verse no 13. However this is not acceptable here, because such discoloration can be considered as a bad prognostic sign when it occurs without any morbid cause; whereas here the alteration of complexion is happened due to vitiation of *Vāta*, which is quite evident.

Hence *Vātaja Mūrcchā* may cause severe trouble and not death as mentioned by the author himself.

तमोभिर्घनैश्चेति तमोघनैः; किंवा तमोभिरेव घनैः।- '*Tamoghanaiḥ*' means surrounded by black clouds.

विना बीभत्सचेष्टितैरिति दन्तखादनाङ्गविक्षेपणादिकं विना।- '*Vinā bībhatsa ceṣṭitaiḥ*' means without having the abnormal movements like grinding of teeth (*Danta-khādana*), throwing out limbs (*Aṅga-vikṣepaṇa*) etc.

Etio-pathogenesis – Signs & Symptoms and Management of Saṃnyāsa [42]

दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्।
स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्विना॥42॥

The conditions such as *Mada* and *Mūrcchā* will be automatically subsided immediately after the intensity of *Doṣās* reduces. But *Saṃnyāsa* cannot be controlled without the application of proper medication.

Saṃprāpti & Lakṣaṇa of Saṃnyāsa [43-45]

वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनसंश्रिताः॥43॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्वियुज्यते शीघ्रं मुक्त्वा सद्यःफलाः क्रियाः॥44॥
दुर्गेऽम्भसि यथा मज्जद्भाजनं त्वरया बुधः।
गृह्णीयात्तलमप्राप्तं तथा संन्यासपीडितम्॥45॥

- The *Doṣās* gets aggravated extensively due to the specific causative factors and afflicts the actions of speech, body and mind by localizing at the vital parts of the body i.e. heart and brain and weaken the person and make complete loss of consciousness.
- This state is known as *Saṃnyāsa*. Whenever a person is suffering from the disease *Saṃnyāsa*, he looks like stick and as if he is dead.
- Thus one has to take immediate steps for the recovery of such person, otherwise he will collapse.
- As an intelligent person grabs the pitcher drowning in deep water before the touch of the bottom and pulls it out; similarly the physician should be hurry up in treating of a person suffering from *Saṃnyāsa*.

Management of Saṃnyāsa [46-53]

अञ्जनान्यवपीडाश्च धूमाः प्रधमनानि च।
सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे॥46॥

लुञ्चनं केशलोम्नां च दन्तैर्दशनमेव च।
आत्मगुप्तावघर्षश्च हितं तस्यावबोधने॥47॥

The following are measures to be taken for the revival of consciousness in *Saṃnyāsa*.

- *Añjana* (application of collyrium).
- *Avapīḍāna Nasya* (nasal drops).
- *Dhūmapāna* (medicated smokes).
- *Pradhamana Nasya* (blowing of medicated powder into the nostrils).
- *Sūcī todana* (pricking with needles).
- *Dāha* (burning).
- *Pīḍā Nakhāntare* (cause pain in the nail bed).
- *Luñcanaṃ Keśa-lomnāṃ* (plucking hair from the scalp and body).
- *Dantairdaśanam* (biting with tooth).
- *Ātmaguptāvagharṣana* (rubbing the body with *Ātmaguptā*).



Saṃnyāsa

संमूर्च्छितानि तीक्ष्णानि मद्यानि विविधानि च।
प्रभूतकटुयुक्तानि तस्यास्ये गालयेन्मुहुः॥48॥
मातुलुङ्गरसं तद्वन्महौषधसमायुतम्।
तद्वत्सौवर्चलं दद्याद्युक्तं मद्याम्लकाञ्जिकैः॥49॥
हिङ्गूषणसमायुक्तं यावत् संज्ञाप्रबोधनम्।

The following are some other measures useful for the revival of consciousness.

- Different types of strong alcoholic beverages should be mixed with severe pungent substances and administer internally at frequent intervels.
- The physician should also administer.
  1. *Mātuluṅga rasa* mixed with *Mahāuṣadha* (dry ginger). or
  2. *Sauvarcālalavaṇa*, *Hiṅgu* and *Ūṣaṇa* (*Marica*) with *Madya* or *Amla Kāñjika* (sour gruel) internally till the patient regains the consciousness.

प्रबुद्धसंज्ञमन्नैश्च लघुभिस्तमुपाचरेत्॥50॥
विस्मापनैः स्मारणैश्च प्रियश्रुतिभिरेव च।
पटुभिर्गीतवादित्रशब्दैश्चित्रैश्च दर्शनैः॥51॥
स्त्रंसनोल्लेखनैर्धूमैरञ्जनैः कवलग्रहैः।
शोणितस्यावसेकैश्च व्यायामोद्घर्षणैस्तथा॥52॥
प्रबुद्धसंज्ञं मतिमाननुबन्धमुपक्रमेत्।
तस्य संरक्षितव्यं हि मनः प्रलयहेतुतः॥53॥

After the revival of consciousness, the physician should be advised the patient to adopt the following measures:

- Light food should be given (*Laghu Āhāra*).
- His mind should be diverted by means of surprising events (*Vismāpana*).
- Making to remember pleasant incidents (*Priya śruti Smāraṇa*).
- He should be made to hear pleasant songs, music and other sounds and wonderful sights (*Priyaśruti*).
- *Sraṃsana* (purgation).
- *Ullekhana* (emesis).
- *Dhūmapāna* (medicated smoking).
- *Añjana* (collyrium).

- *Kavalagraha* (mouth gargles).
- *Śoṇita-avaseka* (bloodletting).
- *Vyāyāma* (physical exercises).
- *Uddharṣana* (powder massage).

These measures will be useful to divert the mind of the patient from the etiological factors and he will be remaining in the state of consciousness.

Cakrapāṇi:

संन्यासस्य मूर्च्छादिभ्यो भेदकं लक्षणमाह- दोषेष्वित्यादि।- By starting the present verse with the word '*Doṣeṣu*', the author has presented the characteristics of *Saṃnyāsa*, which are different from *Mada* and *Mūrcchā*.

कृतवेगेष्विति वेगं कृत्वा क्षीणबलेषु, वेगो हि दोषाणां बलक्षयकारणं भवति; यदुक्तं विषमज्वरे- "कृत्वा वेगं गतबला" (चि. अ. 3) इत्यादि।- Whenever the *Doṣās* are in the attacked phase they manifest the symptoms and they become weak, the patient gets relief. It is also mentioned in the context of *Viṣamajvara* that "The *Doṣās* becomes weak after getting the attack of fever" (Ca. Ci. 3 / 70).

संन्यस्यन्ति अचेष्टं कुर्वन्ति।- '*Saṃnyasyanti*' means to make the body unconscious.

प्राणायतनमिति हृदयम्।- '*Prāṇāyatana*' means the heart.

मुक्त्वेति अप्राप्य।- '*Muktvā*' means unable to get the immediate treatment.

सद्यःफला इति सद्यः प्रबोधनकारिकास्तीक्ष्णाञ्जनादिकाः।- '*Sadyaḥ phala*' means the measures that help for getting instantaneous consciousness such as *Tīkṣṇa Añjana* etc.

सूचीभिरिति च तोदनेन संबध्यते।- '*Sūcī*' is related to *Todana* i.e. pricking with needles.

संमूर्च्छितानीति मिलितानि।- '*Sammūrcchitāni*' means after properly mixed.

गालयेदिति यत्नेन मुखे प्रक्षिपेत्।- '*Gālayet*' means administration of medicine internally with effort.

सौवर्चलस्थाने केचित् सौवीरकमाहुः।- Some other scholars suggested *Sauvīraka* in place of *Sauvarcāla Lavaṇa*.

अनुबन्धं सततम्।- '*Anubandha*' means *Satata* i.e. constantly or uninterruptedly.

प्रलयहेतुत इति मोहहेतुतः।- '*Pralaya hetu*' means the cause for *Moha*.

General Treatment of Mada & Mūrcchā [54-60]

स्नेहस्वेदोपपन्नानां यथादोषं यथाबलम्।
पञ्च कर्माणि कुर्वीत मूर्च्छायेषु मदेषु च॥54॥

- The patients suffering from *Mada* and *Mūrcchā* should be treated by the administration of oleation (*Sneha*) and sudation (*Sveda*) followed by suitable *Pañcakarma* therapeutic measures.

अष्टाविंशत्यौषधस्य तथा तिक्तस्य सर्पिषः।
प्रयोगः शस्यते तद्वन्महतः षट्पलस्य वा॥55॥
त्रिफलायाः प्रयोगो वा सघृतक्षौद्रशर्करः।
शिलाजतुप्रयोगो वा प्रयोगः पयसोऽपि वा॥56॥
पिप्पलीनां प्रयोगो वा पयसा चित्रकस्य वा।
रसायनानां कौम्भस्य सर्पिषो वा प्रशस्यते॥57॥

The following drugs are useful for the management of *Mada* and *Mūrcchā*:

- *Kalyāṇaka Ghṛta* (which contains 28 drugs).
- *Mahātiktaka Ghṛta*.
- *Mahā-Ṣaṭpala Ghṛta*.
- Intake *Triphalā* with *Ghṛta*, *Kṣaudra* and *Śarkarā*.
- *Śilājatu* along with milk.
- *Pippalī cūrṇa* or *Citraka cūrṇa* with

milk.

- *Rasāyana* drugs.
- *Kaumbha Sarpi* (10 years old ghee).

रक्तावसेकाच्छास्त्राणां सतां सत्त्ववतामपि।
सेवनान्मदमूर्च्छायाः प्रशाम्यन्तिशरीरिणाम्॥58॥

- *Raktāvaseka* (bloodletting).
- Study of good treatises (*Śāstra*).
- Devotion towards spiritually enlightened good persons (*Satāṃ sattvavatām api sevana*).

Cakrapāṇi:

अष्टाविंशत्यौषधस्येति पानीयकल्याणस्य।– '*Aṣṭāviṃśati Auṣadha*' means the formula consisting of 28 drugs i.e. *Pānīya Kalyāṇaka Ghṛta*.

तिक्तस्य महतस्तथा तिक्तस्य षट्पलस्य तथा महतस्तिक्तस्येति संबन्धः; एते च तिक्तषट्पलमहातिक्तकघृते कुष्ठचिकित्सिते वक्तव्ये।– *Mahatiktaka Ghṛta*, *Tiktaka Ghṛta* and *Mahā Ṣatpala Ghṛta* are described in the context of *Kuṣṭha Cikitsā*.

कौम्भं सर्पिर्दशाब्दिकम्।।– '*Kaumbha Sarpi*' means the ghee stored for 10 years.

To Sum Up [59-60]

तत्र श्लोकौ-
विशुद्धं चाविशुद्धं च शोणितं तस्य हेतवः।
रक्तप्रदोषजा रोगास्तेषु रोगेषु चौषधम्॥59॥
मदमूर्च्छायसंन्यासहेतुलक्षणभेषजम् ।
विधिशोणितकेऽध्याये सर्वमेतत् प्रकाशितम् ॥60॥

In the chapter entitled *Vidhiśoṇitīya Adhyāya*, the author has dealt the following topics in a lucid manner - Features of Pure Blood - Features of Impure Blood - Causative Factors - Diseases caused by vitiated Blood - Treatment of Diseases caused by vitiated Blood - Causative Factors, Signs & Symptoms and the Management of *Mada*, *Mūrcchā*, *Saṃnyāsa* etc.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने विधिशोणितीयो नाम चतुर्विंशोऽध्यायः॥24॥

Thus ends the Twenty Fourth chapter of *Ślokasthāna* entitled *Vidhiśoṇitīya Adhyāya* which was composed by *Agniveśa* and redacted by *Caraka*.

समाप्तो योजनाचतुष्कः॥6॥

Thus also ends the seventh *Catuṣka* named *Yojanā Catuṣka*.

***

25 CHAPTER



Yajjaḥpuruṣīya Adhyāya

यज्जःपुरुषीयोऽध्यायः

Purpose of the Seminar 676
Proposal of Kāśipati Vāmaka 677
Opinion of Maudgalya Pārīkṣi 678
Opinion of Śaralomā 679
Opinion of Vāryovida 679
Opinion of Hiraṇyākṣa 680
Opinion of Kauśika 680
Opinion of Bhadrakāpya 681
Opinion of Bharadvāja 682
Opinion of Kāṅkāyana 683
Opinion of Bhikṣurātreya 683
Concluding Remarks by Punarvasu Ātreya 684
Doubt of Kāśipati Vāmaka 685
Reply by Punarvasu Ātreya 685
Question Raised by Agniveśa Regarding the Features of Wholesome Diets and Regimen 686
Reply by Punarvasu Ātreya 687
Another Question Raised by Agniveśa 687
Reply by Punarvasu Ātreya 688
Plurality of dietary factors 689
The Most Wholesome Dietetic Substances 691
The Most Unwholesome Dietetic Substances 693
Agrya Dravya 695
Pathyāpathya Lakṣaṇa 708
Questions raised by Agniveśa about the Āsava 710
Reply by Punarvasu Ātreya 711
Examples of 84 Types of Āsava 711
Base for the naming of Āsava 713
Properties of Āsava 715
To Sum Up 715



Chapter 25

Yajjaḥpuruṣīya Adhyāya

यज्जःपुरुषीयोऽध्यायः

अथातो यज्जःपुरुषीयमध्यायं व्याख्यास्यामः॥1॥
इति ह स्माह भगवानात्रेयः॥2॥

After *Vidhiśoṇitīya Adhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Yajjaḥpuruṣīya Adhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

यइमे योजनाचतुष्के षडुपक्रमा अभिहितास्ते ऽन्नपानापेक्षयैव व्याधिहरणे समर्थाः, अतोऽन्नपानचतुष्कोऽभिधीयते।- In the last quadrate named '*Yojanā Catuṣka*' the author has presented six types of therapies (*Ṣaḍupakrama*) in a lucid manner. In fact, these therapies can only produce the desired effect of cure of the disease when proper diet and drinks are used and therefore '*Annapāna Catuṣka*' is described.

तत्रापि संक्षेपेणान्नपानगुणाभिधायको यज्जःपुरुषीयोऽभिधीयते।- Even here the author has started a chapter titled '*Yajjaḥpuruṣīya Adhyāya*', which is briefly related to the qualities of food and drink.

तत्रादौ पुरुषव्याधिकारणनिश्चायकप्रकरणं त्वाहारगुणप्रश्नावतारार्थं तथा पूर्वोक्तषडुपक्रमणीयरोगकारणज्ञानार्थं च 'यज्जःपुरुष' इति प्रश्नं प्राधान्येनाधिकृत्य कृतोऽध्यायो यज्जःपुरुषीयो ज्ञेयः। यद्यपि 'पुरुषो यज्जः' इति प्रश्नक्रमः, तथाऽपि प्रश्नार्थोऽत्र गृहीतः।- The current chapter deals with the origin of humans and the diseases and begins with a view to identify the characteristics of food and drinks and also to elicit the causative factors of diseases to be treated by *Ṣaḍupakrama*. Although the order of the words should be '*Puruṣo yajjaḥ*', it is also said to be exact meaning from even '*Yajjaḥpuruṣīya*'.

Purpose of the Seminar [3-4]

पुरा प्रत्यक्षधर्माणं भगवन्तं पुनर्वसुम्।
समेतानां महर्षीणां प्रादुरासीदियं कथा॥3॥
आत्मेन्द्रियमनोर्थानां योऽयं पुरुषसंज्ञकः।
राशिरस्यामयानां च प्रागुत्पत्तिविनिश्चये॥4॥

Once the saints gathered together in front of Lord *Ātreya*, and the discussion about the determination of the origin of human beings (the combination of soul, senses, mind and objects) and diseases was started.

Cakrapāṇi:

प्रत्यक्षधर्मत्वं तपःप्रभावात्।- '*Pratyakṣa-dharmāṇam*' means due to penance. Lord *Ātreya* received clear knowledge due to penance.



इयमिति अग्रे वक्ष्यमाणा।- '*Iyam*' refers to the discussion that will be presented later.

कथा तत्त्वजिज्ञासार्थमन्योन्यपृच्छा।- '*Kathā*' means the discussion between the scholars to know about the real knowledge.

राशिः मेलकः, आत्मेन्द्रियमनोऽर्थसमुदाय इत्यर्थः।- '*Rāśi*' means the aggregation or collective form of *Ātma*, *Indriya*, *Manas* and the objectives sense organs.

अस्य राशेरामयानां चोत्पत्तिविनिश्चये उत्पत्तिविनिश्चयविषयिणी कथा प्रादुरासीदिति संबन्धः।- Here the discussions have been initiated to determine the origin of humans (*Rāśī-Puruṣa*) as well as diseases.

Proposal of Kāśipati Vāmaka [5-7]

तदन्तरं काशिपतिर्वामको वाक्यमर्थवित्।
व्याजहारर्षिसमितिमुपसृत्याभिवाद्य च॥5॥
किन्नु भोः पुरुषो यज्जस्तज्जास्तस्यामयाः स्मृताः।
न वेत्युक्ते नरेन्द्रेण प्रोवाचर्षीन् पुनर्वसुः॥6॥
सर्व एवामितज्ञानविज्ञानच्छिन्नसंशयाः।
भवन्तश्छेत्तुमर्हन्ति काशिराजस्य संशयम्॥7॥

- Then King *Vāmaka*, the inhabitant of *Kāśi*, who was well-versed in medical science, with respect, participated in the meeting of the *Ṛṣīs* and asked the following question.
- Are diseases also originated from the same source as humans or not?
- On this, Lord *Punarvasu* directed the *Ṛṣīs* in this way, "You are fully aware of your doubts on the basis of your unlimited knowledge and skills, you are capable of clarifying the point raised by the King of *Kāśi*".

Kāśī Rāja Vāmaka

Cakrapāṇi:

तामेव परस्परप्रश्नरूपां कथां दर्शयति- तदन्तरमित्यादि।- The author has presented the start of discussion between the sages in the current verse by starting with the word '*Tadantaraṃ*'.

अन्तरशब्दः कालवचनः; यथा- "अपस्माराय कुर्वन्ति वेगं किंचिदथान्तरम्' (चि. अ. 10) इति; किंचित्कालमित्यर्थः; तेन तदन्तरमिति कथारम्भकाल इत्यर्थः।- The term '*Antara*' refers to the time as it is mentioned in the context of *Apasmāra* also that "Attacks in *Apasmāra* is seen for few time" (Ca. Ci. 10/13). Here '*Tat-Antara*' means at the time of the beginning of the discussion.

काशी वाराणसी तस्याः पतिः, तेषां बहुत्वाद्विशेषणं- वामक इति।- *Kāśi* means *Vārāṇasī*. *Kāśipati* means the king of *Kāśi*. In order to highlight the importance of the king of *Kāśi*, an adjective '*Vāmaka*' has been used for him.

यस्माज्जातो यज्जः; तत एव पुरुषजनकात् कारणाज्जातास्तज्जाः।- '*Yajjaḥ*' means born from which material. *Tajjāḥ* means the one born from the same material which is responsible for the creation of humans.

न वेति अन्यतः पुरुषो जायतेऽन्यतश्च तस्य रोगा इत्यर्थः।- '*Na-vā*' means whether humans and diseases are originated by same causes or due to other reasons?

नरेन्द्रेणेति काशिपतिनाम्ना राजर्षिणा।- '*Narendra*' means *Rājarṣi*, who is the king of *Kāśi*.

Cakrapāṇi:

अमिताभ्यां ज्ञानविज्ञानाभ्यां छिन्नः संशयो येषां ते तथा।- Because of the unlimited knowledge and intelligence these doubts will be clarified.

Yenapoya Ayurveda Medical College A9105

"भवन्तश्छेत्तुमर्हन्ति काशिराजस्य संशयम्" इति पाठः सुगमः।- "As you are all endowed with unlimited knowledge and intelligence you have the ability to remove the doubts of the king *Kāśi*". This version is clear.

In another Mss. it has been quoted as under.

'भवन्तोऽर्हन्ति नश्छेत्तुं काशिराजे च संशयम्' इति तु पाठे, नोऽस्माकं काशिराजेऽस्मन्मध्यगत इत्यर्थः। एतेन

स्वपक्षे काशिराजे न व्यामोहवचनं वक्तव्यमिति शिक्षयति। चकारेणान्येषां च ऋषीणां संशयं समुच्चिनोति। अन्ये तु, नोऽस्माकं संशयं काशिराजे च संशयमिति व्याख्यानयन्ति। संशयद्वये चैकोऽत्र ऋषीणामात्मेन्द्रियेत्यादिना श्लोकेन दर्शितः संशयः, स च पुरुषस्यामयानां च प्रागुत्पत्तिं प्रथमोत्पत्तिं प्रतीति व्याख्यानयन्ति; द्वितीयस्तु काशिपतेर्यथोक्त एव॥- '*Ca kāra*' refers to that the doubt is not only of *Kāśi Rāja*, it is also among we people. Some others explain that "This is not a doubt of us, but it is the doubt of *Kāśi Rāja* only."

The two types of doubts are

1. The origin of humans and disease which is mentioned in the verse no. 4
2. The doubt expressed by *Kāśipati*.

Opinion of Maudgalya Pārīkṣi [8-9]

पारीक्षिस्तत्परीक्ष्याग्रे मौद्गल्यो वाक्यमब्रवीत्।
आत्मजः पुरुषो रोगाश्चात्मजाः कारणं हि सः॥8॥
स चिनोत्युपभुङ्क्ते च कर्म कर्मफलानि च।
नह्यृते चेतनाधातोः प्रवृत्तिः सुखदुःखयोः॥9॥

Pārīkṣi, a descendent of *Maudgala* has opined as follows:

- Just as a person is born from the soul (*Ātmā*), so is the disease from the soul itself.
- In this way the soul is the root cause of diseases along with human beings.
- The soul alone can enjoy actions and their consequences, respectively. Joy and suffering are never without the soul.

Cakrapāṇi:

आत्मजः पुरुष इत्यादिप्रश्नद्वयस्योत्तरं; तत्र पूर्वप्रश्नस्य पुरुषस्यामयानां च कुत उत्पत्तिरित्येवंरूपस्य प्रश्नस्योत्तरं आत्मजः पुरुषो रोगाश्चेति, काशिपतिप्रश्नमात्रेऽप्युत्तरमेतत् यत एवात्मतः पुरुषो जायते तत एव रोगा इत्यर्थरूपमेव। प्रश्नोत्तरता त्वस्य ग्रन्थस्य सुगमैव।- Two questions raised earlier have been explained in the present verse. The first question is what is the origin of humans and diseases? It is being answered that both humans and diseases are originated from *Ātmā* (the soul).

The second question raised by *Kāśipati* is whether the origin of both humans and diseases is the one and the same or the different? The answer given for the first question is also sufficient for the second question.

कारणत्वे हेतुमाह- स चिनोतीत्यादि। चिनोति कर्म, कर्मफलानि च शरीरारोग्यविकारादीनि भुङ्क्त इति योजना। कर्मसहायस्यात्मनः शरीरविकारादिकर्तृत्वात् कारणत्वमिति भावः।- The cause for the origin is explained that healthy and diseased states both are depend upon the deeds of a person. It is the *Ātmā* which does the deeds and enjoys its fruits. In other words the *Ātmā* through its deeds is the cause for the origin of man and disease.

The reason for this is that the healthy and diseased state relies on the past actions of the person. The *Ātmā* is that which performs actions and also experiences its results. In other words the *Ātmā* along with its actions is the cause of humans and disease.

एतदेव व्यतिरेकेणाह- नह्यृत इत्यादि। चेतनाधातुः आत्मा। सुखदुःखयोरिति सुखदुःखसाधनयोः नीरुक्शरीरविकारयोरित्यर्थः॥- Nothing is present in the absence of the soul (*Ātmā*); there will be no pleasure and pain. As the soul is a means of happiness and misery, no person can find happiness or disease in its absence.

Opinion of Śaralomā [10-11]

शरलोमा तु नेत्याह नह्यात्माऽऽत्मानमात्मना।
योजयेद्व्याधिभिर्दुःखैर्दुःखद्वेषी कदाचन॥10॥
रजस्तमोभ्यां तु मनः परीतं सत्त्वसंज्ञकम्।
शरीरस्य समुत्पत्तौ विकाराणां च कारणम्॥11॥

After hearing the opinion of *Pārīkṣi*, *Śaralomā* has expressed his views as under:

- As the soul (*Ātmā*) is being holds its hatredness towards all the miseries by its very nature; and thus it cannot be regarded as responsible for the manifestation of diseases or sorrows.
- In my view, the mind (*Manas*) which is surrounded by *Rajas* and *Tamas* is the cause for the manifestation of diseases along with humans.

Opinion of Vāryovida [12-13]

वार्योविदस्तु नेत्याह न ह्येकं कारणं मनः।
नर्ते शरीराच्छारीररोगा न मनसः स्थितिः॥12॥
रसजानि तु भूतानि व्याधयश्च पृथग्विधाः।
आपो हि रसवत्यस्ताः स्मृता निर्वृत्तिहेतवः॥13॥

After listening to the views of *Śaralomā*, *Vāryovida* expressed objection to the earlier version and stated his opinion as follows.

- The mind (*Manas*) cannot be the only cause. Without the body, there can be no physical diseases and no mind.

- Actually living creatures and diseases are caused by *Rasa* (the first nutrient substance formed from food). Since *Ap* (water) is endowed with *Rasa Dhātu*, it is the eventual cause of diseases along with humans.

Cakrapāṇi:

मन इत्युक्ते मन्यतेऽनेनेति व्युत्पत्त्याऽऽत्माऽपि शङ्क्येत, तदुक्तं- सत्त्वसंज्ञकमिति।- In general the definition of '*Manyatae Anena iti*' can also be suspected to be taken as mind (*Manas*) and soul (*Ātmā*). To clarify the doubt, the commentator has specifically mentioned the word '*Sattva*' to understand it as mere *Manas*.

नर्ते शरीराच्छारीरा वातादिजन्याः शोषादयस्तिष्ठन्ति; तथा न मनसः स्थितिः, ऋते शरीरादिति योज्यम्। रजस्तमःपरीतस्य हि मनसो नित्यं शरीर एव स्थितिः; यत्तु निर्दोषं मनस्तत्तु न पुरुषस्य नापि च व्याधेः कारणमिति भावः।- Neither the diseases such as *Śoṣā* etc. which are manifested by *Vāta* and the other *Doṣās* nor the *Manas* cannot be exist without the body. *Manas* associated with *Rajas* and *Tamas* is always present within the body. When the mind is in the correct state neither human are born nor the diseases.

रसजानीत्यादौ स्मृता निर्वृत्तिहेतव इति व्याधिपुरुषयोः।- '*Rasajāni*' means the disease and the man both are originate from *Rasa*.

एतेन व्याधिपुरुषजनकरसकारणत्वेनापः कारणकारणतया पुरुषविकारयोः कारणं भवन्ति। किंवा आपो निर्वृत्तिहेतव

इति रसानां; किंवा यस्माद्रसवत्य आपस्तस्मात्ता निर्वृत्तिहेतव इति योजना।।- This means that the cause of human origin and disease is the *Rasa*, which refers to '*Ap*' because it is the source of the formation of *Rasa*. Otherwise it can be understood as mentioned below. As '*Ap*' is the basis of the formation of *Rasa* and '*Ap*' is endowed with the *Rasa*; thus, the *Rasa* is the cause of humans and diseases.

Opinion of Hiraṇyākṣa [14]

हिरण्याक्षस्तु नेत्याह न ह्यात्मा रसजः स्मृतः।
नातीन्द्रियं मनः सन्ति रोगाः शब्दादिजास्तथा॥14॥
षड्धातुजस्तु पुरुषो रोगाः षड्धातुजास्तथा।
राशिः षड्धातुजो ह्येष सांख्यैराद्यैः प्रकीर्तितः॥15॥

Hiraṇyākṣa did not accept the opinion of *Vāryovida* and presented his version as follows:

- Both *Ātmā* and *Manas* are not originated from *Rasa* because they are beyond the reach of perception.
- Similarly all the diseases are not originated from *Rasa*; they are also produced by *Asātmendriyārtha Saṃyoga*.
- Thus *Hiraṇyākṣa* said that along with humans, diseases are also born with *Ṣaḍ-Dhātu* (*Pañcamahābhūta* plus *Ātmā*) as proposed by *Sāṅkhya* school of thought.

Cakrapāṇi:

नह्यात्मेत्यादौ नातीन्द्रियं मनो रसजं स्मृतमिति योजना; यस्मादतीन्द्रियं मन आत्मा चातीन्द्रियः, तस्मात्र रसजौ; रसाद्धि जायमानं कारणगुणानुविधानादैन्द्रियकं स्यादित्यर्थः।- Both the *Ātmā* and *Manas* are not perceived by the sense organs, they cannot be considered as *Rasaja*. If they are accepted as *Rasaja*, they cannot be comes under *Atīndriya* category, as the factor doesn't leave the character of its originator and *Rasa* is the object of sense organs.

हेत्वन्तरमाह- सन्तीत्यादि। अहितशब्दरूपादिजन्ये विकारे न रसः कारणमित्यर्थः।- By the mention of the word '*Santi*', the author has also shown another reason to not include *Ātmā* and *Manas* as *Rasaja*. The diseases are manifested by means of unwholesome sounds and vision etc. and not by *Rasa*. Thus it is clear that *Ātmā* and *Manas* do not originate from *Rasa*.

आत्मा पृथिव्यादीनि च पञ्च षड् धातवः। यदुक्तं- "खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः" (शा. अ. 1) इति।।- '*Ṣaḍ-dhātavaḥ*' means the *Ātmā* along with *Pṛthvī* and the other *Pañcamahābhūta*. It is clearly mentioned in the 1st chapter of *Śārīrasthāna vide* verse no 16 that the word *Puruṣa* means *Ṣaḍdhātuja* i.e. the combination of *Ākāśa*, *Vāyu*, *Agni*, *Jala*, *Pṛthvī* and the sixth one is *Ātmā*.

Opinion of Kauśika [16-17]

तथा ब्रुवाणं कुशिकमाह तन्नेति कौशिकः।
कस्मान्मातापितृभ्यां हि विना षड्धातुजो भवेत्॥16॥
पुरुषः पुरुषाद्गौर्गोरश्वादश्वः प्रजायते।
पित्र्या मेहादयश्चोक्ता रोगास्तावत्र कारणम्॥17॥

Kauśika did not accept the argument of *Kuśika* (*Hiraṇyākṣa*) and expressed his views as follows:

- Without the parents' involvement, how can creatures will be born out of *Ṣaḍ-Dhātu*?

- It is the fact that a person will be born from another person; similarly a cow will be born from another cow; and a horse will be born from another horse.
- It is also seen that *Prameha*, *Kuṣṭha*, *Arśas* etc. are hereditary diseases.
- Thus parents are the cause for the formation of humans and diseases.

Cakrapāṇi:

कुशिक इति हिरण्याक्षस्य नाम।- '*Kuśika*' means the other name of *Hiraṇyākṣa*.

कस्मादिति आक्षेपे। मातापित्रनपेक्षित्वे सर्वप्राणिषु षड्धातुसमुदायस्य विद्यमानत्वेन नरगोऽश्वादिभेदो न स्यादिति भावः।- '*Kasmāt*' means how it will happen? The word '*Kasmāt*' has been used here for the purpose of questioning "How the creatures are born through the *Ṣaḍ-Dhātu* without the involvement of their parents?" Without the involvement of parents, if all the creatures are born out of *Ṣaḍ-Dhātu*, diversity of various organisms like man, cow, horse etc. will not be exists.

हेत्वन्तरमाह- पित्र्या मेहादयश्चोक्ता इति। पितृतोऽपत्यं गच्छन्तीति पित्र्याः; आदिशब्देन कुष्ठार्शःप्रभृतयो ग्राह्याः। स्वपक्षं दर्शयति- तावत्र कारणमिति; तौ मातापितरौ।।- The sage *Hiraṇyākṣa* has also quoted another example to prove his logic in this way. पित्र्या मेहादय means *Meha*, *Kuṣṭha*, *Arśas* etc. are transmitted in children from the parents. Thus he concludes his version by saying that parents are responsible for the cause of humans and diseases.

Opinion of Bhadrakāpya [18-19]

भद्रकाप्यस्तु नेत्याह नह्यन्धोऽन्धात् प्रजायते।
मातापित्रोरपि च ते प्रागुत्पत्तिर्न युज्यते॥18॥
कर्मजस्तु मतो जन्तुः कर्मजास्तस्य चामयाः।
नह्यृते कर्मणो जन्म रोगाणां पुरुषस्य वा॥19॥

The sage *Bhadrakāpya* did not agree with the opinion of *Kauśika* and presented his version as follows:

- If *Kauśika*'s opinion is accepted, children of blind parents can also be blind. But it is not happening so.
- Apart from this how could be the parents are born at the primordial stage?
- *Bhadrakāpya* has concluded his argument by saying that the humans and diseases are born out of *Karma* (past actions) only. Therefore without the effect of *Karma*, neither man is born nor does the disease originate.

Cakrapāṇi:

न ह्यन्ध इत्यादि। मातापितृकारणत्वेऽन्धेन जातोऽन्धः स्यादित्यर्थः। हेत्वन्तरमाह- मातापित्रोरपीत्यादि। ते तव मातापितृकारणवादिनः, प्रागिति सर्गादौ मातापित्रोरुत्पत्तिर्न स्यात्; सर्गादौ निःशरीरिणि आदिभूतयोर्मातापित्रोरभावादुत्पादो नोपपन्न इति भावः।।- The version of *Hiraṇyākṣa* has been condemned by *Bhadrakāpya* as mentioned

under. If the parents are the cause of human origin, then the progeny of blind parents also should be blind. In order to prove his logic, he has also argued that if the parents are the cause of the origin of man, then how did these parents originate in the beginning of universe? Thus the opinion of *Hiraṇyākṣa* is wrong.

Opinion of Bharadvāja [20-21]

भरद्वाजस्तु नेत्याह कर्ता पूर्वं हि कर्मणः।
दृष्टं न चाकृतं कर्म यस्य स्यात् पुरुषः फलम्॥20॥
भावहेतुः स्वभावस्तु व्याधीनां पुरुषस्य च।
खरद्रवचलोष्णत्वं तेजोन्तानां यथैव हि॥21॥

Bharadvāja contradicted the opinion of *Bhadrakāpya* and put forth his version as follows.

- It is a known fact that *Karma* always recognizes the existence of an agent. No action is taken without the existence of a person.
- Apart from this, there is no evidence to show that *Karma* may result in the creation of living being.
- Thus *Bharadvāja* concluded that *Svabhāva* (nature) is the root cause of diseases along with the origin of humans.
- To reinforce his statement, he has given an example that the properties of *Khara* (roughness), *Drava* (liquidity), *Cala* (mobility) and *Uṣṇa* (hotness) are naturally present in *Pṛthvī*, *Ap*, *Vāyu* and *Tejo Mahābhūtās* respectively.

Cakrapāṇi:

कर्ता पूर्वं हीत्यादि।- By the mention of the words '*Kartā Pūrvaṃ Hi*', the author has presented the version of *Bharadvāja* in this verse.

कर्मणः पूर्वं कर्ता 'भवति' इति शेषः।- Before the action (*Karma*), there must be a person (*Kartā*) for doing all these actions.

येन कर्मणा स पुरुषः कर्तव्यः, तस्य कर्मणः पुरुषपूर्वभावित्वात् कारणत्वं स्वीकर्तव्यं; ततश्च स चेद्विना कर्म पुरुषोऽभूत् , तत् कथं पुरुषस्य कर्म कारणमिति भावः। अथ शङ्क्यते अकृतमेवादौ पुरुषजनकं कर्म भविष्यतीत्याह- दृष्टं न चेत्यादि। अकृतं कर्म न दृष्टं, प्रमाणेन नोपलब्धमित्यर्थः। यस्माच्छुभाशुभकर्म क्रियाजन्यमेव धर्माधर्मरूपं सर्वं भवतीति भावः।- This means that an agent should be present before action for its performance, from which the person has been born. Therefore the role of a person (*Kartā*) should be accepted in doing actions (*Karma*). If *Karma* is considered to be the cause of a man's origin, then how will that action be done without any agent? If it is being suspected that the action taken by an agent is the reason of the origin of a man, and this action is not visible and cannot be proved by reasoning. Thus the result of good and bad deeds will be present in virtue and unrighteous form, respectively.

भावहेतुः उत्पत्तिहेतुः।- '*Bhāvahetu*' means cause of origin.

स्वाभाविकत्वे दृष्टान्तमाह- खरेत्यादि। तेजोऽन्तानामिति "खरद्रवचलोष्णत्वं भूजलानिलतेजसाम्" (शा. अ. 1) इत्यादिवक्ष्यमाणक्रमेण भवेत्।- It is said that nature (*Svabhāva*) is the origin of man by quoting the example of *Khara* etc. *Khara*, *Drava*, *Cala* and *Uṣṇa* are the features of *Pṛthvī*, *Ap*, *Vāyu* and *Agni Mahābhūtās* respectively which are their natural attributes (Ca. Sā. 1 / 29).

Opinion of Kāṅkāyana [22-23]

काङ्कायनस्तु नेत्याह न ह्यारम्भफलं भवेत्।
भवेत्स्वभावाद्भावानामसिद्धिः सिद्धिरेव वा॥22॥
स्रष्टा त्वमितसङ्कल्पो ब्रह्मापत्यं प्रजापतिः।
चेतनाचेतनस्यास्य जगतः सुखदुःखयोः॥23॥

After listening to *Bharadvāja's* views, *Kāṅkāyana* has expressed objection and has given his opinion as follows.

- If *Svabhāva* (nature) is considered to be the root cause of the origin of living beings, then the individual's efforts such as righteous acts, cultivation, study etc. all become useless.
- Apart from this, the person's success or failure also depends on nature but not on his actions. But it is not happening so.
- Therefore *Kāṅkāyana* said that *Brahmā's* son *Prajāpati* will create animate and inanimate things with his infinite creative powers and will cause the happiness and misery of the world.
- Thus he concluded that the creator is the cause of the diseases along with the origin of humans.

Opinion of Bhikṣurātreya [24-25]

तन्नेति भिक्षुरात्रेयो न ह्यपत्यं प्रजापतिः।
प्रजाहितैषी सततं दुःखैर्युञ्ज्यादसाधुवत्॥24॥
कालजस्त्वेव पुरुषः कालजास्तस्य चामयाः।
जगत् कालवशं सर्वं कालः सर्वत्र कारणम्॥25॥

Bhikṣurātreya denied the version of *Kāṅkāyana* and expressed his views in this way.

- Since *Prajāpati* is interested in the good of the whole creation and how can he bring suffering to mankind? Hence he cannot be the cause for the diseases.
- *Bhikṣurātreya* opined that the entire universe is depending on *Kāla* and hence all the living beings and their diseases are caused by *Kāla* (time) only. Thus *Kāla* is responsible for everything.

Cakrapāṇi:

स्वभावादित्यत्र आदौ 'यदि' इत्यध्याहर्तव्यं; तेन यदि स्वभावादेव भावानां विकारशरीरादीनां सिद्ध्यसिद्धी भवतः, तदा आरम्भफलं न भवेत्, स्वाभाविकत्वाद्भावानां; य इमे लोकशास्त्रसिद्धा यागकृष्यध्ययनाद्यारम्भास्ते निष्प्रयोजना भवेयुः, अकारणत्वादित्यर्थः।

- If every action is done by nature, including the origin or non-origin of the body, then any action to start any work will become useless.
- Because if the action is done by nature, then functions like sacrificial rituals, agriculture, studies etc. will be useless.
- There should be a reason for every action, and if there are actions due to nature, the

cause will be lost. In such circumstances, the work done with a specific purpose will not be of any significance.

स्रष्टेत्यादौ जगतः सुखदुःखयोश्च स्रष्टा प्रजापतिरिति योजना। स च ब्रह्मणोऽपत्यम्। अमितसङ्कल्प इति युगपदपरिमितस्थावरजङ्गमरूपकार्यकर्तृत्वेनापरिमित-तज्जननसङ्कल्प इत्यर्थः।– *Prajāpati*, the son of *Brahmā* and the creator of the entire universe, who has immense determination to do endless works related to animal and plant kingdom, is the creator of humans and diseases.

असाधुवदिति असाधुः अपत्यद्रोहकारी।।– '*Asādhu*' means the person who do harm to his progeny.

Concluding Remarks by Punarvasu Ātreya [26-29]

तथर्षीणां विवदतामुवाचेदं पुनर्वसुः।
मैवं वोचत तत्त्वं हि दुष्प्रापं पक्षसंश्रयात्॥26॥
वादान्सप्रतिवादान्हि वदन्तो निश्चितानिव।
पक्षान्तं नैव गच्छन्ति तिलपीडकवद्गतौ॥27॥
मुक्त्वैवं वादसङ्घट्टमध्यात्ममनुचिन्त्यताम्।
नाविधूते तमःस्कन्धे ज्ञेये ज्ञानं प्रवर्तते॥28॥
येषामेव हि भावानां संपत् संजनयेन्नरम्।
तेषामेव विपद्व्याधीन्विविधान्समुदीरयेत्॥29॥

After listening to the different versions of all the scholars participated in the discussion, Lord *Ātreya* expressed his views as mentioned below.

- My dear students "Do not enter this kind of controversy because it is very difficult to reach the truth by keeping partial aspects in mind".
- Those who consider different controversial aspects of truth as established facts they roam on unnecessary arguments without reaching the goal like a person sitting on the oil press. Therefore one should get rid of the puzzle of arguments and try to find out the truth.
- The same factors that are responsible for creating living beings in their wholesome combination are also responsible for various diseases in the case of their unwholesome combination.

Cakrapāṇi:

पक्षसंश्रयादिति रागतः पक्षसंग्रहात्।– '*Pakṣa-saṃśraya*' refers to stick to one's own version due to the passion.

निश्चितानिवेति परमार्थतोऽनिश्चिता एव, परं पक्षरागाद्बुद्धिप्रकर्षान्निश्चिता इवाभिधीयन्ते पक्षा इत्यर्थः।– '*Niścitān-iva*' refers to not at all conclusive. Although it is not a matter of conclusive, due to passion and intelligence, the person sticks to his version and will argue that it is decisive.

पक्षान्तमिति सम्यगर्थावधारणरूपं पक्षान्तम्।– '*Pakṣāntaṃ*' means coming to a conclusion or to find the truth.

तिलपीडकस्तैलार्थं यन्त्रोपरि स्थितो मनुष्यः; तिलपीडको यथा गतौ गमने सति, गम्यदेशाप्राप्त्या चान्तं नासादयति, पुनस्तत्रैव भ्रमणात्; तथा पक्षसंश्रयाद्वादिनोऽपीत्यर्थः।– The man sitting on an oil press, though goes on moving did not find any definite point. Likewise, the person who sticks on his own version never reach the goal of finding the truth by revolves around unreliable and unnecessary arguments.

सङ्घट्टः अन्योन्यपीडको मेलकः।– '*Saṅghaṭṭaḥ*' means the assembly of refute the views of each other's.

अध्यात्मं तत्त्वम्।– '*Adhyātma*' refers to the original essence or doctrine.

स्कन्धः समूहः।– '*Skandha*' means *Samūha* i.e. a cluster or a group.

पक्षरागश्चेह तत्त्वज्ञानप्रतिबन्धकत्वेन तमस्कन्ध उच्यते।– As the people are getting more passion towards their defective vision, and which is causing obstacles to find out the real knowledge; such group of people is known as *Tama-skandha* (group of darkness).

तिलपीडकन्याय
Tilapīḍaka Nyāya
(Maxim of oil press)

This *Nyāya* has used by the author in the following context. Once the saints gathered together in front of Lord *Ātreya*, and the discussion about the determination of the origin of human beings and diseases was started.

After listening to the different versions of all the scholars participated in the discussion, Lord *Ātreya* expressed his views as mentioned below.

My dear students "Do not enter this kind of controversy because it is very difficult to reach the truth by keeping partial aspects in mind".

Those who consider different controversial aspects of truth as established facts they roam on unnecessary arguments without reaching the goal like a person sitting on the oil press. Therefore one should get rid of the puzzle of arguments and try to find out the truth.

सिद्धान्तमाह– येषामित्यादि।– By starting the verse with the term '*Eṣām*', the author has established the doctrine.

येषामिति यज्जातीयानां, ते च महाभूतादयः। तेन महाभूतत्वेनैव वातादीनां ग्रहणम्।– '*Eṣām*' means the factors responsible for the origin of man i.e. *Mahābhūtās* etc.; which also include *Vāta* and other *Doṣās*.

संपदिति प्रशस्तगुणता।– '*Sampat*' means excellent attributes.

नरमिति संयोगिपुरुषम्।– '*Naram iti*' means the person who possesses the excellent attributes.

विपदिति वैगुण्यम्।– '*Vipad iti*' means those who are devoid of excellent attributes.

समुदीरयेदिति जनयेत्।– '*Samudīrayet iti*' means which produces.

एतेषां च ऋषिवादानां कथनं पूर्वपक्षसिद्धान्तश्रवणेन शिष्यसन्देहनिवृत्त्यर्थम्।।– By listening different opinions expressed by the sages as the first part of the argument, suspicion of the disciples' ends and therefore it is mentioned.

Doubt of Kāśipati Vāmaka [30]

अथात्रेयस्य भगवतो वचनमनुनिशम्य पुनरेव वामकः काशिपतिरुवाच भगवन्तमात्रेयं- भगवन्! संपन्निमित्तजस्य पुरुषस्य विपन्निमित्तजानां च रोगाणां किमभिवृद्धिकारणमिति॥30॥

After listening to Lord *Ātreya*, *Kāśi Rāja Vāmaka* questioned, "O Lord! what are its wholesome and unwholesome combination for the growth of organisms and their diseases?"

Reply by Punarvasu Ātreya [31]

तमुवाच भगवानात्रेयः- हिताहारोपयोग एक एव पुरुषवृद्धिकरो भवति, अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति॥31॥

Lord *Ātreya* replied to *Vāmaka* "The only reason for the overall development of organisms is wholesome diet and the development of diseases is unwholesome food."

Question Raised by Agniveśa Regarding the Features of Wholesome Diets and Regimen [32]

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच- कथमिह भगवन्! हिताहितानामाहारजातानां लक्षणमनपवादमभिजानीमहे; हितसमाख्यातानामाहारजातानामहितसमाख्यातानां च मात्राकालक्रियाभूमिदेहदोषपुरुषावस्थान्तरेषु विपरीतकारित्वमुपलभामह इति॥32॥

After listening to Lord *Ātreya, Agniveśa* questioned again as under.

- O Lord! "How shall the wholesome and unwholesome food substances can be distinguished exactly?"
- As a matter of fact it has been observed that the so called wholesome and unwholesome food substances show exactly the opposite effects basing on variations in dosage (*Mātrā*), time (*Kāla*), method of preparation (*Kriyā*), habitat (*Bhūmi*), body constitution (*Deha*), disease (*Doṣa*) and the age of the individual (*Puruṣāvasthā*).

Cakrapāṇi:

हिताहारोपयोग एक एवेत्यवधारणेनास्य प्राधान्यं दर्शयति नान्यप्रतिषेधम्, आचारस्य स्वप्नादेस्तथा शब्दादीनामपि कारणत्वेनोक्तत्वात्।- Here the author has emphasized the importance of the wholesome and unwholesome food for the growth of human beings and their diseases respectively ; however this statement is not contradicting the other factors like behavioral pattern such as sleep etc. and unwholesome conjunction of sense organs with their objectives.

व्याधिनिमित्तमिति व्याध्यभिवृद्धिनिमित्तं मध्यपदलोपाज्ज्ञेयम्, अभिवृद्धिकारणस्यैव पृष्टत्वात्; तथाऽहिताहारस्य यद्व्याधिनिमित्तत्वं, तस्य 'तेषामेव विपद्व्याधीन् विविधान् समुदीरयेत्' इत्यनेनैवोक्तत्वात्। किंवा व्याधिनिमित्तशब्देन सामान्येन जनको वर्धकश्च हेतुरुच्यत- Here the word '*Abhivṛddhi*' is missed in between *Vyādhi* and *Nimitta* and hence '*Vyādhi-nimitta*' should be understood as *Vyādhi-abhivṛddhi-nimitta*' by adopting the *Madhyalopa Arthāśraya* (supporting device); because the question is asked regarding the growth of the disease and also by the statement of unwholesome food is the cause as well as for the advancement of disease. In general the term *Vyādhi-nimitta* denotes the factors responsible for the manifestation and advancement of disease.

अनपवादमिति अव्यभिचारि।- '*Anapavādi*' means *Avyabhicāri* i.e. flawless.

हिताहिताहारदुर्ज्ञानताहेतुमाह- हितसमाख्याताना-मित्यादि।- Here the author has presented the reason of difficulty in understanding wholesome and unwholesome food substances due to the influence various factors like *Mātrā*, *Kāla* etc.

विपरीतकारित्वमिति पथ्यस्यापथ्यत्वं तथा अपथ्यस्य पथ्यत्वं मात्रादिवशाद्भवति।- '*Viparītakāritvam*' means alteration of the wholesome substances into unwholesome as well as unwholesome substances into wholesome due to the influence of *Mātrā*, *Kāla* etc.

तत्र पथ्या रक्तशाल्यादयोऽतिमात्रा हीनमात्रा वा मात्रादोषादपथ्या भवन्ति। तथा कालवशात एव रक्तशाल्यादयो लघुत्वाद्बलवदग्नीनां हेमन्ते न हिताः;- Even though *Raktaśāli* is wholesome, but if it is taken in less quantity or in more quantity, then it is going to be unwholesome. Likewise *Raktaśāli* and other light substances are not suitable for the people with strong digestive fire during the winter season.

कालशब्देन चेह नित्यग एव कालो गृह्यते, आवस्थिकस्य पुरुषावस्थाशब्देन गृहीतत्वात्।- Here the term '*Kāla*' refers to *Nityaga* only (eternal time) but not the age of the individuals and it should be understood by means of the word '*Puruṣāvastha*'.

क्रिया तु संस्करणं, तेन च रक्तशालिरसम्यक्स्विन्नाप्रस्रुतत्वादिना ओदनदोषेणाहितो भवति,- '*Kriyā*' means *Saṃskaraṇa* i.e. preparation or processing. If *Raktaśāli* is not cooked properly or not properly strained, then it is going to become unwholesome due to the faulty method of cooking.

तथा स एव भूमिसंबन्धादानूपदेशजः सन्नपथ्यो भवति।- Likewise *Raktaśāli* grown in *Anūpa Deśa* (marshy land) becomes unwholesome due to defect in land.

तथा देहापेक्षया मेदस्विनो रक्तशालिर्लघुतया न हितो भवति, तदुक्तं- "गुरु चातर्पणं चेष्टं स्थूलानां कर्शनं प्रति" (सू. अ. 21) इति।- Similarly *Raktaśāli* also becomes unwholesome to the obese persons due to its lightness and it is told that "To make stout individuals lean, it is advisable to be heavy (*Guru*) and non-nutritional food is prescribed". - Ca. Sū. 21/20

तथा स एव दोषे वायावहितः,- In relation to *Doṣa* also it is mentioned that *Raktaśāli* is unwholesome in *Vāta*.

दोषशब्देन व्याधिरपि ग्रहीतव्यः।- The term *Doṣa* also should be taken as *Vyādhi*.

तथा- पुरुषस्य बाल्यावस्थायां श्लेष्मप्रधानायां तिक्तादि पथ्यं, तत्तु वार्धक्ये वृद्धवाते न पथ्यम्।- During childhood, *Tikta*, *Kaṭu* substances are wholesome due to the dominancy of *Kapha Doṣa*; while the same substances become unwholesome during old age due to the dominancy of *Vāta Doṣa*.

अवस्थान्तरशब्दश्च मात्रादिभिः प्रत्येकं संबध्यते।- The term '*Avasthāntara*' (change of state) is individually related to *Mātrā, Kāla, Kriyā, Bhūmī, Deha, Doṣa* and *Puruṣa*.

एवमहितस्यापि मात्रादिपरिग्रहेण हितत्वमुन्नेतव्यम्।।- In the same way, considering the dosage, time, etc., one should understand the wholesomeness of the unwholesome substances.

Reply by Punarvasu Ātreya [33]

तमुवाच भगवानात्रेयः- यदाहारजातमग्निवेश! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति विषमांश्च समीकरोतीत्येतद्धितं विद्धि, विपरीतं त्वहितमिति; इत्येतद्धिताहितलक्षणमनपवादं भवति॥33॥

Lord *Ātreya* has replied to *Agniveśa* as under:

- Foods those are useful for maintaining the balance of body tissues and which help in the normalization of abnormal tissues are known as wholesome substances. Otherwise they are unwholesome.
- This definition of wholesome and unwholesome food substances is considered to be the most accurate and not controversial.

Another Question Raised by Agniveśa [34]

एवंवादिनं च भगवन्तमात्रेयमग्निवेश उवाच- भगवन्! न त्वेतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्वभिषजो विज्ञास्यन्ति॥34॥

After listening to Lord *Ātreya, Agniveśa* asked again, "By merely saying the above

doctrine in brief cannot be understood by all kinds of physicians." Thus it requires some further explanation.

Cakrapāṇi:

सिद्धान्तयति- यदाहारजातमित्यादि।- Here the author has established the doctrine by mentioning the words '*Yadāhārajātam*'.

अनेन च ग्रन्थेन हिताहितत्वं न स्वरूपेण भावानां, किंतु मात्रादिसव्यपेक्षमिति दर्शितं भवति।- By going through the above description, it is observed that the author has presented the details of wholesome and unwholesome substances in relation to *Mātrā, Kāla* etc. without mentioning their characteristics.

न त्वेतदित्यादि।- By mentioning the words '*Na tu etad*', the author has expressed the difficulty in understanding the theory on *Hitāhita Āhāra*.

एतदिति हिताहितम्।- '*Etad*' means the wholesome and unwholesome food substances.

एवमुपदिष्टमिति यदाहारजातमित्यादिलक्षणोद्दिष्टम्। विज्ञास्यन्ति न त्विति संबन्धः। एतस्मिन् हिताहितलक्षणे मात्राद्यवस्थान्तरज्ञानं विना न हितत्वमहितत्वं वा हितानां रक्तशाल्यादीनामहितानां यवकादीनां च ज्ञातुं पार्यते, मात्राद्यवस्थायाश्च दुर्ज्ञानत्वेन सर्ववैद्या ज्ञातुमक्षमा इति भावः।।- Simply by the above teachings of *Ātreya*, it is difficult to understand that what are the food substances useful for the maintenance of positive health by keeping the bodily tissues in the balanced state. Apart from this it is highly difficult to understand the wholesomeness and unwholesomeness of various substances like *Raktaśāli* and *Yavaka* etc. because of the variations in relation to *Mātrā, Kāla* etc.

Reply by Punarvasu Ātreya [35]

तमुवाच भगवानात्रेयः-

येषां हि विदितमाहारतत्त्वमग्निवेश! गुणतो द्रव्यतः कर्मतः सर्वावयवशश्च मात्रादयो भावाः, त एतदेवमुपदिष्टं विज्ञातुमुत्सहन्ते। यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्वभिषजो विज्ञास्यन्ति, तथैतदुपदेक्ष्यामो मात्रादीन् भावाननुदाहरन्तः; तेषां हि बहुविधविकल्पा भवन्ति। आहारविधिविशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्यामः।।35।।

Lord *Ātreya* has replied to *Agniveśa* as under:

- It is not at all difficult for the physicians in determining the wholesome and unwholesome food substances whenever they are acquainted with the food articles (*Dravya*), their properties (*Guṇa*), action (*Karma*), dosage (*Mātrā*) and all these aspects.
- However for the sake of the physicians who are unable to understand easily "I am going to explain in that way by quoting certain examples. As the dietetic substances have multiple variations, I shall explain various factors relating to diet in terms of general and specific terms."
- Subsequently *Āhāra Vidhi Viśeṣa* (factors concerned with partaking of food) will be explained in detail along with their features and subdivisions.

Cakrapāṇi:

एतदेवासर्वभिषग्ज्ञेयत्वं लक्षणस्याह- येषां हीत्यादि।- Here the author has presented the features of food substances for the sake of understanding by every physician by starting the verse with the words '*Yeṣāṃ hi*'.

गुणत इति इह प्रकरणे गुरुलघुत्वादिगुणतः।- In the present context '*Guṇataḥ*' should be understood as 20 types of *Guṇās* such as *Guru, Laghu* etc.

द्रव्यत इति कारणतः, यथा- इदमाप्यमिदमाग्नेयमित्यादि; किंवा द्रव्यत इत्याहारद्रव्याद्रक्तशाल्यादेः।- '*Dravyataḥ*' should be understood through its origin such as *Āpya dravya, Āgneya dravya* etc. or also the specific *Āhāra-dravya* such as *Raktaśāli* etc.

कर्मतः कार्यतः; यथा- इदं जीवनमिदं बृंहणमित्यादि।- '*Karmataḥ*' means *Kāryataḥ* and it should be understood by the action of the drugs such as *Jīvanīya, Bṛṃhaṇiya* etc.

सर्वावयवशश्चेति रसवीर्यविपाकप्रभावेभ्यः।- '*Sarvāvayavaca*' refers to entirety i.e. the knowledge of *Rasa, Vīrya, Vipāka, Prabhāva* etc.

मात्रादयश्चानन्तरोक्ताः पुरुषान्ता ज्ञेयाः।- '*Mātrādayaśca*' should be understood as *Mātrā, Kāla, Kriyā, Bhūmi, Deha, Doṣa* and *Puruṣa*.

आहारतत्त्वं च गुणादिभ्यो विदितं मात्रादयश्च विदिता इति योजना। किंवा गुणशब्देन रसवीर्यादीनामपि ग्रहणं,- The food articles (*Āhāra Tattva*) should be known by various factors like *Guṇa, Dravya, Karma* etc. and also by *Mātrā, Kāla* etc. The term *Guṇa* also refers to *Rasa, Vīrya* etc.

सर्वावयवशश्चेति मात्रादिज्ञानेन संबध्यते।- '*Sarvāvayavaśca*' is related to the knowledge of *Mātrā, Kāla* etc.

यथेत्यादौ एतदिति हिताहितम्।- Here the word *Yathā* refers to the description of wholesome and unwholesome substances.

भूयिष्ठकल्पा नानाप्रकारा उत्तमाधममध्यमा इत्यर्थः, भूयिष्ठ कल्पा इति कृत्वा सर्वग्रहणमुत्तमादीनामेव श्रेष्ठश्रेष्ठतरश्रेष्ठ तमादिभेदग्रहणार्थं; किंवा शल्याद्यष्टाङ्गाध्यायिवैद्यग्रहणार्थं ; किंवा भूयिष्ठकल्पा इति विज्ञातभूरिहिताहितोदाहरणाः;- The term '*Bhūyiṣṭhakalpa*' can be understood in different ways as under:

- 3 Types of physicians viz. Intelligent, Mediocre and Ignorant

  (or)

- Among these intelligent physicians, they are also of 3 types viz. Good (*Śreṣṭha*), Better (*Śreṣṭhatara*) and the Best (*Śreṣṭhatama*).

  (or)

- Those who are well versed in *Aṣṭāṅga Āyurveda* viz. *Śalya, Śālākya, Kāyacikitsā* etc.

  (or)

- Many a number of examples related to wholesome and unwholesome food substances

अग्र्याधिकारे हि बहु हिताहितं वक्तव्यं, तच्चाल्पबुद्धीनां व्यवहाराय भवति, प्रकृष्टबुद्धीनां चानुक्तज्ञानायेति भावः।- In the context of *Agryadravya* also many examples pertaining to the best among the wholesome and unwholesome drugs, diet and activities are described. Those examples will be useful for less intelligent physicians to prescribe as it is, whereas the intelligent people can understand even untold items also on the basis of these examples.

अग्र्याधिकारोक्तं संग्रहेण कथयति- समानेत्यादि। समानकारिणः तुल्यकर्माणः। श्रैष्ठ्यं लक्षणमिति प्रशस्तस्य लक्षणं; लक्षणं त्विह पाठ एव, पाठेन हि श्रैष्ठ्यं लक्ष्यते ज्ञायत इत्यर्थः।– Here author has briefly described the best useful drugs, diet and activities. *Samānakāriṇa* means those having similar action. *Śreṣṭha Lakṣaṇa* means the description of the excellent or the best and it is known only by the statement.

ज्यायस्त्वं बृहत्त्वं , तदप्रशस्तगुणबृहत्त्वं ज्ञेयम्; अत एवाहिताधिकारकथने श्रेष्ठतमशब्दं त्यक्त्वा 'अपथ्यतमत्वे प्रकृष्टतमा भवन्ति' इत्युक्तं, तेन श्रेष्ठस्य लक्षणमिति रक्तशाल्यादीनां हिताहाराणां ज्ञेयं, ज्यायस्त्वं चाहिताहाराणां यवकादीनामपथ्यतमत्वे प्रकर्षशालित्वम्।– The term '*Jyāyastvaṃ*' refers to *Bṛhattvaṃ* i.e. greatness. In fact the term is also applicable for both wholesome and unwholesome substances.

However the commentator *Cakrapāṇi* is specifically used the terms '*Śreṣṭhatva*' and '*Jyāyastvaṃ*' for the mention of the best wholesome and unwholesome substances respectively. For ex: - Among the group of cereals *Raktaśāli* is the best wholesome and *Yavaka* is the most unwholesome food substance. कार्यकर्तृत्वे वरत्वं चेति कर्मणि चोत्कृष्टत्वं, तच्च 'अन्नं वृत्तिकराणाम्' इत्यादिनोक्तं ज्ञेयम्।- The term '*Vara*' has been used to explain the supremacy in action. For ex: Food is the best for sustenance of life.

वातपित्तकफानां चेत्यादौ 'बस्तिर्वातहराणां', 'विरेचनं पित्तहराणां', 'वमनं श्लेष्महराणाम्', 'आस्थापनं वातहरणाम्' इत्यादि ज्ञेयम्।- For the alleviation of *Vāta*, *Pitta* and *Kapha*; the best therapeutic measures are *Vasti*, *Virecana* and *Vamana* respectively. It is also quoted as '*Āsthāpanaṃ Vātaharaṇām*'.

यव्द्याधिहरमिति 'खदिरः कुष्ठहराणां', 'पुष्करमूलं हिक्काश्वासकासपार्श्वशूलानाहहराणाम्' इत्यादि ज्ञेयम्।- For the elimination of diseases: - *Khadira* has been mentioned as the best drug for the management of *Kuṣṭha*. Similarly *Puṣkaramūla* is the drug of choice for the management of *Hikkā*, *Śvāsa*, *Kāsa*, *Pārśvaśūla* and *Ānāha*.

किंवा 'अवरत्वम्' इति पाठः; तदा अवरत्वम् अन्यथा अनभिप्रेतकर्तृत्वं, तच्च 'रजस्वलागमनमलक्ष्मीमुखानाम्' इत्यादि ज्ञेयम्।- The term '*Vara*' has been used to explain the supremacy in action. For ex: Food is the best for sustenance of life.

श्रेष्ठत्वज्यायस्त्वाभ्यां प्रशस्ताप्रशस्तकर्मणामपि ग्रहणं व्याख्येयम्॥- Thus the terms '*Śreṣṭhatva*' and '*Jyāyastvaṃ*' are specifically mentioned for explaining the best wholesome and unwholesome substances respectively.

Pathyāpathya Lakṣaṇa [45-47]

पथ्यं पथोऽनपेतं यद्यच्चोक्तं मनसः प्रियम्।
यच्चाप्रियमपथ्यं च नियतं तन्न लक्षयेत्॥45॥
मात्राकालक्रियाभूमिदेहदोषगुणान्तरम् ।
प्राप्य तत्तद्धि दृश्यन्ते ते ते भावास्तथा तथा॥46॥
तस्मात् स्वभावो निर्दिष्टस्तथा मात्रादिराश्रयः।
तदपेक्ष्योभयं कर्म प्रयोज्यं सिद्धिमिच्छता॥47॥

- The drugs, diet and activities that are not harmful to the body and the channels and also pleasing to the mind are considered as *Pathya*. Those which do harm to the body and unpleasant to the mind are called *Apathya*.
- But it is not accepted as a general rule in full form. The drugs, diet and activities change their properties depending on the dosage (*Mātrā*), season (*Kāla*), method of preparation (*Kriyā*), place or habitat (*Bhūmi*), body constitution (*Deha*) and variation according to *Doṣās*.
- Therefore, in order to achieve the desired effect the physician must be thoroughly examined the natural properties of medicines as well as the dosage and others, before the treatment starts.



Cakrapāṇi:

संप्रत्युक्तस्य पथ्यस्य हितापरनाम्नो लक्षणमाह- पथ्यमित्यादि।- Now the author has presented the characteristics of *Pathya*, which is the synonym of *Hita* by starting the verse with the word '*Pathyaṃ*'.

पथः शरीरमार्गात् स्रोतोरूपादनपेतम्; अपेतम् अपकारकम्, अनपेतम् अनपकारकमित्यर्थः।- '*Pathaḥ*' means the channels of the body which are known as *Srotases*. *Apetam* means which causes harmful effect and *Anapetam* means harmlessness.

पथोग्रहणेन पथोवाह्या दोषा धातवश्च, तथा पथोनिर्वर्तका धातवो गृह्यन्ते; तेन कृत्स्नमेव शरीरं गृहीतं भवति, ततश्च शरीरानुपघाति पथ्यमिति भवति।- The word '*Patha*' does not mean only the channels of the body, but also the substances that are having been transported from them such as *Doṣās*, *Dhātūs* etc. Hence *Patha* should be considered as the whole body. Therefore *Pathya* means the substance which does not cause harmful effect to the body.

किंवा, स्वस्थस्वास्थ्यरक्षणमातुरव्याधिपरिमोक्षश्चेति पन्थाः, तस्मादनपेतं पथ्यम्।- Or else it is mentioned as the right path (*Pantha*) is that maintenance of health in healthy individuals and cure of the disease. Thus whatever substances are not causing any harm to this path is known as *Pathya*.

एवमपि मनोऽनुपघातित्वं न लभ्यत इत्याह- यच्चोक्तं मनसः प्रियमिति। मनसोऽतिप्रीत्याऽभिलषितं, तेन मनसो हितमिति प्रियार्थः; तेन प्रशमज्ञानातीक्ष्णत्वादयो गृह्यन्ते। एतेन, 'मनःशरीरानुपघाति पथ्यं' इति पथ्यलक्षणमनपवादमुक्तं भवति- However the above definitions of *Pathya* are unable to express the harmlessness effect over the mind. To correct the flaw in the definition of *Pathya*, the author has also mentioned that whatever is extremely liked or desired by *Manas* that is known as *Pathya*. Thus the desires or the extreme likes of the mind are *Praśama* (peace), *Jñāna* (knowledge), *Atīkṣṇatva* (*Krodha*, *Mada* etc.) which are the wholesome or *Pathya* to the mind.

Thus it has been mentioned that whatever substance is wholesome for body and mind, it is known as '*Pathya*'. Therefore this definition of *Pathya* is flawless.

अन्ये तु पथ्यलक्षणद्वयमेतत् पठन्ति, वदन्ति च- "यद्येकं लक्षणं स्यात्तदा ज्वरादिषु तिक्तं भेषजं मनसोऽप्रियत्वेन न पथ्यं स्यात्; एतच्चानुमतमेव यद् ज्वरे तिक्तप्रयोगस्य तदात्वे न मनसोऽनुकूलत्वं, न चैतावता शरीरं प्रत्यपथ्यत्वं भवति, अतो यन्मात्रं मनोऽनुकूलत्वं मानसविकाराकर्तृत्वात् तद्व्यपदेश्यमेव; किंवा तावन्मात्रमनोऽननुकूलत्वं मानसविकाराकर्तृत्वादव्यपदेश्यमेव।- Other scholars accept these two as a definition of '*Pathya*' separately. Because if only one is considered as definition, the drugs of bitter taste prescribed in *Jvara* are disliked by the persons and should not be wholesome. In fact, though the bitter drugs prescribed in fever is not liked by the mind; those are not harmful to the body and also not causing any psychological disturbance. Thus in other words the *Pathya* can be defined as that which is not harmful to the body as well as to the mind.

तदेतदपथ्यत्वं किमाहाराचाराणां नियतमस्ति नेत्याह- यच्चेत्यादि। नियतं निश्चितमिदमप्रियमेव सर्वदेदमपथ्यमेव सर्वदेत्येवंरूपं किंचिन्नास्तीत्यर्थः। कुतो नास्तीत्याह- मात्रेत्यादि।- Is it that the unwholesomeness of foods and activities are fixed? This doubt has been clarified by the author by starting the verse with the word '*Yaccā*'. It has been said that unpleasantness as related to unwholesomeness is not always present and it is not fixed. The reason for not being definite is because it all depends on *Mātrā*, *Deśa*, *Kāla* etc.

गुणान्तरशब्दो मात्रादिभिः संबध्यते।- The variation of *Guṇa* is related to all aspects like *Mātrā*, *Deśa*, *Kāla* etc.

तत्तदिति मात्रादिगुणान्तरम्।- '*Tattad iti*' means the difference in the attributes of *Mātrā*, *Kāla* etc.

ते ते इति हिताहिताहाराचारा:।– '*Te Te*' means the wholesome and unwholesome food and activities.

तथा तथेति हितोक्ता अपि हिताश्चाहिताश्च, तथा अहितोक्ताश्चाहिता हिताश्च। एवं प्रियमपि मधुराद्यप्रियं, तिक्ताद्यप्रियमपिप्रियम्। अत्रोदाहरणं यथा– पथ्यं तावद्घृतं; तदतिमात्रमपथ्यं भवति, काले च वसन्तेऽपथ्यं, संस्कारेण च विरुद्धद्रव्यसंस्कृतमपथ्यं, भूमौ चानूपायामपथ्यम्, एवं देहेऽतिस्थूले दोषे च कफेऽपथ्यम्। अपथ्यमपि विषं मात्रादिना हितं भवति, यथा रसायने– "विषस्य तिलं दद्यात्" (चि.अ.1) इत्यादि। एवमन्यदप्यूह्यम्।– '*Tathā Tathā*' refers to the mention of wholesomeness also indicates wholesome as well as unwholesome. Similarly the mention of unwholesomeness also indicates unwholesome as well as wholesome. Even though the sweet substances are favorable do at times becomes unfavorable. Similarly the unfavorable bitter substances may sometimes become favorable.

For example:

- Ghee (*Ghṛta*) is usually wholesome, but when it is taken in excessive quantity, during spring season (*Vasanta*) and when it is processed with *Viruddha dravya*, it becomes unwholesome. Ghee is also unwholesome in *Ānūpa Deśa* (marshy land), to the obese persons and during the state of *Kapha* aggravation.
- Poison (*Viṣa*) is usually unwholesome, but when it is taken in proper dose it becomes wholesome. It has been mentioned in the 1st chapter of *Cikitsāsthāna* that "*Viṣa* has to be added in equal proportion to sesamum seed to act as *Rasāyana*'.

In this way many examples can be imagined.

यस्मादेवमेकान्तमपथ्यत्वमनिश्चितं, प्रायोवादपथ्यता तु निश्चिता; तस्मात् स्वभावो निर्दिष्ट इति पथ्यानां रक्तशाल्यादीनामपथ्यानां च यवकादीनामित्यर्थ:; स्वभाव: प्रकृत्या पथ्यता अपथ्यता च। तथा मात्रादिराश्रय इति निर्दिष्ट इति संबन्ध:।– Even though absolute unwholesomeness may be uncertain, however wholesomeness is often happens in the majority or some cases. On this basis naturally wholesome *Raktaśāli* etc. and naturally unwholesome *Yavaka* etc. are mentioned earlier. Though wholesomeness and unwholesomeness are naturally formed, they also depend on *Mātrā*, *Kāla* etc.

मात्रादि: मात्राकालक्रियादि:।– '*Mātrādi*' means *Mātrā, Kāla, Deha, Deśa* etc.

आश्रय इति पथ्यत्वापथ्यत्वयो:। मात्रादीन्याश्रित्य भावानां पथ्यत्वापथ्यत्वं च पारमार्थिकं भवतीत्यर्थ:। उभयमिति स्वभावं मात्रादिं च॥– Thus the real wholesomeness and unwholesomeness of the substances depend upon the nature and the dosage, season, body and the habitat etc. '*Ubhayāśritaṃ*' means *Svabhāva* and *Mātrādi* (*Mātrā, Kāla, Deha, Deśa* etc.)

Questions raised by Agniveśa about the Āsava [48]

तदात्रेयस्य भगवतो वचनमनुनिशम्य पुनरपि भगवन्तमात्रेयमग्निवेश उवाच– यथोद्देशमभिनिर्दिष्ट: केवलोऽयमर्थो भगवता श्रुतश्चास्माभि:। आसवद्रव्याणामिदानीमनपवादं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति॥48॥

After listening to Lord *Ātreya*, *Agniveśa* asked again, "Whatever you have answered our questions, we will follow it completely. We currently want to hear a detailed and accurate description of useful material for the preparation of alcoholic beverages."

Reply by Punarvasu Ātreya

तमुवाच भगवानात्रेय:– धान्यफलमूलसारपुष्पकाण्डपत्रत्वचो भवन्त्यासवयोनयोऽग्निवेश! संग्रहेणाष्टौ शर्करानवमीका:।

Lord *Ātreya* has replied that the source material for the preparation of alcoholic beverages is (eight plus one) nine types as mentioned under.

1. *Dhānya* (grains)
2. *Phala* (fruits)
3. *Mūla* (roots)
4. *Sāra* (pith)
5. *Puṣpa* (flowers)
6. *Kāṇḍa* (stem)
7. *Patra* (leaves)
8. *Tvak* (bark) &
9. *Śarkarā* (sugar)

Examples of 84 Types of Āsava

तास्वेव द्रव्यसंयोगकरणतोऽपरिसंख्येयासु यथापथ्यतमानामासवानां चतुरशीतिं निबोध।

- The alcoholic preparations are innumerable on the basis their ingredients, combination and method of preparation, but the most wholesome is eighty-four only as described below.

तद्यथा– सुरासौवीरतुषोदकमैरेयमेदकधान्याम्ला: षड् धान्यासवा भवन्ति, मृद्वीकाखर्जूरकाश्मर्यधन्वनराजादनतृणशून्यपरूषकाभयामलकमृगलिण्डिकाजाम्बवकपित्थकुवलबदरकर्कन्धुपीलुप्रियालपनसन्यग्रोधाश्वत्थप्लक्षकपीतनोदुम्बराजमोदशृङ्गाटकशाङ्खिनीफलासवा: षड्विंशतिर्भवन्ति, विदारिगन्धाश्वगन्धाकृष्णागन्धाशतावरीश्यामात्रि-वृद्दन्तीद्रवन्तीबिल्वोरुबूकचित्रकमूलैरेकादश मूलासवा भवन्ति, शालप्रियकाश्वकर्णचन्दनस्यन्दनखदिरकदरसप्तपर्णार्जुनासनारिमेदतिन्दुककिणिहीशमीशुक्तिशिंशपाशिरीषवञ्जलधन्वनमधूकै: सारासवा विंशतिर्भवन्ति, पद्मोत्पलनलिकुमुदसौगन्धिकपुण्डरीकशतपत्रमधूकप्रियङ्गुधातकीपुष्पैर्दश पुष्पासवा भवन्ति, इक्षुकाण्डेक्षिक्षुवालिकापुण्ड्रकचतुर्था: काण्डासवा भवन्ति, पटोलताडकपत्रासवौ द्वौ भवत:, तिल्वकलोध्रैलवालुकक्रमुकचतुर्थास्त्वगासवा भवन्ति, शर्करासव एक एवेति। एवमेषामासवानां चतुरशीति: परस्परेणासंसृष्टानामासव-द्रव्याणामुपनिर्दिष्टा भवति।

Category & Number	Types	
1. *Dhānyāsava* - 6 (Alcoholic beverages prepared with grains)	1. *Surā*	4. *Maireya*
	2. *Sauvīraka*	5. *Medaka*
	3. *Tuṣodaka*	6. *Dhānyāmla*

II. Phalāsava – 26 (Alcoholic beverages prepared with fruits)	1.	Drākṣā	2.	Kharjūra
	3.	Kāśmarya	4.	Dhanvana
	5.	Rājādana	6.	Tṛṇaśūnya (Ketakī)
	7.	Parūṣaka	8.	Abhayā
	9.	Āmalaka	10.	Mṛgaliṇḍikā (Vibhitaka)
	11.	Jambū	12.	Kapittha
	13.	Kuvala	14.	Badara
	15.	Karkandhu	16.	Pīlu
	17.	Priyāla	18.	Panasa
	19.	Nyagrodha	20.	Aśvattha
	21.	Plakṣa	22.	Kapītana
	23.	Udumbara	24.	Ajamodā
	25.	Śṛṅgāṭaka	26.	Śaṅkhinī
III. Mūlāsava – 11 (Alcoholic beverages prepared with roots)	1.	Śāliparṇī	2.	Aśvagandhā
	3.	Kṛṣṇagandhā	4.	Śatāvarī
	5.	Śyāmā	6.	Trivṛt
	7.	Dantī	8.	Dravantī
	9.	Bilva	10.	Eraṇḍa
	11.	Citraka		
IV. Sārāsava – 20 (Alcoholic beverages prepared with pith)	1.	Śāla	2.	Priyāla
	3.	Aśvakarṇa	4.	Candana
	5.	Tinisa	6.	Khadira
	7.	Kadara	8.	Saptaparṇa
	9.	Arjuna	10.	Asana
	11.	Irimeda	12.	Tinduka
	13.	Kiṇihī	14.	Śamī
	15.	Badarī	16.	Śiṃśapā
	17.	Śirīṣa	18.	Vañjala
	19.	Dhanvana	20.	Madhūka
V. Puṣpāsava – 10 (Alcoholic beverages prepared with flowers)	1.	Padma	2.	Utpala
	3.	Nalina	4.	Kumuda
	5.	Saugandhika	6.	Puṇḍarīka
	7.	Śatapatra	8.	Madhūka
	9.	Priyaṅgu	10.	Dhātakī
VI. Kāṇḍāsava – 4 (Alcoholic beverages prepared with stem)	1.	Ikṣu	2.	Kāṇḍekṣu
	3.	Ikṣuvālikā	4.	Puṇḍraka

VII. Patrāsava – 2 (Alcoholic beverages prepared with leaves)	1.	Paṭola	2.	Tāḍaka
VIII. Tvagāsava – 4 (Alcoholic beverages prepared with bark)	1.	Tilvaka	2.	Lodhra
	3.	Elavāluka	4.	Kramuka
IX. Śarkarāsava – 1 (Alcoholic beverages prepared with sugar)	1.	Śarkarā		

Base for the naming of Āsava [49]

एषामासवानामासुतत्वादासवसंज्ञा।
द्रव्यसंयोगविभागविस्तारस्त्वेषां बहुविधकल्पः संस्कारश्च। यथास्वं संयोगसंस्कारसंस्कृता ह्यासवाः स्वं कर्म कुर्वन्ति। संयोगसंस्कारदेश-कालमात्रादयश्च भावास्तेषां तेषामासवानां ते ते समुपदिश्यन्ते तत्तत्कार्यमभिसमीक्ष्येति॥४९॥

- Due to the involvement of fermentation process (*Āsutatvāt*) during its preparation, the name for the above mentioned 84 varieties of alcoholic beverages has been given as '*Āsava*'.
- Based on the combination and permutation of materials and methods, the *Āsavās* are innumerable.
- The actions of these *Āsavās* are based on the method of preparation along with the properties of the material used in their preparation.
- The combination of ingredients, method, time (duration of fermentation), place of preparation (buried in the ground, keeping in a heap of ashes or grains), quantities etc. are determined to achieve the desired effect of these *Āsavās*.

***Cakrapāṇi*:**

इदानीमग्र्याधिकारादासवेष्वनन्तेषु य आसवा अग्र्यास्त उच्यन्ते।- In the context of the description of *Agryadravya*, the most important *Āsavās* among the innumerable alcoholic preparations have been described here.

धान्यादीन्येकत्वेन पङ्क्त्वा पृथक् शर्करां पङ्क्ति, धान्यादीनामवान्तरजातिमत्वात्; शर्करायास्त्ववान्त-रजातिर्नास्ति, या तु यासशर्करा सा नासवकारणतया श्रूयते, मधुशर्करा तु मध्वन्तर्निविष्टैव। मधु तु नासवयोनितया पृथक्पङ्क्तिं, येन तत्कृतस्यासवस्य धान्यसंबन्धाद्धान्यासवेनैव ग्रहणम् । एवं गौडासवादिष्वपि बोद्धव्यम्।- Among the nine source material of *Āsavās*, *Dhānyāsava* etc. eight are grouped in one category and *Śarkarāsava* has been kept separately based on the availability of sub-divisions. Among these nine types of source material *Dhānya*, *Phala*, *Mūla* etc. are having sub-divisions, whereas *Śarkarā* is having no sub-division. Though the other varieties of *Śarkarā* viz. *Yāsa-Śarkarā* and *Madhu-Śarkarā*; the first one is not seen anywhere in the preparation of *Āsavās* and the second one can be included under *Madhu*. The *Madhu* is also not described separately and it is incorporated in the group of *Dhānyāsava*. In the similar fashion the *Āsavās* prepared with *Guḍa* are known as *Gauḍāsava*.

द्रव्यं च संयोगश्च करणं च द्रव्यसंयोगकरणं, ततोऽपरिसंख्येयाः स्युः।- There will be

innumerable number of alcoholic beverages based on the combination of drugs and the method of preparation.

सौवीरं निस्तुषयवकृतं,- *Sauvīraṃ* means the alcoholic beverage prepared from de-husked barley.

मैरेयं सुराकृता सुरा,- *Maireya* means the alcoholic beverage prepared from *Surā*.

मेदकः श्वेतसुरा जगलाख्या,- *Medaka* means *Śveta-Surā* i.e. white colored wine and it is also known as *Jagalā*.

धान्याम्बु काञ्जिकम्।- *Dhānyāmbu* means sour gruel made of grains.

तृणशून्यं केतकी,- *Tṛṇaśūnya* means *Ketakī* i.e. Pandanus tectorius Soland ex Parkinson.

मृगलिण्डिका बिभीतकं।- *Mṛgaliṇḍikā* means *Vibhītakī* i.e. Terminalia bellerica Roxb.

कुवलमिति स्थूलबदरी।- *Kuvala* means *Sthūla Badarī* the big variety of Zizyphus jujube Lam.

कर्कन्धुः शृगालबदरी।- *Karkandhu* means *Śṛgāla Badarī* another variety of Zizyphus.

कदरः श्वेतखदिरः,- *Kadara* means *Śveta-Khadira* i.e. Acacia suma Buch.Ham.

अश्वकर्णः शालभेदः,- *Aśvakarṇa* means *Śāla Bheda* i.e. Dipterocarpus alatus Roxb.

अरिमेदो विट्खदिरः,- *Arimeda* means *Viṭ-Khadira* i.e. Acacia leucophloea Willd.

किणिही अपामार्गः,- *Kiṇihī* means *Apāmārga* i.e. Achyranthes aspera Linn.

शुक्तिः बदरी।- *Sukti* means *Badarī* i.e. Zizyphus jujube Lam.

पद्मं सरक्तमष्टदलपद्मं,- *Padma* means red colored lotus with eight petals i.e. Nelumbo nucifera Gaertn.

नलिनं श्वेतमष्टदलपद्मं,- *Nalina* means white colored lotus with eight petals.

पुण्डरीकं श्वेतशतपत्रपद्मं,- *Puṇḍarīka* means white colored lotus with hundred petals.

शतपत्रं त्वरुणम्।- *Śatapatra* means red colored lotus with hundred petals.

इक्षुशब्दप्राप्तस्यापि पुण्ड्रकस्य पुनरभिधानमासवं प्रति तस्य प्राधान्यख्यापनार्थम्।- Though the word *Ikṣu* is cited, another term *Puṇḍraka* is also mentioned to highlight the importance of it in the preparation of *Āsava*.

क्रमुकं गुवाकम् ।- *Kramuka* means *Guvāka* i.e. Areca catechu Linn.

तिल्वकः शाबरलोध्रः।- *Tilvaka* means *Śābaraka Lodhra* i.e. Symplocos racemosa Roxb.

आसुतत्वादिति सन्धानरूपत्वात्।- *Āsutattvāt* means tendency to involve in fermentation process.

द्रव्यसंयोगविभाग इत्यादौ 'एषाम्' इति पदेन प्रत्येकं धान्यादिद्रव्यकृता आसवा उक्ताः। तेषां च विभागोऽनुपपन्न एकरूपत्वादिति चेत्? तन्न, तेषामपि सजातीयद्रव्यविभागस्य विद्यमानत्वात्। किंच संस्कारकद्रव्यविभागस्यापि तत्र शक्यत्वात्; नह्येकेनैव द्रव्येण सुरादयः क्रियन्ते, प्राधान्यात्तु धान्यादयोऽभिधीयन्ते।- By the mention of the word '*Eṣām*' the author has explained the alcoholic beverages prepared with the conjunction and disjunction of grains. As the drugs are mentioned solely, their combination is reasonable, but how the disjunction is acceptable? The disjunction is also possible due to the presence of other varieties along with the number of drugs used are more than one. *Surā* etc. can't be prepared with a single drug, and the grains are the principal ingredients in it.

संस्कारश्च बहुविधविकल्प इति योजना। संयोगसंस्कारकरणप्रयोजनमाह- यथास्वमित्यादि। यथास्वमिति यद्युज्यते;- As the number of drugs are more and methods of preparations are also many and hence the number of alcoholic beverages are innumerable. By mentioning the word '*Yathāsvaṃ*', the author has tried

to present the importance of combination of different materials and the method of preparation of alcoholic beverages.

देशो भस्मराशिधान्यराश्यादिः सन्धानेषु वक्ष्यमाणः,- In the context of preparation of alcoholic beverages the term '*Deśa*' refers to the substance in which the material is buried for fermentation such as ash or heap of grains or underground etc.

कालस्तु पक्षमासादिस्थापनं,- The term '*Kāla*' refers to the time period of material to be buried for fermentation such as 15 days or one month etc.

मात्रा सन्धानद्रव्यमात्रा।- '*Mātrā*' means the quantity of fermenting material to be taken.

आदिग्रहणाद्द्रव्यस्वभावेतिकर्तव्यतासंग्रहणम्।- The term '*Ādi*' refers to *Dravya Svabhāva* i.e. the nature of drug.

तत्तत्कार्यमिति देशकालशरीरदोषादिभिन्नं हितत्वम्।।- These alcoholic beverages are beneficial when used by considering various factors like *Deśa*, *Kāla*, *Śarīra* and *Doṣa*.

Properties of Āsava [50]

भवति चात्र-

मनःशरीराग्निबलप्रदानामस्वप्नशोकारुचि-
नाशनानाम्। संहर्षणानां प्रवरासवानामशी-
तिरुक्ता चतुरुत्तरैषा।।50।।

Thus it is said:

These eighty four excellent alcoholic beverages are mentioned here:

- To promote the strength of the body, mind and digestive power (*Manaḥ-śarīra-agni bala pradānām*).
- To remove sleeplessness, grief and anorexia (*Asvapna-śoka-aruci-nāśanānām*).
- To get enjoyment (*Saṃharṣaṇānām*).

Cakrapāṇi:

मनःशरीरेत्यादिना गुणकथनं युक्त्या पीतस्यासवस्य ज्ञेयम्।।- In the present verse the author has presented the benefits of judicial intake of alcoholic beverages by starting with the word '*Manaḥ-śarīra*'.



To Sum Up [51]

तत्र श्लोकः:-

शरीररोगप्रकृतौ मतानि तत्त्वेन चाहारविनिश्चयं च।

उवाच यज्ज:पुरुषादिकेऽस्मिन् मुनिस्तथाऽग्र्याणि वरासवांश्च॥51॥

In the present chapter entitled *Yajjaḥpuruṣīya Adhyāya* - The author has presented various theories related to the origin of humans and diseases - The most wholesome and unwholesome drugs, diet and activities - The most important alcoholic beverages.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने यज्ज:पुरुषीयो नाम पञ्चविंशोऽध्याय:॥25॥

Thus ends the Twenty Fifth chapter of *Ślokasthāna* entitled *Yajjaḥpuruṣīya Adhyāya* which was composed by *Agniveśa* and redacted by *Caraka*.

***

आमलकं वय:स्थापनानां

Āmalakī (Emblica officinalis Gaertn.) is the best drug of choice to arrest the aging process.

- Ca. Sū. 25/40

26 CHAPTER

Ātreya-Bhadrakāpyīya Adhyāya

आत्रेयभद्रकाप्यीयोऽध्याय:

Participants of the Conference on Rasa 719
Bhadrakāpya's View Ekarasa 720
Śākunteya Brāhmaṇa's View Dvirasa 720
Maudgalya Pūrṇākṣa's View Trirasa 721
Kauśika Hiraṇyākṣa's View Catvārorasā 721
Kumāraśirā Bharadvāja's View Pañcarasa 722
Rājarṣi Vāryovida's View Ṣadrasā 722
Vaideha Rāja Nimi's View Saptarasa 722
Baḍiśa Dhāmārgavā's View Aṣṭarasa 723
Bāhlīka Deśa Kāṅkāyana's View Asaṅkhyeya Rasa 723
Ātreya the Chairperson's concluding Remarks by Refuting the Views of Various Scholars 724
Refutation of Ekarasa Vāda 724
Refutation of Dvirasa & Trirasa Vāda 725
Refutation of Rasa Catuṣka Vāda 725
Refutation of Pañca Rasa Vāda 725
Refutation of Ṣaḍrasa Vāda 727
Refutation of Sapta Rasa Vāda 727
Refutation of Aṣṭa Rasa Vāda 728
Refutation of Asaṅkhyeya Rasa Vāda 729
Description about Dravya 732
Pārthiva Dravya Lakṣaṇa 733
Āpya Dravya Lakṣaṇa 733

Āgneya Dravya Lakṣaṇa 734
Vāyavya Dravya Lakṣaṇa 734
Ākāśīya Dravya Lakṣaṇa 734
Nothing is Non-Medicinal 735
Modus Operandi of Drugs 736
63 Types of Rasa Bheda 738
Dvirasa Saṃyoga - 15 Types 738
Trirasa Saṃyoga - 20 Types 739
Rasa Catuṣka - 15 Types 741
Pañca Rasa Saṃyoga - 6 Types 742
Eka Rasa Bheda - 6 Types 742
Conclusion of Rasa Saṃyoga 742
More Details in Relation to Rasa 743
Importance of Knowledge of Rasa and Doṣa 745
Rasa & Anurasa Lakṣaṇa 746
Parādi Guṇa 747
Para, Apara & Yukti Lakṣaṇa 748
Saṅkhyā & Saṃyoga Lakṣaṇa 749
Vibhāga & Pṛthaktva Lakṣaṇa 750
Parimāṇa, Saṃskāra and Abhyāsa Lakṣaṇa 751
Conclusion Regarding Guṇa 752
Guṇa is Not Resided in Rasa 752
Taking the Appropriate Meaning According to the Context 753
Origin of Ṣaḍrasa 754
Role of Water in Manifestation of Rasās 754
Relationship of Rasa and Mahābhūta 755
Movement of Rasās According to the Dominance of Mahābhūtās 757
Features (Guṇa) & Actions (Karma) of Individual Rasās 758
Madhura Rasa Guṇa & Karma 758
Complications Due to Excessive Intake of Madhura-rasa Dravya 760
Amla Rasa Guṇa & Karma 760
Complications Due to Excessive Intake of Amla-rasa Dravya 761
Lavaṇa Rasa Guṇa & Karma 762
Complications Due to Excessive Intake of Lavaṇa-rasa Dravya 763
Kaṭu Rasa Guṇa & Karma 763
Complications Due to Excessive Intake of Kaṭu-rasa Dravya 764
Tikta Rasa Guṇa & Karma 765
Complications Due to Excessive Intake of Tikta-rasa Dravya 766
Kaṣāya Rasa Guṇa & Karma 766
Complications Due to Excessive Intake of Kaṣāya-rasa Dravya 767
Conclusion Regarding Guṇa and Karma of Rasās: 767
Determination of Vīrya According to Rasa 768
More Details about Rasa 769
Viruddha Vīrya Dravya - Examples 770
Some more Details about Rasa 771
Relative Superiority of Tastes Based on Certain Qualities 771
Enunciation of Vipāka 772
Snigdha & Rūkṣa Rasās 773
Actions of Different Types of Vipāka 774
More Details about Vipāka 774
Vīrya Bheda & Lakṣaṇa 778
Determination of Rasa, Vipāka and Vīrya 779
Lakṣaṇa of Prabhāva 780
More Details about Prabhāva with Examples 781
The Action of the Drug According to the Dominance of its Active Principles 781
Explication of Madhura Rasa 782
Explication of Amla Rasa 783
Explication of Lavaṇa Rasa 783
Explication of Kaṭu Rasa 783
Explication of Tikta Rasa 783
Explication of Kaṣāya Rasa 783
Query of Agniveśa related to Incompatible Drugs & Diet 784
Reply by Bhagavān Ātreya 784
Examples of Viruddhāhāra 786
Bhadrakāpya's Opinion about Cilicima Type of Fish 786
Answer to Bhadrakāpya's Views as told by Bhagavān Ātreya 787
Some Other Examples of Viruddhāhāra 787
Definition of Viruddhāhāra 791
Different Types of Viruddhāhāra 791
Deśa Viruddha 792
Kāla Viruddha 792
Anala Viruddha 792
Mātrā Viruddha 792
Sātmya Viruddha 792
Doṣa Viruddha 792
Saṃskāra Viruddha 792
Vīrya Viruddha 792
Koṣṭha Viruddha 792
Avasthā Viruddha 793
Krama Viruddha 793
Parihāra Viruddha 793
Pāka Viruddha 793
Saṃyoga Viruddha 793
Hṛd-Viriddha 793
Sampat Viruddha 793
Vidhi Viruddha 793
Complications of Viruddhāhāra 794
Management of the Complications of Viruddhāhāra 795
To Sum Up 795

Chapter 26

Ātreya-Bhadrakāpyīya Adhyāya

आत्रेयभद्रकाप्यीयोऽध्यायः

अथातआत्रेयभद्रकाप्यीयमध्यायंव्याख्यास्यामः॥1॥
इति ह स्माह भगवानात्रेयः॥2॥

After *Yajjaḥpuruṣīya Adhyāya*, *Ācārya Agniveśa* has propounded the chapter entitled *Ātreya-Bhadrakāpyīya Adhyāya*, as taught by Lord *Ātreya*.

Cakrapāṇi:

हिताहितैकदेशमभिधाय कृत्स्नद्रव्यहिताहितत्वज्ञानार्थं रसवीर्यविपाकाभिधायक आत्रेयभद्रकाप्यीयोऽभिधीयते। तत्रापि विपाकादीनामपि रसेनैव प्रायो लक्षणीयत्वाद्रसप्रकरणमादौ कृतम्।- In the previous chapter some wholesome and unwholesome food substances have been described. In order to understand the wholesomeness and unwholesomeness of all the drugs *Rasa*, *Vīrya* and *Vipāka* of various substances will be described in the present chapter entitled '*Ātreya-Bhadrakāpyīya Adhyāya*'. Among *Rasa*, *Vīrya* and *Vipāka*, *Rasa* is the most important one to gain the knowledge of a substance and hence the chapter starts with the description of *Rasa*.

Participants of the Conference on Rasa [3-7]

आत्रेयो भद्रकाप्यश्च शाकुन्तेयस्तथैव च।
पूर्णाक्षश्चैव मौद्गल्यो हिरण्याक्षश्च कौशिकः॥3॥
यः कुमारशिरा नाम भरद्वाजः स चानघः।
श्रीमान् वार्योविदश्चैव राजा मतिमतां वरः॥4॥
निमिश्च राजा वैदेहो बडिशश्च महामतिः।
काङ्कायनश्च बाह्लीको बाह्लीकभिषजां वरः॥5॥

एते श्रुतवयोवृद्धा जितात्मानो महर्षयः।
वने चैत्ररथे रम्ये समीयुर्विजिहीर्षवः॥6॥
तेषां तत्रोपविष्टानामियमर्थवती कथा।
बभूवार्थविदां सम्यग्रसाहारविनिश्चये॥7॥

Once the following sages who are enlightened, aged and self-controlled, they gathered in the pleasant jungle named *Caitraratha* and started discussing on *Rasa* and *Āhāra*.

1. *Ātreya*.
2. *Bhadrakāpya*.
3. *Śākunteya*.
4. *Pūrṇākṣa Maudgalya*.
5. *Hiraṇyākṣa Kauśika*.
6. *Kumāraśirā Bharadvāja*.
7. *Vāryovida*, the benevolent king best among intellectuals.
8. *Nimi* the king of *Vaideha*.
9. *Baḍiśa* the highly intelligent.
10. *Kāṅkāyana* the best among the physicians of *Bāhlīka Deśa*.

Cakrapāṇi:

मुनिमतैः पूर्वपक्षं कृत्वा सिद्धान्तव्यवस्थापनं शिष्यव्युत्पत्त्यर्थम्।- After raising a question on the basis of the opinion of the sages, Lord *Ātreya* was concluded with his remarks so that the disciples could be properly understood.

रसेनाहारविनिश्चयो रसाहारविनिश्चयः; किंवा अयं रसविनिश्चयः, तथा 'परं चातो विपाकानां'

इत्यादिराहारविनिश्चयः ।- '*Rasāhāra-viniścaya*' means determination of *Āhāra* from *Rasa* and also determination of *Āhāra* from *Vipāka*.

Participants in the Conference

Bhadrakāpya's View – Ekarasa

एक एव रस इत्युवाच भद्रकाप्यः, यं पञ्चानामिन्द्रियार्थानामन्यतमं जिह्वावैषयिकं भावमाचक्षते कुशलाः, स पुनरुदकादनन्य इति ।

Bhadrakāpya opined that the number of *Rasās* is one only, which is the object of the tongue and one among the five senses. He also said that this is not different from *Jala Mahābhūta*.



Cakrapāṇi:

एक एवेत्यादि।- By introducing verse with the words '*Eka Eva*', here the author presented the views of *Bhadrakāpya* as "The number of *Rasās* is limited to one only".

इन्द्रियार्थानामिति निर्धारणे षष्ठी।- Here *Ṣaṣṭhī Vibhakti* has been used for the determination of '*Indriyārthānām*'.

अन्यतममिति एकम्; अन्यशब्दो ह्ययमेकवचनः, यथा-अन्यो दक्षिणेन गतोऽन्य उत्तरेण; एक इत्यर्थः;- '*Anyatama*' means any one of many. Here the word '*Anya*' represents singular number. Just as one person has gone to southern direction and the other has gone to northern direction. Here meaning of '*Anya*' has been taken as one.

तमप्प्रत्ययश्च स्वार्थिकः।- In the word '*Anyatama*' *Tamap Pratyaya* has been used in the sense of self.

जिह्वावैषयिकमिति जिह्वाग्राह्यम्। रसाभावोऽपि जिह्वया गृह्यतेऽत आह-भावमिति।- '*Jihvāvaiṣayikam*' means which is being perceived by the tongue. Absence of *Rasa* is also perceives by the tongue and hence *Rasa* is considered as the objective of the tongue.

उदकादनन्य इति रसोदकयोरेकत्वख्यापनार्थं, पूर्वपक्षत्वाददुष्टम्। पूर्वपक्षश्च कपिलमतेन, ते हि रसतन्मात्रं गन्धतन्मात्रमित्यादिवचनेन गुणाव्यतिरिक्तं द्रव्यमिति ब्रुवते।- '*Udakādananya*' means *Rasa* is not different from water. This view is based on the followers of *Kapila*, who accept *Dravya* as not different from *Guṇa* with statements *Rasa Tanmātra*, *Gandha Tanmātra* etc.

Śākunteya Brāhmaṇa's View – Dvirasa

द्वौ रसाविति शाकुन्तेयो ब्राह्मणः, छेदनीय उपशमनीयश्चेति।

Śākunteya Brāhmaṇa told that *Rasās* are two in number viz.

1. *Chedanīya* (emaciating).
2. *Upaśamanīya* (nourishing).



Cakrapāṇi:

छेदनीय इति अपतर्पणकारकः। उपशमनीय इति बृंहणः।- '*Chedanīya*' refers to that which is responsible for emaciation. *Upaśamanīya* means that which causes nourishing.

Maudgalya Pūrṇākṣa's View - Trirasa

त्रयो रसा इति पूर्णाक्षो मौद्गल्यः, छेदनीयोपशमनीयसाधारणा इति।

Maudgalya Pūrṇākṣa expressed that the number of *Rasās* are three such as-

1. *Chedanīya* (emaciating).
2. *Upaśamanīya* (nourishing).
3. *Sādhāraṇa* (both emaciating and nourishing).



Cakrapāṇi:

साधारण इत्याग्नेयसौम्यसामान्यादुभयोरपि लङ्घनबृंहणयोः कर्ता, परस्परविरोधादकर्ता वा।- '*Sādhāraṇa*' means that which acts as both emaciation as well as nourishing agent because of having both the properties of *Āgneya* and *Saumya*. (Or) it doesn't cause either emaciation or nourishment due to its adverse properties.

Kauśika Hiraṇyākṣa's View – Catvāro-rasā

चत्वारोरसाइतिहिरण्याक्षःकौशिकः,स्वादुर्हितश्च स्वादुरहितश्चास्वादुर्हितश्चास्वादुरहितश्चेति।

Kauśika Hiraṇyākṣa expressed that the number of *Rasās* are four such as-

1. *Svādu Hita* (palatable and wholesome).
2. *Svādu Ahita* (palatable and unwholesome).
3. *Asvādu Hita* (unpalatable and wholesome).
4. *Asvādu Ahita* (unpalatable and unwholesome).



Cakrapāṇi:

स्वादुरिति अभीष्टः, हितइति आयतावनपकारी।- '*Svādu*' means *Abhīṣṭa* i.e. desired or favorite. '*Hita*' means that which doesn't cause harm

i.e. beneficial.

Kumāraśirā Bharadvāja's View- Pañca-rasa

पञ्च रसा इति कुमारशिरा भरद्वाजः, भौमौदकाग्नेयवायव्यान्तरिक्षाः।

Kumāraśirā Bharadvāja opined that the number of *Rasās* is five such as-

1. *Bhauma*
2. *Udaka*
3. *Āgneya*
4. *Vāyavya*
5. *Āntarikṣa*

Rājarṣi Vāryovida's View – Ṣaḍrasā

षड्रसा इति वार्योविदो राजर्षिः, गुरुलघुशीतोष्णस्निग्धरूक्षाः।

Rājarṣi Vāryovida told that *Rasās* are six in number viz.

1. *Guru* (heavy)
2. *Laghu* (light)
3. *Śīta* (cold)
4. *Uṣṇa* (hot)
5. *Snigdha* (unctuous)
6. *Rūkṣa* (un-unctuous)



Vaideha Rāja Nimi's View- Sapta-rasa

सप्त रसा इति निमिर्वैदेहः, मधुराम्ललवणकटुतिक्तकषायक्षाराः।

Nimi, the king of *Vaideha* quoted that the number of *Rasās* are seven such as-

1. *Madhura* (sweet).
2. *Amla* (sour).
3. *Lavaṇa* (saline).
4. *Kaṭu* (pungent).
5. *Tikta* (bitter).
6. *Kaṣāya* (astringent).

7. *Kṣāra* (alkaline).

Baḍiśa Dhāmārgavā's View – Aṣṭa-rasa

अष्टौ रसा इति बडिशो धामार्गवः, मधुराम्ललवणकटुतिक्तकषायक्षाराव्यक्ताः।

Baḍiśa Dhāmārgavā expressed that the number of *Rasās* are eight such as

1. *Madhura* (sweet).
2. *Amla* (sour).
3. *Lavaṇa* (saline).
4. *Kaṭu* (pungent).
5. *Tikta* (bitter).
6. *Kaṣāya* (astringent).
7. *Kṣāra* (alkaline).
8. *Avyakta* (unnoticeable).

Bāhlīka Deśa Kāṅkāyana's View- Asaṅkhyeya Rasa

अपरिसंख्येया रसा इति काङ्कायनो बाह्लीकभिषक्, आश्रयगुणकर्मसंस्वादविशेषाणामपरिसंख्येयत्वात्॥8॥

Kāṅkāyana, the physician of *Bāhlīka* expressed that the number of *Rasās* are innumerable based on multiplicity of their *Āśraya* (inhabitation), *Guṇa* (attributes), *Karma* (action) and *Saṃsvāda Viśeṣa* (variation of taste).

Cakrapāṇi:

आश्रीयत इत्याश्रयो द्रव्यं, गुणाः स्निग्धगुर्वादयः; कर्म धातुवर्धनक्षपणादि, संस्वादः रसानामवान्तरभेदः; एषां विशेषाणां भेदानामित्यर्थः।– The substance whichever gives the shelter to others is known as *Āśraya. Dravya* is that which gives shelter to *Rasā* and *Guṇa. Snigdha* (unctuousness), *Guru* (heaviness) etc. are the attributes i.e. *Guṇa* and *Dhātu-vardhana* (increase of body tissues) and *Kṣapaṇa* (decrease of body tissues) are the actions i.e. *Karma*. '*Saṃsvādaḥ*' means subdivisions. Basing on those different types of *Rasās* are formed.

तत्र द्रव्यभेदादाधारभेदेनाश्रितस्यापि रसस्य भेदो भवति,आश्रयो हि कारणं, कारणभेदाच्च कार्यभेदोऽवश्यं भवतीत्यर्थः।– On the basis of the change of matter (*Dravya*), components residing in it also changes. Here *Dravya* is *Āśraya* and also *Kāraṇa* while *Rasa, Guṇa* and *Karma* are *Āśrayī* and therefore changes in *Kārya* are seen due to changes in *Kāraṇa*.

गुर्वादिगुणभेदास्तथा कर्मभेदाश्च रसकृता एव।– Variation in the attributes like *Guru, Laghu* etc. and also in the actions like *Laṅghana, Bṛṃhaṇa* etc. are all happens due to *Rasa* only.

ततश्च कार्यभेदादवश्यं कारणभेद इति पूर्वपक्षाभिप्रायः।– Thus the argument of the first part has been explained that the difference in effect is certainly seen as per the cause.

संस्वादभेदस्तु एकस्यामपि मधुरजाताविक्षुक्षीरगुडादिगतः

प्रत्यक्षमेव भेदो दृश्यते, स तु संस्वादभेदः स्वसंवेद्य एव;- Even though *Madhura Rasa* (sweetness) is one and the same; but variations of the sweetness in different substances like *Ikṣu* (sugarcane), *Kṣīra* (milk) and *Guḍa* (jaggery) are seen. Thus the subdivisions of the taste can be experienced by the individuals practically.

यदुक्तं "इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्। भेदस्तथाऽपि नाख्यातुं सरस्वत्याऽपि शक्यते" इति।।- It is said that "There is a great difference in the sweetness of *Ikṣu* (sugarcane), *Kṣīra* (milk) and *Guḍa* (jaggery); and this diversity cannot be explained even by Goddess *Sarasvatī*.

Ātreya the Chairperson's concluding Remarks by Refuting the Views of Various Scholars

षडेव रसा इत्युवाच भगवानात्रेयः पुनर्वसुः, मधुराम्ललवणकटुतिक्तकषायाः।

Lord *Punarvasu Ātreya* declared that *Rasās* are six only such as *Madhura* (sweet), *Amla* (sour), *Lavaṇa* (saline), *Kaṭu* (pungent), *Tikta* (bitter) and *Kaṣāya* (astringent).

मधुराम्ल लवण कटु तिक्त कषायः

Cakrapāṇi:

सिद्धान्तं पुनर्वसुवचनेनाह- षडेवेत्यादि।- With the words '*Ṣaḍeva*' the author has presented the comments given by Lord *Ātreya* in the form of a principle that the tastes are only six.

Refutation of Ekarasa Vāda

तेषां षण्णां रसानां योनिरुदकं

As *Udaka* is the base for all the six tastes and cause is different from effect and hence the opinion of *Bhadrakāpya* has been refuted.



Cakrapāṇi:

पूर्वपक्षोक्तरसैकत्वादिव्यवस्थामाह- तेषां षण्णामित्यादि।- Thus the argument of the first part that *Rasās* are one only is refuted by the statement given by *Ātreya* in the form of "*Teṣāṃ Ṣaṇṇāṃ*" and declared that *Rasās* are six in number.

योनिः आधारकारणं, कार्यकारणयोश्च भेदात् सिद्ध उदकाद्रसभेदः प्रत्यक्ष एवेति भावः।- The '*Yoni*' means *Ādhāra Kāraṇa* i.e. the basic cause for *Rasa* (taste) is *Udaka* (water). As *Kāraṇa* is different from *Kārya*, it is very much clear that taste differs from water.

क्षितिव्यतिरिक्तमुदकमेव यथा रसयोनिस्तथा "रसनार्थो रसस्तस्य" (सू. अ. 1) इत्यादौ विवृतमेव दीर्घञ्जीवितीये।- It is not the *Kṣiti* (*Pṛthvī*) but *Jala* (water) is the causative factor for the formation of *Rasa* (taste) and which is the object of *Rasanendriya* (tongue). The same is mentioned in the 1st chapter entitled '*Dīrghañjīvitīya Adhyāya*' *vide* verse no 64.

Refutation of Dvirasa & Trirasa Vāda

छेदनोपशमने द्वे कर्मणी, तयोर्मिश्रीभावात् साधारणत्वं

As *Chedana* and *Upaśamana* are the two functions and *Sādhāraṇatva* is the combination of both these functions; and hence the views of *Dvirasa & Trirasa Vāda* of *Śākunteya* and *Pūrṇākṣa Maudgalya* have been refuted.

Cakrapāṇi:

तयोर्मिश्रीभावादिति कर्मणोरमूर्तयोर्मिश्रीभावानुपपत्तौ तदाधारयोर्द्रव्ययोर्मिश्रीभावादिति बोद्धव्यम्। साधारणमिति साधारणकार्ययोगित्वम्।- As there is no tangible form (*Amūrta*) in both *Chedana* and *Upaśamana*, they cannot be combined together; but this is due to the substance (*Dravya*), which connects and produces *Sādhāraṇā* effect.

Refutation of Rasa Catuṣka Vāda

स्वाद्वस्वादुता भक्तिः, हिताहितौ प्रभावौ

As *Svādu* and *Asvādu* are the subjective inclination towards object (*Bhakti*) and *Hita* and *Ahita* constitutes specific action (*Prabhāva*); and hence the opinion of *Rasa Catuṣka Vāda* of *Hiraṇyākṣa* has been refuted.

Cakrapāṇi:

भक्तिः इच्छेत्यर्थः। तेन, योयमिच्छति स तस्य स्वादुरस्वादुरितर इति पुरुषापेक्षौ धर्मौ, न रसभेदकार्यावित्यर्थः।- '*Bhakti*' means *Icchā* i.e. desire. It is a personal feeling and whatsoever is desired by the person is known as *Hita* (wholesome) and unwanted is *Ahita* (unwholesome). Thus *Hita* and *Ahita* cannot be considered as *Rasa*; instead it depends upon subjective interest of the individual for various tastes.

Refutation of Pañca Rasa Vāda

पञ्चमहाभूतविकारास्त्वाश्रयाः प्रकृतिविकृतिविचारदेशकालवशाः

As the manifestations (*Vikāra*) of *Pañcamahābhūta* are the substrata (*Āśrayā*) of the *Rasās* and which are influenced by *Prakṛti* (nature), *Vikṛti* (modification), *Vicāra* (combination with other materials), *Deśa* (habitat) and season; and hence the opinion of *Pañca Rasa Vāda* of *Kumāraśirā Bharadvāja* has been refuted.

Cakrapāṇi:

पञ्चमहाभूतेत्यादौ 'तु' शब्दोऽवधारणे; तेन आश्रया एव, न रसा इत्यर्थः। किंभूता भौमादयो भूतविकारा आश्रया इत्याह- प्रकृतिविकृतिविचारदेशकालवशा इति;- Here the word '*Tu*' is used in the sense of certainty. The five *Mahābhūtās* are the substrata for the *Rasās* (tastes) only but they are not the tastes themselves. How these derivatives of *Pṛthvī* and the other elements act as the substrata is explained that these *Pañcamahābhūtās* depends upon or conditioned with *Prakṛti, Vikṛti, Vicāra, Deśa, Kāla* etc.

वशशब्दोऽधीनार्थः, स च प्रकृत्यादिभिः प्रत्येकं योज्यः।- The term '*Vaśa*' means subordination or dependence. The examples of *Prakṛti* and others are explained separately.

तत्र प्रकृतिवशा यथा- मुद्गाः कषाया मधुराश्च सन्तः प्रकृत्या लघवः; एतद्धि लाघवं न रसवशं,तथाहि सति कषायमधुरत्वाद्गुरुत्वं स्यात् ;- As *Mudga* (green

gram) depends on *Prakṛti* (nature), even though it contains *Kaṣāya* and *Madhura Rasa* it is *Laghu* (light) by nature, because this action is not based on *Rasa* (taste). It would have been heavy, if it could work based on its taste.

Mudga
* *Kaṣāya + Madhura Rasa*
* *Laghu*
प्रकृति
Nature

Vrīhi
* *Vrīhi - Guru; Saktu - Laghu*
* *Saktu - Laghu; Saktu piṇḍa - Guru*
विकृति
Modification

Madhu + Ghṛta
* Both are wholesome individually
* Unwholesome when combined equally
विचार
Combination

देश
Land
Habitat
* *Sveta Kapoti* is anti-toxic if grown on Anthill
* Himalayan plants are Excellent

Mulaka
* *Bāla Mūlaka - Tridoṣa hara*
* *Vṛddha Mūlaka - Tridoṣa kara*
काल
Time

विकृतिवशं च व्रीहेर्लाजानां लघुत्वं, तथा सक्तुसिद्धपिण्डकानां च गुरुत्वम्;- *Vrīhi Dhānya* is *Guru* (heavy) but when it is changed in the form of *Lājā* (fried or parched grain) it becomes *Laghu* (light). It is all happens because of *Vikṛti* (modification). Similarly *Saktu* is *Laghu* and becomes *Guru* when it is taken in the form of *Piṇḍa* (round ball).

विचारणा विचारो द्रव्यान्तरसंयोग इत्यर्थः, तेन विचारणावशं यथा- मधुसर्पिषी संयुक्ते विषं, तथा विषं चागदसंयुक्तं स्वकार्यव्यतिरिक्तकार्यकारि;- '*Vicāra*' means *Vicāraṇā* i.e. combination with other substances. For example: *Madhu* and *Ghṛta* both are wholesome individually, but when they are combined together with equal quantity becomes toxic. Similarly a poisonous substance mixed with an antitoxic substance doesn't act as a toxic material.

देशो द्विविधो भूमिरातुरश्च, तत्र भूमौ 'श्वेतकापोती वल्मीकाधिरूढा विषहरी', तथा "हिमवति भेषजानि महागुणानि भवन्ति", शरीरदेशे यथा- "सक्थिमांसाद्गुरुतरं स्कन्धक्रोडशिरस्पदाम्" (सू. अ. 27) इत्यादि;- '*Deśa*' is of 2 types viz. *Bhūmi* (land) and *Ātura* (body of a diseased person). According to the land the action of the drugs also varies. A plant named *Śveta-Kāpotī* works as an anti-poison, when it is grown on anthill; and the plants grown in the Himalayan region have excellent properties. Similarly according to the place of the body also the properties of the flesh of an animal differ. The flesh of the shoulders (*Skandha*), flanks (*Kroḍa*) and head (*Śiras*) is heavier than thighs (*Śakti*).

कालवशं तु यथा मूलकमधिकृत्योक्तं- "तद्बालं दोषहरं वृद्धं त्रिदोषम्" (सू. अ. 27), तथा "यथर्तुपुष्पफलमाददीत" (क. अ. 1) इत्यादि।- '*Kāla*' also influences the properties of the drugs. For example: *Bāla Mūlaka* (tender radish) pacifies *Doṣās* whereas on maturity it aggravates the *Doṣās* (Sū. 27/168). Similarly it is clearly indicated that in order to obtain optimum results, one should procure flowers, fruits etc. in an appropriate season (Ka. 1/10).

अत्र चैकप्रकरणोक्ता येऽनुक्तास्ते चकारात् स्वभावादिष्वेवान्तर्भावनीयाः। यदुक्तं- "चरः शरीरावयवाः स्वभावो धातवः क्रियाः। लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते" (सू. अ. 27) इति। तत्र, चरशरीरावयवधातूनां देशेन ग्रहणं, मात्रा विचारे प्रविशति, शेषं स्वभावे; तथा रसविमाने वक्ष्यमाणं चात्राप्रविष्टमाहारविशेषायतनमन्तर्भावनीयं यथासम्भवम्।- The instructions or principles mentioned at one context are also applicable to other contexts also. In the context of *Annapāna Vidhi* it is mentioned that one has to properly examine the *Cara* (*Deśa*), *Śarīra Avayava* (body parts), *Svabhāva* (nature), *Dhātu* (body tissues), *Kriyā* (actions), *Liṅga* (gender), *Pramāṇa* (size), *Saṃskāra* (method of processing) and *Mātrā* (quantity). Here among *Cara*, *Śarīra Avayava* and *Dhātūs* can be included in *Deśa; Pramāṇa* and *Mātrā* can be included in *Vicāra*; and the others *Kriyā*, *Liṅga*, *Saṃskāra* etc. can be included in *Svabhāva*. Besides these factors; the other factors which have not mentioned here but described in the chapter *Āhāra Vidhi Viśeṣāyatana* also should be considered here.

Refutation of Ṣaḍrasa Vāda

तेष्वाश्रयेषु द्रव्यसंज्ञकेषु गुणा गुरुलघुशीतोष्णस्निग्धरूक्षाद्याः

As the substratum (*Āśraya*) of *Rasās* is called *Dravya*, and *Guru* (heaviness), *Laghu* (lightness), *Śīta* (coldness), *Uṣṇa* (hotness), *Snigdha* (unctuousness) and *Rūkṣa* (un-unctuousness) are the attributes of *Dravya*; and hence the opinion of *Ṣaḍrasā Vāda* of *Rājarṣi Vāryovida* has been refuted.

Cakrapāṇi:

स्निग्धरूक्षाद्या इत्यत्रादिग्रहणेनानुक्ता अपि तीक्ष्णमृद्वादयो न रसाः, किंतु द्रव्यगुणाः पृथगेवेति दर्शयति।- Mentioning the word *Ādi* at the end of *Snigdha-Rūkṣa* infers that it should be considered as *Tīkṣṇa*, *Mṛdu* and all the rest of the other 20 attributes. These 20 are *Guṇās* only but not the *Rasās* and are different from *Dravya*.

Refutation of Sapta Rasa Vāda

क्षरणात् क्षारः, नासौ रसः द्रव्यं तदनेकरससमुत्पन्नमनेकरसं कटुकलवणभूयिष्ठमनेकेन्द्रियार्थसमन्वितं करणाभिनिर्वृत्तम्;

As it is possessing corrosive nature (*Kṣaraṇāt*) it is known as *Kṣāra*. It is not a *Rasa*. It is manifested by the combination of many tastes and it possesses itself many tastes and is dominated by *Kaṭu* (pungent) and *Lavaṇa* (saline) *Rasa*. It is the object of many senses and it involves a special method of preparation. Hence the opinion of *Sapta Rasa Vāda* of *Nimi*, the king of *Vaideha* has been refuted.

Cakrapāṇi:

क्षरणात् अधोगमनक्रियायोगात् क्षारो द्रव्यं नासौ रसः, रसस्य हि निष्क्रियस्य क्रियाऽनुपपत्रेत्यर्थः।- As the *Kṣāra* (alkali) possesses the downward movement (*Kṣaraṇa*), it is not considered as *Rasa*, but a *Dravya*; because *Rasa* being non-functional, *Kṣāra* is not the taste and it is a substance.

क्षरणं च क्षारस्य पानीययुक्तस्याधोगमनेन, वदन्ति हि लौकिकाः- 'क्षारं स्रावयामः' इति; शास्त्रे च- "छित्त्वा छित्त्वाऽऽशयात् क्षारः क्षरत्वात् क्षारयत्यधः" (चि. अ. 5) इति।- '*Pānīya Kṣāra*' moves in the downward direction and the people in the world also say that they pour down the alkali. By the classical reference also it is known that due to the corrosive action of the alkali, it splits the body parts and drops down (Ci. 5/59).

हेत्वन्तरमाह- द्रव्यं तदनेकरसोत्पन्नमिति; अनेकरसेभ्यो मुष्ककापामार्गादिभ्य उत्पन्नमनेकरसोत्पन्नं; यतश्चानेकरसोत्पन्नमत एवानेकरसं, कारणगुणानुविधायित्वात् कार्यगुणस्येति भावः। अनेकरसत्वमेवाह- कटुकलवणभूयिष्ठमिति।- भूयिष्ठशब्देनाप्रधानरसान्तरसंबन्धोऽस्तीति दर्शयति।- There

are other reasons also that *Kṣāra* cannot be considered as *Rasa*.

Kṣāra cannot be considered as Rasa because:

- **It possesses downward movement.**
- **Obtained from drugs of different tastes.**
- **Can be perceived by smell & touch also.**
- **Requires *Parisrāvaṇa* (filtration) to prepare.**

Reason I:

- *Kṣāra* is obtained from the substances of different tastes such as *Muṣkaka*, *Apāmārga* etc. As *Kṣāra* is obtained from the substances possessing different tastes, it also has a mixed taste based on cause and effect theory.
- *Kṣāra Dravyās* are predominantly contains *Kaṭu* and *Lavaṇa Rasa* along with other subsidiary tastes.

हेत्वन्तरमाह- अनेकेन्द्रियार्थसमन्वितमिति। क्षारो हि स्पर्शेन गन्धेन चान्वितः, तेन द्रव्यं, रसे हि गुणे न स्पर्शो नापि गन्ध इति भावः।

Reason II:

- *Kṣāra* can be perceived by more than one sense organ. It can also be known by touch and smell and hence it cannot be considered as *Rasa* (taste) and it is a *Dravya* (substance); because *Rasa* cannot be perceived either by touch or by smell.

हेत्वन्तरमाह-करणाभिनिर्वृत्तमिति; करणेन भस्मपरिस्रावणादिनाऽभिनिर्वृत्तं कृतमित्यर्थः, न रसोऽनेन प्रकारेण क्रियत इति भावः।

Reason III:

- For preparing *Kṣāra*, a definite procedure like *Parisrāvaṇa* (filtration) is involved, whereas *Rasa* doesn't require any such procedure.
- Thus *Kṣāra* cannot be considered as *Rasa*.

Refutation of Aṣṭa Rasa Vāda

अव्यक्तीभावस्तु खलु रसानां प्रकृतौ भवत्यनुरसेऽनुरससमन्विते वा द्रव्ये

Avyakta Rasa (unnoticeable or imperceptible taste) is affected only in *Jala Mahābhūta* and it is not a separate taste. It is found in *Anurasa* usually or in the substances having secondary tastes only. Hence the opinion of *Aṣṭa Rasa Vāda* of *Baḍiśa Dhāmārgavā* has been refuted.

Cakrapāṇi:

अव्यक्तरसपक्षं निषेधयति- अव्यक्तीभाव इत्यादि।- Here the author has denied the idea of *Avyakta Rasa* by introducing the verse with '*Avyaktībhāva*'.

अव्यक्तीभाव इत्यभूततद्भावे च्विप्रत्ययेन रसानां मधुरादीनां व्यक्तानामेव क्वचिदाधारेऽव्यक्तत्वं, नान्यो मधुरादिभ्योऽव्यक्तरस इत्यर्थः।- The term '*Avyaktībhāva*' is formed with the '*Cvi*' suffix to the thing which is non-existing. Perceiving the taste deprived of any particular *Rasa* like sweet and sour and it is known as '*Avyakta Rasa*'. But there is no separate entity as imperceptible taste.

रसानामिति मधुरादीनां षण्णाम्।- '*Rasānāṃ*' means *Madhura*, *Amla* etc. the 6 tastes.

प्रकृतावित्यादि। प्रकृतौ कारणे जल इत्यर्थः।- '*Prakṛtau*' means the *Kāraṇa* i.e. *Jala* (water)

अव्यक्तत्वं च रससामान्यमात्रोपलब्धिर्मधुरादिविशेषशून्या, सा च जले भवति;- There can be a sensation of taste without any specificity like sweet and sour; and this may be considered as '*Avyakta Rasa*'. This sort of feature is available in water.

यत उक्तं जलगुणकथने सुश्रुते- "व्यक्तरसता रसदोषः" (सु. सू. अ. 45) इति, इहापि च 'अव्यक्तरसं च' इति वक्ष्यति,- Describing the characteristics of water, *Ācārya Suśruta* has cited that "The manifestation of any specific taste is called due to poor quality in water". Here also the '*Avyakta Rasa*' of water is quoted.

लोकेऽपि चाव्यक्तरसं द्रव्यमास्वाद्य वक्तारो वदन्ति- जलस्येवास्य रसो न कश्चिन्मधुरादिर्व्यक्त इति। विशेषमधुराद्यनुपलब्धिश्चानुद्भूतत्वेन। यथा- दूरादविज्ञायमानविशेषवर्णे वस्तुनि रूपसामान्यप्रतीतिर्भवति, न शुक्लत्वादिविशेषबुद्धिः,

तथाऽनुरसेऽव्यक्तीभावो भवति;- Generally people tasting a substance of imperceptible taste says that it doesn't possess sweet or any other taste and it is just like water. The reason is that it is because of un-manifested state of sweet and other tastes.

For instance:

When a distant object is seen and it can be identified in general that it is white in color only but the distinct features are unable to notify. Similarly *Anurasa* is also in the imperceptible state.

प्रधानं व्यक्तं रसमनुगतोऽव्यक्तत्वेनेत्यनुरसः, यथा वेणुयवे मधुरे कषायोऽनुरसः। यदुक्तं- "रूक्षः कषायानुरसो मधुरः कफपित्तहा" (सू. अ. 27) इति।- The chief *Rasa* is perceptible and the one which is unnoticeable is known as *Anurasa*. For example: *Madhura Rasa* is the main taste which is perceptible in *Veṇu-Yava* and *Kaṣāya Rasa* is the secondary taste, which is unnoticeable. *Veṇu-Yava* pacifies *Kapha* because of dryness as well as secondary taste of astringent; and also pacifies *Pitta* due to its sweetness.

अनुरससमन्वित इति सर्वानुरसयुक्ते, यथा- विषे; वचनं हि- "उष्णमनिर्देश्यरसं" (चि. अ. 23) इत्यादि। किंवा, 'अणुरससमन्विते' इति पाठः; तेन, अणुरसेनैकेन मरिचेन शर्करापानके कटुत्वमव्यक्तं स्यात्।- There are certain drugs like poison where the taste is said to be imperceptible or unnoticeable. The *Viṣa* is *Uṣṇa* and the taste is imperceptible.

In other reading it is quoted as 'अणुरससमन्विते' instead of अनुरससमन्वित.

अणु means small quantity. When a small quantity of *Marica* (black pepper) is mixed in a drink of sugar, the pungent taste of black pepper becomes secondary.

Refutation of Asaṅkhyeya Rasa Vāda [9]

अपरिसंख्येयत्वं पुनस्तेषामाश्रयादीनां भावानां विशेषापरिसंख्येयत्वान्न युक्तम्, एकैकोऽपि ह्येषामाश्रयादीनां भावानां विशेषानाश्रयते विशेषापरिसंख्येयत्वात्, न च तस्मादन्यत्वमुपपद्यते; परस्परसंसृष्टभूयिष्ठत्वान्न चैषामभिनिर्वृत्तेर्गुणप्रकृतीनामपरिसंख्येयत्वं भवति; तस्मान्न संसृष्टानां रसानां कर्मोपदिशन्ति बुद्धिमन्तः।

तच्चैव कारणमपेक्षमाणाः षण्णां रसानां परस्परेणासंसृष्टानां लक्षणपृथक्त्वमुपदेक्ष्यामः॥9॥

The concept of quoting that tastes are being innumerable is not correct simply because of the plurality of substrata. Although *Rasa* is associated to substrata etc. innumerable factors, but it doesn't lose its original identity, because every single *Rasa* becomes uncountable due to specificity of substrata, property, action, taste, and preparation. Even in combination of *Rasās* their primary source, natural properties and actions do not become innumerable and therefore the action of combined *Rasās* are not described by knowledgeable

persons. Hence the opinion of *Asaṅkhyeya Rasa Vāda* of *Kāṅkāyana*, the physician of *Bāhlīka* has been refuted.

Keeping this in view we shall now explain the specific characteristics of six tastes individually.

Cakrapāṇi:

अपरिसंख्येयपक्षं दूषयति- अपरीत्यादि।- Here the author has refuted the idea of innumerable tastes (*Aasaṅkhyeya Rasa*) by beginning the verse with the word '*Aparī*'.

तेषामिति रसानाम्, अपरिसंख्येयत्वं नयुक्तम्;- '*Teṣām*' means *Rasānāṃ* i.e. among the tastes. Multiple numbers of tastes is not acceptable.

आश्रयादीनां भावानामिति आश्रयगुणकर्मसंस्वादानाम्; विशेषापरिसंख्येयत्वादिति आश्रयादिभेदस्या- परिसंख्येयत्वात्। अत्र हेतुमाह- एकैकोऽपि हीत्यादि।

एषामाश्रयगुणकर्मसंस्वादानां विशेषानेकैकोऽपि मधुरादिराश्रयते, न च तस्मादाश्रयादिभेदादन्यत्वमाश्रितस्य मधुरादेर्भवति।- Variations in the substances (*Dravya*), qualities (*Guṇa*), actions (*Karma*) and in the specificity of tastes (*Rasās*) all these are attributable to six tastes. Due to these variations in the substrata etc.; there should be no variation in the dependent factor i.e. taste as sweetness is common in all.

एवं मन्यते- यद्यपि शालिमुद्गघृतक्षीरादयो मधुरस्याश्रया भिन्नाः, तथाऽपि तत्र मधुरत्वजात्याक्रान्त एक एव रसो भवति बलाकाक्षीरकार्पासादिषु शुक्लवर्ण इव।- In spite of the variation of sweetness in different *Madhura Rasa Dravyās* such as *Śāli Dhānya*, *Mudga* and *Kṣīra* etc., the basic sweetness is common in all of them; like whiteness is usually present in crane (*Balāka*), milk and cotton (*Kārpāsa*).

Basic Sweetness is Common   Basic Whiteness is Common

तथा गुणानां गुरुपिच्छिलस्निग्धादीनामन्यत्वेऽपि कर्मणां वा रसादिवर्धनायुर्जननवर्णकरत्वादीनां भिन्नत्वे सत्यपि न मधुररसस्यान्यत्वं, यत एक एव मधुरस्तत्तद्गुणयुक्तो भवति तत्कर्मकारी चेति को विरोधः।- Likewise, even there is difference in qualities like *Guru* (heaviness), *Picchila* (sliminess), *Snigdha* (unctuousness) and the actions like *Rasādi Vardhana* (rejuvenation), *Ayurjanana* (longevity) and *Varṇakara* (complexion), the sweetness remains the same and being connected with different attributes and it acts in a different way.

तथा मधुरस्यावान्तरास्वादभेदेऽपि मधुरत्वजात्यनतिक्रमः, कृष्णवर्णावान्तरभेदे यथा कृष्णत्वानतिक्रमः।- Although different types of sweet substances vary in the degree of sweetness, yet all of them can be classified under one head viz. *Madhura rasa Dravya*; just as all types of black colored substances can be grouped under blackness itself.

ननु, मैवं भवत्वपरिसंख्येयत्वं रसानां, परस्परसंयोगात्तु य आस्वादविशेषः स कार्यविशेषकरोऽपि; नहि यन्मधुराम्लेन क्रियते, तन्मधुरेण वाऽम्लेन वा शक्यम्; अतस्तेन परस्परसंयोगेनापरिसंख्येयत्वं भविष्यतीत्याह- परस्परेत्यादि। संसृष्टमिति भावेक्तः, तेनपरस्परसंसर्गभूयिष्ठत्वादेषां मधुरादीनामभिनिर्वृत्तेर्न गुणप्रकृतीनामसंख्येयत्वमिति योजना; अयमर्थः:- Now the question arises that even if tastes are not innumerable, the combination of substances, along with changes in the tastes, is also seen as action, such as the action done by the combination of sweet and sour tastes, which can be done not separately. Naturally, the combination of these tastes becomes numerous. In this way, it is made clear that the combination of *Rasās* by this type of combination of the drugs can increase; even then the number of original *Rasās* is only six.

यद्यपि रसाः परस्परसंसर्गेणातिभूयसा युक्ताः सन्तोऽभिनिर्वृत्ता द्विरसादौ द्रव्ये भवन्ति, तथाऽपि न तेषां गुणा गुरुलघ्वादयः, प्रकृतयो वा मधुरादीनां या या आयुष्यत्वरसाभिवर्धकत्वाद्यास्ता असंख्येया भवन्ति, किन्तु य एव मधुरादीनां प्रत्येकं गुणाः प्रकृतयश्च उद्दिष्टास्त एव मिश्रा भवन्ति।- If a substance is more than two tastes, this combination of tastes does not result in new activity but only a mixture of qualities like heaviness and lightness and actions that lead to longevity attributable to each taste are manifested there. But the number of tastes is not innumerable. Properties of sweet and other flavored substances also had qualities and the characters are also of mixed type.

किंवागुणप्रकृतीनामितिमधुरादिषड्गुणस्वरूपाणामित्यर्थः; तेन, रसस्य रसान्तरसंसर्गे दोषाणामिव दोषान्तरसंसर्गे रसानां नापरिसंख्येयत्वमित्यर्थः।- '*Guṇa-Prakṛtīnām*' means *Guṇa* and *Svarūpa* of the six tastes such as *Madhura*, *Amla* etc. The number of basic six *Rasās* is not going to be increased by various combinations of *Rasās*; similar to the number of *Doṣās* which remains three even they become multiple by different combinations and permutations. Thus it is

clear that the number of *Rasās* are six only and not innumerable.

प्रकृतिशब्देन कर्म वोच्यते, तेन गुणकर्मणामित्यर्थः। मधुरादीनामवान्तरास्वादविशेषोऽपि परस्परसंसर्गकृते ज्ञेयः। यत एव हेतो रसानां संसृष्टानां नान्ये गुणकर्मणी भवतः, अत एव संसृष्टानां रसानां पृथक्कर्म शास्त्रान्तरेऽपि नोक्तमित्याह- तस्मादित्यादि।- The term '*Prakṛti*' refers to *Karma*; it means the properties and functions of *Rasa*. Sometimes slight variation or change in taste such as *Madhura* (sweet) etc. is observed due to combination of *Rasās*; however these altered tastes are not different from the basic six *Rasās*. Hence the properties and functions of these combined states of *Rasās* have not been described.

कर्मशब्देनेह गौरवलाघवादिकारका गुरुत्वादयो रसरक्तादिजननादयश्चापि बोद्धव्याः।- The word '*Karma*' indicates that which is responsible for heaviness (*Gaurava*) and lightness (*Lāghava*) in the body as well as cause for the formation of *Rasa*, *Rakta* and other body tissues.

न केवलमन्यशास्त्रकारै रसानां संसृष्टानां कर्म नोपदिष्टं, किंतु वयमपि नोपदेक्ष्याम इत्याह- तच्चैवेत्यादि। तच्चैव कारणमिति परस्परसंसर्गेऽपि रसानामनधिकगुणकर्मत्वम्।- The actions of combination of *Rasās* are not mentioned by only the authors of other compendia; even in this book it is not being explained. The reason for not being explained is that there is no additional benefit from the combination of *Rasās*.

लक्षणेन पृथक्त्वं लक्षणपृथक्त्वम्।- '*Lakṣaṇa Pṛthaktva*' means explanation of the characteristics of different tastes separately.

तत्र लक्ष्यते येन तल्लक्षणम्;- *Lakṣaṇa* means that which is to be perceived.

अतस्तु 'मधुरो रसः' इत्यादिना ग्रन्थेन, तथा 'स्नेहनप्रीणनह्लादन' इत्यादिना च यद्वाच्यं, तत् सर्वं गृह्यते;। किंवा, लक्षणशब्देन 'मधुरो रस' इत्यादिग्रन्थवाच्यं

लक्षणमुच्यते, पृथक्त्वं च रसभेदज्ञानार्थं यद्वक्ष्यति 'स्नेहनप्रीणन' इत्यादितद्बह्वते।– Whatever the explanation from the mention of '*Madhuro Rasaḥ*' and '*Snehana Prīṇana Hlādana*' can be fully understood. By means of *Lakṣaṇa*, it can be known that the particular substance is possessing *Madhura Rasa*. Characteristics of different tastes can be understood by means of its functions such as *Snehana, Prīṇana* etc.

Description about Dravya [10]

अग्रे तु तावद्द्रव्यभेदमभिप्रेत्य किंचिदभिधास्यामः।
सर्वं द्रव्यं पाञ्चभौतिकमस्मिन्नर्थे; तच्चेतनावदचेतनं च, तस्य गुणाः शब्दादयो गुर्वादयश्च द्रवान्ताः, कर्म पञ्चविधमुक्तं वमनादि ॥१०॥

- Here after certain observations regarding *Dravya* is going to be delineated.
- All the *Dravyās* (substances) are composed of or born from the five basic elements i.e. *Pañcamahābhūta*.
- Some of them are animate (*Cetana*) and some others are inanimate (*Acetana*).
- The qualities of the substances are *Śabda* (sound), *Sparśa* (touch), *Rūpa* (vision), *Rasa* (taste) & *Gandha* (smell) and also *Gurvādi* 20 *Guṇās*.
- These substances are useful for the 5 types of therapeutic procedures viz. *Vamana* (emesis), *Virecana* (purgation), *Nirūhavasti* (enema with decoctives), *Anuvāsanavasti* (enema with unctuous substances) and *Nasya* (errhine).



Cakrapāṇi:

अग्रे त्वित्यादि। रसेषु वाच्येषु द्रव्यभेदमभिप्रेत्य प्रतिपादनीयतया परिगृह्य रसानां द्रव्यज्ञानाधीनज्ञानत्वाद्द्रव्याभिधानमग्रे कृतमित्यर्थः।– Here the description of *Dravya* is mentioned initially because it is the base for the tastes. As the knowledge of *Rasās* is depends on the substances and hence they are described in the beginning.

किंचिदिति आयुर्वेदोपयोगिद्रव्यस्वरूपं न सर्वम्, अप्रसङ्गदोषादिति भावः।– '*Kiṃcit*' means only some of the drugs useful for *Āyurveda* and not all. Here, only the drugs useful for the science of *Āyurveda* are being described, but not all drugs present in the universe, because it would be inappropriate for context.

सर्वद्रव्यमिति कार्यद्रव्यम्।– '*Sarvaṃ Dravyaṃ*' means all the *Kārya Dravyās*.

अस्मिन्नर्थे अस्मिन् प्रकरणे।– '*Asminnarthe*' means in the present occasion

द्रवान्ता इति वचनेन पूर्वोक्तान् विंशतिगुणानाह।– '*Dravāntāḥ*' means previously mentioned *Gurvādi* 20 *Guṇās* which ends with *Drava*.

अत्र च परत्वापरत्वादीनामिहानभिधानेन चिकित्सायां परत्वादीनामप्राधान्यं दर्शयति; येऽपि तत्रापि युक्तिसंयोगपरिमाणसंस्काराभ्यासा अत्यर्थचिकित्सोपयोगिनोऽपि न ते पर्थिवादिद्रव्याणां

शब्दादिवत् सांसिद्धिकाः किंतर्ह्याधेयाः, अत इह नैसर्गिकगुणकथने नोक्ताः।– Due to the least importance of the therapeutic approach, the attributes like *Para* and *Apara* are not included here. Although some of the attributes of this group like *Yukti, Saṃyoga, Parimāṇa, Saṃskāra* and *Abhyāsa* etc. are useful for treatment, but they have no innate qualities such as *Śabda, Sparśa* etc. They simply represent different conditions of matter and hence they are not included here.

उक्तमिति अपामार्गतण्डुलीये। एतच्च प्राधान्यादुच्यते, तेन बृंहणाद्यपि बोद्धव्यम्।– '*Uktam*' means already mentioned about *Vamana* and the other *Pañcakarma* therapeutic procedures in the chapter entitled '*Apāmārga-Taṇḍulīya Adhyāya*', because of its importance. Since the word '*Karma*' has many other meanings and therefore *Bṛṃhaṇa, Laṅghana* and other actions also can be understood.

Pārthiva Dravya Lakṣaṇa [11]

तत्र द्रव्याणि गुरुखरकठिनमन्दस्थिरविशदसान्द्रस्थूलगन्धगुणबहुलानि पार्थिवानि, तान्युपचयसङ्घातगौरवस्थैर्यकराणि

The substance which possesses the qualities such as *Guru* (heavy), *Khara* (tough), *Kaṭhina* (hard), *Manda* (dull), *Sthira* (stable), *Viśada* (non-slimy), *Sāndra* (solid), *Sthūla* (gross) and predominant in *Gandha* (smell) is called *Pārthiva Dravya*. It bestows *Upacaya* (growth), *Saṅghāta* (compactness), *Gaurava* (heaviness) and *Sthairya* (stability).

Cakrapāṇi:

बहुलशब्दो गुर्वादिभिः प्रत्येकं संबध्यते; किंवा गन्धेनैव, यतो गन्धगुणबहुला पृथिव्येव भवति; अत एवद्रव्यान्तरलक्षणेऽपि वैशेषिकगुणोऽन्त एव पठ्यते 'रसगुणबहुलानि' इत्यादि;

तेन तत्रापि रसादिभिरेव बहुलशब्दो योज्यः।– The word '*Bahula*' is related specifically to *Gurvādi Guṇa*, otherwise also connected to *Gandha* which is the characteristic feature of *Pṛthvī*. i.e.'*Gandha Bahulā Pṛthvī*'. Therefore, the features of other substances are also read in the end, like '*Rasa Guṇa Bahulāni*' etc. Thus the word '*Bahula*' can also be connected at the end of other *Vaiśeṣika Guṇās*.

Pārthiva Dravya

सर्वकार्यद्रव्याणां पाञ्चभौतिकत्वेऽपि पृथिव्याद्युत्कर्षेण पार्थिवत्वादिज्ञेयम्।– Even though all the substances are formed out of *Pañcamahābhūtās*, based on the dominancy of *Pṛthvī*, they are called *Pārthiva Dravya*. Similarly based on specific *Mahābhūta*, the substances are named as so.

सङ्घातः काठिन्यं,– '*Saṅghāta*' means *Kāṭhinya* i.e. hardness.

स्थैर्यम् अविचाल्यम्।– '*Sthairya*' means *Avicālya* i.e. immovability.

Āpya Dravya Lakṣaṇa

द्रवस्निग्धशीतमन्दमृदुपिच्छिलरसगुणबहुलान्याप्यानि, तान्युपक्लेदस्नेहबन्धविष्यन्दमार्दवप्रह्लादकराणि;

The substance which possesses the qualities such as *Drava* (liquid), *Snigdha* (unctuous), *Śīta* (cold), *Manda* (dull), *Picchila* (slimy) and


Āpya Dravya

predominant in *Rasa* (taste) is called *Āpya Dravya*. It confers *Upakleda* (keeping wet), *Sneha* (unctuousness), *Bandhana* (cohesion), *Viṣyandana* (moistness), *Mārdava* (softness) and *Prahlāda* (pleasure).

Cakrapāṇi:

बन्धनं परस्परयोजनं,- '*Bandhanaṃ*' means *Parasparayojanaṃ* i.e. joining with one another.

प्रह्लादः शरीरेन्द्रियतर्पणम्।- '*Prahlāda*' means *Śarīrendriya Tarpaṇam* i.e. which gives happiness or satiation to both body as well as senses.

Āgneya Dravya Lakṣaṇa

उष्णतीक्ष्णसूक्ष्मलघुरूक्षविशदरूपगुणबहुलान्याग्नेयानि, तानि दाहपाकप्रभाप्रकाशवर्णकराणि;

The substance which possesses the qualities such as *Uṣṇa* (hot), *Tīkṣṇa* (sharp), *Sūkṣma* (subtle), *Laghu* (light), *Rūkṣa* (dry), *Viśada* (non-slimy) and predominant in *Rūpa* (appearance, showing or form) is called *Āgneya Dravya*. It causes *Dāha* (burning sensation), *Pāka* (digestion, process of transformation, putrefaction etc.), *Prabhā* (lustre), *Prakāśa* (radiance) and *Varṇa* (color).

Āgneya Dravya

Cakrapāṇi:

सूक्ष्मं सूक्ष्मस्रोतोऽनुसारि।- '*Sūkṣma*' means that which is capable of moving in minute channels too.

प्रभा वर्णप्रकाशिनी दीप्तिः; यदुक्तं- "वर्णमाक्रामति च्छाया प्रभा वर्णप्रकाशिका" (इं.अ.7) इत्यादि।- '*Prabhā*' is the light that reflects the complexion. It is also mentioned in the 7th chapter of *Indriyasthāna* that the complexion is seized by shadow and reflected by the light.

Vāyavya Dravya Lakṣaṇa

लघुशीतरूक्षखरविशदसूक्ष्मस्पर्शगुणबहुलानि वायव्यानि, तानि रौक्ष्यग्लानिविचारवैशद्यलाघवकराणि

The substance which possesses the qualities such as *Laghu* (light), *Śīta* (cold), *Rūkṣa* (dry), *Khara* (tough), *Viśada* (non-slimy) *Sūkṣma* (subtle), and predominant in *Sparśa* (touch or tactile sensation) is called *Vāyavya Dravya*. It produces *Raukṣya* (dryness), *Glāni* (exhaustion), *Vicāra* (different kinds of activities), *Vaiśadya* (non-sliminess) and *Lāghava* (lightness).

Vāyavya Dravya

Cakrapāṇi:

विचरणं विचारो गतिरित्यर्थः।- '*Vicāra*' means *Vicāraṇā* i.e. movement

Ākāśīya Dravya Lakṣaṇa

मृदुलघुसूक्ष्मश्लक्ष्णशब्दगुणबहुलान्याकाशात्मकानि, तानि मार्दवसौषिर्यलाघवकराणि॥11॥

The substance which possesses the qualities such as *Mṛdu* (soft), *Laghu* (light), *Sūkṣma* (subtle), *Ślakṣṇa* (smooth) and predominant in *Śabda* (sound or hearing) is called *Ākāśīya Dravya*. It produces *Mārdava* (softness), *Sauṣirya* (cavitation or hollowness) and *Lāghava* (lightness).

Cakrapāṇi:

सौषिर्यं रन्ध्रबहुलता।- '*Sauṣirya*' means *Randhra-bahulatā* i.e. porosity or hollowness.

अत्राकाशबाहुल्यं द्रव्यस्य पृथिव्यादिभूतान्तराल्पत्वेन भूरिव्यक्ताकाशत्वेन च ज्ञेयं, यदेव भूरिशुषिरं तत्राभसं; किंवा आकाशगुणबहुलत्वेन नाभसं द्रव्यमित्युच्यते।- Due to the primacy of *Ākāśa Mahābhūta* and the low amount of *Pṛthvī* and other elements, there is more porosity in those substances. As those substances are having the majority of *Ākāśa Mahābhūta*; and hence they are called *Nābhasa Dravya*.

Nothing is Non-Medicinal [12]

अनेनोपदेशेन नानौषधिभूतं जगति किंचिद्द्रव्यमुपलभ्यते तां तां युक्तिमर्थं च तं तमभिप्रेत्य॥12॥

There is nothing in this universe, which is non-medicinal, which cannot be used for many purposes and many ways. Every substance has a medical utility and its use depends on the physician's intelligence.

Cakrapāṇi:

अनेनेति प्रतिनियतद्रव्यगुणोपदेशेन; यत् पार्थिवादि द्रव्यं यद्गुणं तद्गुणे देहे संपाद्ये तद् भेषजं भवतीत्यर्थः।- Through the above description of the specific characteristics and effects of each of the drugs owning the dominancy of *Pañcamahābhūtās* it is clear that they are useful for the body by augmenting the deficiency of that *Mahābhūta* in the body.

तच्च पार्थिवादि द्रव्यं न सर्वथा न च सर्वस्मिन् व्याधौ भेषजमित्याह- तां तां युक्तिमित्यादि। - युक्तिमिति उपायम्,अर्थमिति प्रयोजनम्, अभिप्रेत्येति अधिकृत्य; तेन केनचिदुपायेन क्वचित् प्रयोजने किंचिद्द्रव्यमौषधं भवति न सर्वत्र।- Nevertheless, it is not mandatory that medicines dominated by *Pañcamahābhūtās* should always be useful as medicinal agents and useful for all diseases. These drugs should be used with appropriate method and specific purpose. Thus it indicates that when a particular drug used with proper method and purpose only acts as a medicine; and otherwise it will not happen.



तेन यदुच्यते- वैरोधिकानां सर्वदाऽपथ्यत्वेन 'नानौषधं द्रव्यम्' इति वचो विरोधि; तत्र भवति, वैरोधिकानि हि संयोगसंस्कारदेशकालाद्यपेक्षाणि भवन्ति, वैरोधिकसंयोगाद्यभावे तु पथ्यान्यपि क्वचित् स्युः।- If it is said that "There is nothing in this universe which is non-medicinal", then how to understand unwholesomeness of contrary substances? It is clarified that unwholesomeness of the substances depends upon *Saṃyoga*, *Saṃskāra*, *Deśa*, *Kāla* etc. Do at times, these unwholesome substances also become wholesome.

यान्यपि (सर्वदाऽपि) स्वभावादेव विषमन्दकादीन्यपथ्यानि, तान्यप्युपाययुक्तानि क्वचित् पथ्यानि भवन्ति; यथा उदरे "विषस्य तिलं दद्यात्" (चि. अ. 13) इत्यादि।- Generally *Viṣa* (poison) and *Mandaka* (improperly

fermented curd) are unwholesome by nature; but they will become wholesome with reasonable effort. For example: The poison equivalent to the seed of a sesamum is useful in *Udara* (Ci. 13/178).

यत्तु तृणपांशुप्रभृतीनि नोपयुज्यन्ते, अतो न तानि भेषजानीत्युच्यते; तत्र, तेषामपि भेषजस्वेदाद्युपायत्वेन भेषजत्वात्।- The statement of that "the grass and dust are not the medicine" is wrong because they are also useful for *Svedakarma*, and hence they also considered as medicine. In such circumstances what do you say about other drugs? There is nothing to say; but one has to accept that all the substances in the universe as medicine.

Modus Operandi of Drugs [13]

न तु केवलं गुणप्रभावादेव द्रव्याणि कार्मुकाणि भवन्ति; द्रव्याणि हि द्रव्यप्रभावाद्गुणप्रभावाद्द्रव्यगुणप्रभावाच्च तस्मिंस्तस्मिन् काले तत्तदधिकरणमासाद्य तां तां च युक्तिमर्थं च तं तमभिप्रेत्य यत् कुर्वन्ति, तत् कर्म; येन कुर्विन्ति, तद्वीर्यं; यत्र कुर्वन्ति, तदधिकरणं; यदा कुर्वन्ति, स कालः; यथा कुर्वन्ति, स उपायः; यत् साधयन्ति, तत् फलम्॥13॥

It is not that the substances act only on the basis of their qualities. To be frankly speaking, they work on the basis of their own nature or qualities or both at appropriate time, in a given place, in appropriate circumstances and situations. The effect so produced is considered as their action (*Karma*); the factor responsible for the manifestation of the effect is known as *Vīrya*; where they act is the *Adhikaraṇa* (location); when they act is the time (*Kāla*); how they act is the *Upāya* (method of conduction); what they accomplish is the achievement or therapeutic effect (*Phala*).



Modus Operandi of Śiroviecana Dravya

Cakrapāṇi:

पार्थिवादिद्रव्याणां गुरुखरादिगुणयोगाद्भेषजत्वमुक्तं, तेन गुणप्रभावादेव भेषजं स्यादिति शङ्कां निरस्यन्नाह- न तु केवलमित्यादि।- The substances that hold the dominancy of *Pṛthvī Mahābhūta* and the others (*Pārthivādi Dravyās*) are functioning as medicines by the influence of the qualities like *Guru* (heaviness), *Kaṭhina* (hardness) etc. Whether the action of substances is only due to the effect of properties or other factors also happen? In order to clarify the above doubts, the author has started the present verse with the words '*Na Tu*'.

द्रव्यप्रभावाद्यथा- दन्त्या विरेचकत्वं, तथा मणीनां विषादिहन्तृत्वमित्यादि।

Examples of Dravya Prabhāva:

- Purgative action of *Dantī*.
- Anti-poisonous effect of precious gems etc.

गुणप्रभावाद्यथा-ज्वरे तिक्तको रसः, शीतेऽग्निरित्यादि।

Examples of Guṇa Prabhāva:

- Useful effect of *Tikta Rasa Dravyās* in *Jvara*.
- Application of heat in cold conditions.

द्रव्यगुणप्रभावाद्यथा- कृष्णाजिनस्योपरीति, अत्रापि कृष्णत्वं गुणोऽजिनं च द्रव्यमभिप्रेतं; यथा वा- "मण्डलैर्जातरूपस्य तस्या एव पयः शृतम्" (चि. अ. 2. पा. 3); तत्र मण्डलगुणयुक्तस्यैव जातरूपस्य कार्मुकत्वम्।-

Examples of Dravya-guṇa Prabhāva:

- Sitting on the skin of black deer. Here the skin is the substance and blackness is the property.
- *Jātarūpa* means gold. The cow's milk boiled with a gold ring acts as aphrodisiac by the very nature of gold as well as its roundness (*Maṇḍala*). Here gold is the substance and roundness is the property.

कथं कुर्वन्तीत्याह- तस्मिंस्तस्मिन्नित्यादि। तां तां युक्तिमासाद्येति तां तां योजनां प्राप्य।- How the drug acts? It is explained that the drugs are to be administered at an appropriate time, proper planning and the specific ones for getting beneficial results.

यत् कुर्वन्तीत्यादावुदाहरणं यथा- Various aspects of the drug action is illustrated as under.

शिरोविरेचनद्रव्याणि यच्छिरोविरेचनं कुर्वन्ति, तच्छिरोविरेचनं कर्म;- By the administration of *Śirovirecana Dravyās* (errhine), the vitiated *Doṣās* will be eliminated from the head. This is known as the drug action (*Karma*).

येनोष्णत्वादिकारणेन शिरोविरेचनं कुर्वन्ति, तद्वीर्यं, वीर्यं शक्तिः, सा च द्रव्यस्य गुणस्य वा;- The hotness (*Uṣṇatva*) etc. are the factors responsible for the evacuation of *Doṣās* from the head and is known as *Vīrya* (potency). The *Vīrya* is the power and it may be related to *Dravya* or its *Guṇa*.

यत्र शिरोविरेचनं कुर्वन्ति तदधिकरणं शिरः, नान्यत्राधिकरणे शिरोविरेचनद्रव्यं प्रभवतीत्यर्थः;- The place where errhine is being performed is known as the *Adhikaraṇa* i.e. the head (*Śiras*). This means that the *Śirovirecana Dravya* works only in the area of the head and none other than this place.

यदेति वसन्तादौ शिरोगौरवादियुक्ते च काले, एतेनाकाले शीते शिरोविरेचनं स्तब्धत्वान्न कार्मुकं, किन्तु स्वकाल एव;- The ideal time for administration of *Śirovirecana Dravyās* is during the spring (spring) or when the patient suffers from heaviness in the head (*Śiro-Gaurava*) etc.; other than this season or occasions the therapy is ineffective. In cold weather, the administration of *Śirovirecana* leads to stiffness and it is also useless.

यथा येन प्रकारेण प्रधमनावपीडनादिना तथा "प्रसारिताङ्गमुत्तानं शयने संस्तरास्तृते। ईषत्प्रलम्बशिरसं संवेश्य चावृतेक्षणम्" इत्यादिना विधिना कुर्वन्ति, स उपायः;- By performing the therapy according to the procedure is known as '*Upāya*'. As per the administration of *Pradhamana Nasya* and *Avapīḍana Nasya* the position of the patient should be as follows during the procedure. He

should lie on a bed covered with a bed sheet; by stretching the upper parts of the body; bending the head slightly backwards and covering the eyes. This is the process and it is called the *Upāya*.

यत् साधयन्ति शिरोगौरवशूलाद्युपरमं, तत् फलं; फलम् उद्देश्यम्।– Achieving the relief from heaviness and headache etc. is known as the result (*Phala*). *Phala* is the objective of the treatment.

कर्म कार्यं साधनम्, उद्देश्यं फलं साध्यं;– Thus *Karma* is the instrument for *Kārya*. *Phala* is the objective of achievement.

यथा– यागनिष्पाद्यो धर्मः कार्यतया कर्म, तज्जन्यस्तु स्वर्गादिरुद्देश्यः फलम्;– *Dharma* can be attained by performing *Yāgna* and by this *Dharma* one has to achieve the salvation, which is the ultimate objective of human beings.

एवं वमनादिष्वपि कर्माधिकरणाद्युन्नेयम्।– Thus *Vamana* and the other therapeutic procedures also should be understood similar to *Śirovirecana*.

63 Types of Rasa Bheda [14]

भेदश्चैषां त्रिषष्टिविधविकल्पो द्रव्यदेशकालप्रभावाद्भवति, तमुपदेक्ष्यामः॥14॥

The *Rasās* are of 63 types based on the influence of *Dravya* (substance), *Deśa* (habitat) and *Kāla* (season).

Cakrapāṇi:

संप्रति द्रव्यमभिधाय विकृतानां रसानामेव भेदमाह– भेदश्चैषामित्यादि।– Now the author has presented different types of combinations of *Rasās* by starting the verse with the words '*Bhedaśca Eṣām*'.

प्रभावशब्दो द्रव्यदेशकालैः प्रत्येकं युज्यते;– The word '*Prabhāva*' is related to all the *Dravya*, *Deśa* and *Kāla* etc. everybody.

तत्र द्रव्यप्रभावाद्यथा– 'सोमगुणातिरेकान्मधुरः' इत्यादि;–

Example for Dravya Prabhāva:

The presence of sweet taste (*Madhura Rasa*) in a substance is due to the dominance of '*Soma Guṇa*'.

देशप्रभावाद्यथा– हिमवति द्राक्षादाडिमादीनि मधुराणि भवन्त्यन्यत्राम्लानीत्यादि;–

Example for Deśa Prabhāva:

Fruits such as *Drākṣā* and *Dāḍima* which are obtained from the Himalayan region are generally sweet and the taste of those same fruits collected from other areas is sour.

कालप्रभावाद्यथा– बालाम्रं सकषायं तरुणमम्लं पक्वं मधुरं, तथा हेमन्ते ओषध्यो मधुरा वर्षास्वम्ला इत्यादि।–

Examples for Kāla Prabhāva:

- Taste of mango is astringent (*Kaṣāya*) during its tender state, sour in taste (*Amla*) when it is unripen and becomes sweet (sweet) in taste in the state of ripening.
- The substances are sweet in taste during winter and sour taste in rainy season.

अग्निसंयोगादयो येऽन्ये रसहेतवस्तेऽपि काले द्रव्ये वाऽन्तर्भावनीयाः।– Due to the connection of fire (*Agni*) and other factors, changes in taste are also included in the effect of time (*Kāla Prabhāva*).

Dvirasa Saṃyoga - 15 Types [15]

स्वादुरम्लादिभिर्योगं शेषैरम्लादयः पृथक्।
यान्ति पञ्चदशैतानि द्रव्याणि द्विरसानि तु॥15॥

By the combination of 2 - 2 *Rasās* the total number is 15.

1. *Madhura Rasa + Amla Rasa*
2. *Madhura Rasa + Lavaṇa Rasa*
3. *Madhura Rasa + Kaṭu Rasa*
4. *Madhura Rasa + Tikta Rasa*

5. *Madhura Rasa + Kaṣāya Rasa*
6. *Amla Rasa + Lavaṇa Rasa*
7. *Amla Rasa + Kaṭu Rasa*
8. *Amla Rasa + Tikta Rasa*
9. *Amla Rasa + Kaṣāya Rasa*
10. *Lavaṇa Rasa + Kaṭu Rasa*
11. *Lavaṇa Rasa + Tikta Rasa*
12. *Lavaṇa Rasa + Kaṣāya Rasa*
13. *Kaṭu Rasa + Tikta Rasa*
14. *Kaṭu Rasa + Kaṣāya Rasa*
15. *Tikta Rasa + Kaṣāya Rasa*



63 Types of Rasa Saṃyoyga

Cakrapāṇi:

भेदमाह– स्वादुरित्यादि।– In the present verse the author has given the description of the combination of two - two *Rasās* by starting with the word '*Svādu*'.

तत्र स्वादोरम्लादियोगात् पञ्च, शेषैरिति आदित्वेनोपयुक्तादन्यैः; तेनाम्लस्य लवणादियोगाच्चत्वारि, एवं लवणस्य कट्वादियोगात्त्रीणि, कटुकस्य तिक्तकषाययोगाद्द्वे, तिक्तस्य कषाययोगादेकम्, एवं पञ्चदश द्विरसानि।–

- The combination of *Madhura Rasa* with *Amla Rasa* and the remaining tastes forms 5 types.
- The combination of *Amla Rasa* with *Lavaṇa Rasa* and the remaining tastes forms 4 types.
- The combination of *Lavaṇa Rasa* with *Kaṭu Rasa* and the remaining tastes forms 3 types.
- The combination of *Kaṭu Rasa* with *Tikta* and *Kaṣāya Rasa* forms 2 types.
- The combination of *Tikta Rasa* with *Kaṣāya Rasa* is one type.
- In this way a total of (5 + 4 + 3 + 2 +1) 15 types of *Dvirasa Saṃyoga* are formed.

Trirasa Saṃyoga - 20 Types [16]

पृथगम्लादियुक्तस्य योगः शेषैः पृथग्भवेत्।
मधुरस्य तथाऽम्लस्य लवणस्य कटोस्तथा॥16॥
त्रिरसानि यथासंख्यं द्रव्याण्युक्तानि विंशतिः।

By the combination of 3 - 3 *Rasās* the total number is 20.

1. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa*
2. *Madhura Rasa + Amla Rasa + Kaṭu Rasa*
3. *Madhura Rasa + Amla Rasa + Tikta Rasa*
4. *Madhura Rasa + Amla Rasa + Kaṣāya Rasa*
5. *Madhura Rasa + Lavaṇa Rasa + Kaṭu Rasa*
6. *Madhura Rasa + Lavaṇa Rasa + Tikta Rasa*
7. *Madhura Rasa + Lavaṇa Rasa +*

Kaṣāya Rasa

8. *Madhura Rasa + Kaṭu Rasa + Tikta Rasa*
9. *Madhura Rasa + Kaṭu Rasa + Kaṣāya Rasa*
10. *Madhura Rasa + Tikta Rasa + Kaṣāya Rasa*
11. *Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa*
12. *Amla Rasa + Lavaṇa Rasa + Tikta Rasa*
13. *Amla Rasa + Lavaṇa Rasa + Kaṣāya Rasa*
14. *Amla Rasa + Kaṭu Rasa + Tikta Rasa*
15. *Amla Rasa + Kaṭu Rasa + Kaṣāya Rasa*
16. *Amla Rasa + Tikta Rasa + Kaṣāya Rasa*
17. *Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa*
18. *Lavaṇa Rasa + Kaṭu Rasa + Kaṣāya Rasa*
19. *Lavaṇa Rasa + Tikta Rasa + Kaṣāya Rasa*
20. *Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*

Cakrapāṇi:

त्रिरसमाह- पृथगित्यादि।- In the present verse the author has given the description of the combination of three- three *Rasās* by starting with the word '*Pṛthak*'.

मधुरस्याम्लादिरसचतुष्टयेन पृथगित्येकैकशो युक्तस्य शेषैर्लवणादिभिर्योगो भवति; तत्र मधुरस्याम्लयुक्तस्य शेषलवणादियोगाच्चत्वारि,- By the combination of *Madhura Rasa* and *Amla Rasa* with *Lavaṇa* and the remaining 4 tastes separately, it forms 4 types.

तथा मधुरस्य लवणयुक्तस्य कट्वादियोगात्त्रीणि,

- By the combination of *Madhura Rasa* and *Lavaṇa Rasa* with the remaining *Kaṭu* and the other 3 tastes separately; it forms 3 types.

तथा कटुयुक्तस्य तिक्तादियोगाद्द्वे,

- By the combination of *Madhura Rasa* and *Kaṭu Rasa* with the remaining *Tikta* and *Kaṣāya* tastes separately; it forms 2 types.

तथा तिक्तयुक्तस्य कषाययोगादेकम्,

- By the combination of *Madhura Rasa* and *Tikta Rasa* with the remaining *Kaṣāya Rasa*; it forms 1 type.

एवं मधुरेणादिस्थितेन दश।

- Thus 10 types of combinations of *Rasās* with sweet taste are formed.

एवमम्लस्यादिस्थितस्य लवणयुक्तस्य कट्वादियोगात्त्रीणि,

- Similarly by the combination of *Amla Rasa* and *Lavaṇa Rasa* with *Kaṭu* and the remaining 3 tastes separately, it forms 3 types.

तथा कटुकयुक्तस्य शेषाभ्यां योगाद्द्वे,

- And also by the combination of *Amla Rasa* and *Kaṭu Rasa* with the remaining two tastes separately, it forms 2 types.

एवं तिक्तयुक्तस्य कषाययोगादेकम्,

- Thus by the combination of *Amla Rasa* along with *Tikta Rasa* and *Kaṣāya Rasa*, it forms 1 type.

एवमम्लस्य षट्।- Hence 6 types of combinations of *Rasās* with sour taste are formed.

अनेनैव न्यायेन लवणस्य त्रीणि

- Similarly by the combination of *Lavaṇa Rasa* and *Kaṭu Rasa* with the remaining two tastes separately, it forms 2 types.
- By the combination of *Lavaṇa Rasa* along with *Tikta Rasa* and *Kaṣāya Rasa*, it forms 1 type.
- Hence 3 types of combinations of *Rasās* with saline taste are formed.

कटोश्चैकमेव;

- By the combination of *Kaṭu Rasa* along with *Tikta Rasa* and *Kaṣāya Rasa*, it forms only one type.

एवं मिलित्वा त्रिरसानि विंशतिः।

- In this way a total of (10 + 6 + 3 +1) 20 types of *Trirasa Saṃyoga* are formed.

Rasa Catuṣka - 15 Types [17-20]

वक्ष्यन्ते तु चतुष्केण द्रव्याणि दश पञ्च च॥१७॥
स्वाद्वम्लौ सहितौ योगं लवणाद्यैः पृथग्गतौ।
योगं शेषैः पृथग्यातश्चतुष्करससंख्यया॥१८॥
सहितौ स्वादुलवणौ तद्वत् कट्वादिभिः पृथक्।
युक्तौ शेषैः पृथग्योगं यातः स्वादूषणौ तथा॥१९॥
कट्वाद्यैरम्ललवणौ संयुक्तौ सहितौ पृथक्।
यातः शेषैः पृथग्योगं शेषैरम्लकटू तथा॥२०॥
युज्यते तु कषायेण सतिक्तौ लवणोषणौ।

By the combination of four *Rasās* the total number is 15.

1. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa*
2. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Tikta Rasa*
3. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Kaṣāya Rasa*
4. *Madhura Rasa + Amla Rasa + Kaṭu Rasa + Tikta Rasa*
5. *Madhura Rasa + Amla Rasa + Kaṭu Rasa + Kaṣāya Rasa*
6. *Madhura Rasa + Amla Rasa + Tikta Rasa + Kaṣāya Rasa*
7. *Madhura Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa*
8. *Madhura Rasa + Lavaṇa Rasa + Kaṭu Rasa + Kaṣāya Rasa*
9. *Madhura Rasa + Lavaṇa Rasa + Tikta Rasa + Kaṣāya Rasa*
10. *Madhura Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*
11. *Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa*
12. *Amla Rasa + Lavaṇa Rasa + Tikta Rasa + Kaṣāya Rasa*
13. *Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Kaṣāya Rasa*
14. *Amla Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*
15. *Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*

Cakrapāṇi:

चतुरसे स्वाद्वम्लावादिस्थितौ लवणादिभिरेकैकश्येन युक्तौ शेषैः कट्वादिभिर्योगात् षड् भवन्ति।

- By the combination of *Madhura Rasa* and *Amla Rasa* with *Lavaṇa*, *Kaṭu* and the remaining tastes separately, it forms 6 types.

स्वादुलवणौ सहितौ आदिस्थितौ, कट्वादिभिरिति कटुतिक्ताभ्यां पृथग्युक्तौ, शेषैरिति तिक्तकषायाभ्यां, तेनेह बहुवचनं जातौ बोद्धव्यम्; एवं त्रीणि।

- By the combination of *Madhura Rasa* and *Lavaṇa Rasa* with *Kaṭu*, *Tikta* and the remaining taste separately, it forms 3 types.

स्वादूषणौ तथेत्यनेन स्वादुकटुकतिक्तकषायरूपमेकम्।

- '*Svādu-Uṣaṇau*' means: By the combination of *Madhura Rasa*, *Kaṭu Rasa*, *Tikta Rasa* and *Kaṣāya Rasa*, it

forms 1 type.

कट्वाद्यैरित्यादावपि बहुवचनं जातौ। अम्ललवणौ संयुक्तौ कटुना सहितौ शेषाभ्यां योगाद्द्वे, तथाऽम्ललवणौ तिक्तयुक्तौ शेषयोगादेकम्।

- Similarly by the combination of *Amla Rasa* and *Lavaṇa Rasa* with *Kaṭu Rasa* and the remaining two tastes separately, it forms 2 types.
- By the combination of *Amla Rasa* and *Lavaṇa Rasa* with along with *Tikta Rasa* and *Kaṣāya Rasa*, it forms 1 type.
- Hence 3 types of combinations of *Rasās* are formed.

अम्लकटू तथेत्यनेनाम्लकटुतिक्तकषायरूपमेकम्।

- By the combination of *Amla Rasa, Kaṭu Rasa, Tikta Rasa* and *Kaṣāya Rasa*, it forms 1 type.

युज्येते त्वित्यादिना चैकम्।

- By the combination of *Lavaṇa Rasa, Kaṭu Rasa, Tikta Rasa* and *Kaṣāya Rasa*, it forms 1 type.

एवं पञ्चदश चतूरसानि।

- In this way a total of (6 + 3 +1+ 3+1+1) 15 types of *Rasa-Catuṣka Saṃyoga* are formed.

Pañca Rasa Saṃyoga - 6 Types [21]

षट् तु पञ्चरसान्याहुरेकैकस्यापवर्जनात्॥21॥

By the combination of five *Rasās* the total number is 6.

1. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa*
2. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Kaṣāya Rasa*
3. *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Tikta Rasa + Kaṣāya Rasa*
4. *Madhura Rasa + Amla Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*
5. *Madhura Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*
6. *Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*

Cakrapāṇi:

अपवर्जनादिति त्यागात्।– '*Apavarjanāt*' means *Tyāgāt* i.e. by leaving or avoiding.

Eka Rasa Bheda - 6 Types

षट् चैवैकरसानि स्युरेकं षड्रसमेव तु।

Without any combination the *Rasās* are 6 in number.

1. *Madhura Rasa.*
2. *Amla Rasa.*
3. *Lavaṇa Rasa.*
4. *Kaṭu Rasa.*
5. *Tikta Rasa.*
6. *Kaṣāya Rasa.*

By the combination of all the Six *Rasās*-1

- *Madhura Rasa + Amla Rasa + Lavaṇa Rasa + Kaṭu Rasa + Tikta Rasa + Kaṣāya Rasa*

Cakrapāṇi:

अत्र च रसानां गुणत्वेनैकस्मिन् द्रव्ये समवायो योगशब्देनोच्यते।– The term '*Yoga*' is significant because it indicates the combination of *Rasās* as the *Guṇās* in a *Dravya*.

Conclusion of Rasa Saṃyoga [22-23]

इति त्रिषष्टिर्द्रव्याणां निर्दिष्टा रससंख्यया॥22॥
त्रिषष्टिः स्यात्त्वसंख्येयारसानुरसकल्पनात्।
रसास्तरतमाभ्यां तां संख्यामतिपतन्ति हि॥23॥

In this way the total number of *Rasa* combination has been explained as sixty three. This number may become innumerable if the *Anurasa* and their relative degrees such as *Tara* and *Tama* are taken into consideration.

Cakrapāṇi:

रससंसर्गस्य प्रकारान्तरेणासंख्येयतामाह– त्रिषष्टिः स्यादित्यादि।– Here the author has tried to explain the possibility of innumerability of combination of *Rasās* in another way by starting the verse with the word '*Triṣaṣṭi*'.

अनुरसोऽग्रे वक्ष्यमाणः।– The details of *Anurasa* will be discussed later.

अत्र च त्रिषष्ट्यात्मकरसे रसानुरसकल्पना नास्ति, केवले मधुरादौ तदभावात्;– Here the author has not included *Anurasa* among 63 types of combinations of *Rasās*. The *Anurasa* is absent only in *Madhura Rasa*.

तेन यथासंभवं सप्तपञ्चाशत्संयोगविषयं रसानुरसकल्पनं ज्ञेयम्। किंवा, एकरसेऽप्यनुरसोऽस्त्येवाव्यपदेश्यः।– By this the possible 57 combinations of *Rasās*, one has to understand the combinations of *Rasās* as well as *Anurasās*. Or in a single *Rasa* one can find inexpressible *Anurasa*.

प्रकारान्तरेणाप्यसंख्येयतामाह–रसास्तरतमाभ्यामित्यादि। – It has been said in another way that according to the relative degree of *Tara* and *Tama*, the number of combinations of taste becomes innumerable.

मधुरमधुरतरमधुरतमादिभेदादसंख्येयता रसानां भवतीति भावः।– That means it can be understood that the number of combinations of tastes are become uncountable by the inclusion of relative degrees of tastes like *Madhura, Madhura-tara, Madhura-tama* etc.

किंवा,रसानुरसत्वेनैव याऽसंख्येयता तत्रैवायं हेतुः– रसास्तरतमाभ्यामित्यादिः।– Otherwise it can be also understood that the number of combinations of tastes are become innumerable when counts the *Anurasa* present in *Rasās*. The reason for that is nothing but the relative degree of *Tara* and *Tama* in *Rasās*.

More Details in Relation to Rasa [24-26]

संयोगाः सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा।
रसानां तत्र योग्यत्वात् कल्पिता रसचिन्तकैः॥24॥

Even though the number of *Rasa* combinations is innumerable, by keeping the therapeutic utility in view, only 57 combinations and 63 types of *Rasās* are enumerated by the scholars of *Āyurveda*.

Cakrapāṇi:

एवमसंख्येयत्वेऽपि त्रिषष्टिविधैव कल्पना चिकित्साव्यवहारार्थमिहाचार्यैः कल्पितेत्याह– संयोगा इत्यादि।– Despite the number of combinations of *Rasās* being innumerable, only 63 types have been mentioned here according to their therapeutic utility.

तत्र योग्यत्वादिति तत्र स्वस्थातुरहितचिकित्साप्रयोगेऽनतिसंक्षेपविस्तररूपतया हितत्वादित्यर्थः।– Here the author has neither been very detailed nor presented in a nutshell, which are beneficial for healthy and diseased.

क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्।
दोषौषधादीन् संचिन्त्य भिषजा सिद्धिमिच्छता॥25॥
द्रव्याणि द्विरसादीनि संयुक्तांश्च रसान् बुधाः।
रसानेकैकशो वाऽपि कल्पयन्ति गदान् प्रति॥26॥

A physician who is desirous of success in treatment may prescribe drugs having one taste or combination of several tastes after due consideration of *Doṣa* and

Auṣadha. The one knower of *Rasa* should plan according to disease the preparation of the drug of one *Rasa*, two *Rasās* or combination of *Rasās*.

Cakrapāṇi:

तमेव चिकित्साप्रयोगमाह- क्वचिदित्यादि।- By starting the verse with the word '*Kvacit*', the author has presented the usefulness of *Rasās* in the treatment.

अत्रादिग्रहणाद्देशकालबलादीनामनुक्तानां ग्रहणम्।- Here the word '*Ādi*' should be considered as *Deśa* (habitat), *Kāla* (time) and *Bala* (strength of the body as well as the drug) even though it is not directly mentioned.

Dvirasa* - *Mudga
Kaṣāya, Madhura

Trirasa* - *Bhavya* (Elephant apple) *Madhura, Amla, Kaṣāya

Catuḥ Rasa* - *Tila Madhura, Tikta, Kaṣāya, Kaṭu

***Pañca Rasa* - *Harītakī* & *Āmalakī* Except *Lavaṇa* all the five**

Ṣaḍrasa* - *Viṣa* & *Eṇa Māṃsa* All the 6 *Rasās

एतदेव संयुक्तासंयुक्तरसकल्पनं भिन्नरसद्रव्यमेलकाद्वाऽनेकरसैकद्रव्यप्रयोगादेकरसद्रव्य-प्रयोगाद्वा भवतीति दर्शयन्नाह- द्रव्याणीत्यादि।- The use of conjunction or separation of *Rasās* is usually based on the condition of *Doṣās*. That means combining the single tastes of different drugs together or use of single drugs possessing two or more *Rasās* by nature, and this is explained with the following examples.

द्विरसादीनि उत्पत्तिसिद्धद्विरसत्रिरसादीनि; द्विरसं यथा- कषायमधुरो मुद्गः; त्रिरसं यथा- "मधुराम्लकषायं च विष्टम्भि गुरु शीतलम्। पित्तश्लेष्महरं भव्यं" (सू. अ. 27) इत्यादि; चतूरसस्तिलः,यदुक्तं "स्निग्धोष्णमधुरस्तिक्तः कषायः कटुकस्तिलः" (सू. अ. 27); पञ्चरसं त्वामलकं हरीतकी च, "शिवा पञ्चरसा" इत्यादिवचनात्; व्यक्तषड्रसं तु द्रव्यमिहानुक्तं, विषं त्वव्यक्तषड्रससंयुक्तं; हारीते त्वेणमांसं व्यक्तषड्रससंयुक्तमुक्तम्।- '*Dvirasādīni*' means drugs possessing two *Rasās* or three *Rasās* etc.

- *Dvirasa Dravya* i.e. *Mudga* which consists *Kaṣāya* and *Madhura Rasa*.
- *Trirasa Dravya* i.e. *Bhavya* which consists *Madhura*, *Amla*, *Kaṣāya Rasa* and it acts as *Viṣṭambhi* (causes constipation) and possess *Guru* (heaviness) and *Śīta* (coldness). It alleviates *Pitta* and *Kapha*.
- *Chatūḥ Rasa Dravya* i.e. *Tila* which consists *Madhura*, *Tikta*, *Kaṣāya* and *Kaṭu Rasa*. It is *Snigdha* (unctuous) and *Uṣṇa* (hot).
- *Pañcarasa Dravya* i.e. *Āmalakī* and *Harītakī* consist all the *Rasās* except *Lavaṇa Rasa*. It can be also known by the mentioning of '*Śivā Pañcarasā*'.
- Apparently, no drug has been mentioned here which possesses all six tastes.
- Even though *Viṣa* (poison) has all the six tastes, which are imperceptible.
- In *Hārīta Saṃhitā* it is quoted that *Eṇa Māṃsa* possesses all the six tastes.

एवं द्विरसादिद्रव्ययोगाद्द्विरसाद्युपयोगः।- In this way for the use of drug possessing two *Rasās*, *Dvirasa Dravyās* are used.

तथा संयुक्तांश्च रसानिति एकैकरसादिद्रव्यमेलकात् संयुक्तान् रसानेकैकशः कल्पयन्ति प्रयोजयन्ति।- '*Saṃyuktā*' implies that according to the necessity, the drugs containing one *Rasa* or two *Rasās* should be combined and administered.

गदान् प्रतीति प्राधान्येन, तेन स्वस्थवृत्तेऽपि बोद्धव्यं; किंवा, द्विरसादिभेदो गद एव, स्वस्थे तु सर्वरसप्रयोग एव; यदुक्तं- "समसर्वरसं सात्म्यंसमधातोः प्रशस्यते" (सू. अ. 7) इति।-'*Gadān Prati*' should be understood as that the combination of these *Rasās* is not only used for the treatment but also for the prevention of diseases. That means *Dvirasa*, *Trirasa Saṃyoga* is meant for the management of diseases and for the maintenance of positive health the combination of the drugs possessing all the six tastes is to be used.

एवं च व्याख्याने सति 'क्वचिदेको रस' इत्यादिना सममस्य न पौनरुक्त्यम् । किंवा, 'क्वचिदेको रस' इत्यादिना स्वमतमुक्तम्, अत्रैवार्थे 'द्रव्याणि द्विरसादीनि' इत्यादिनाऽऽचार्यान्तरसंमतिं दर्शयति; अत एवान्याचार्यान्तराभिप्रायेण कल्पयन्तीत्युक्तं, तेन न पौनरुक्त्यम्।- The term '*Kvacit Eko Rasaḥ*' quoted in the above verse seems as to be repetitive but it is not true. Because the first one is to be understood as the intake of one type of taste and the second one should be understood as intake of combination of *Rasās*. Hence the use of the word '*Kvacit*' is employed by the author in two different contexts. (Or) the first one can be taken as the version of the author of the present work and the second word should be considered as the opinion of other *Ācāryās*. So the question of repetitive defect doesn't arise.

Importance of Knowledge of Rasa and Doṣa [27]

यः स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित्।
न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु ॥27॥

The physician who is well versed with the variations of *Rasās* and *Doṣās* does not get confused and never commits a mistake in diagnosis and treatment of a disease.

Cakrapāṇi:

रसज्ञानफलमाह- यः स्यादित्यादि।- By starting the verse with the terms '*Yah Syād*', the author has tried to present the end result of the knowledge of *Rasa* and *Doṣa*.

अत्र रसविकल्पज्ञानादेव व्याधिहेतुद्रव्यज्ञानं कृत्स्नमवरुद्धं, रसज्ञानेनैव प्रायः सकलद्रव्यगुणस्य वक्ष्यमाणत्वात्।- Here it can be known that by the variation of *Rasās* one can understand the causative factor of a disease, because through *Rasa* mostly the entire action of the drug can be understood.

दोषविकल्पज्ञानाच्च लिङ्गज्ञानं, यावद्धि लिङ्गं तत् सर्वं दोषविकल्पसंबद्धम्।- In the same way, with the knowledge of variation of *Doṣās*, a person can be understood the clinical features of a disease because they all are directly related to the vitiated *Doṣās*.

रसदोषविकल्पज्ञानात्तु भेषजज्ञानं, यतो रसतः स्वरूपज्ञानं भेषजद्रव्यस्य, दोषतश्च भेषजप्रयोगविषयविज्ञानम्।- With the knowledge of *Rasa Vikalpa* and *Doṣa Vikalpa*, one can be understood the knowledge of therapeutics; because *Rasa Vikalpa* provides the detailed information of the drug and the *Doṣa Vikalpa* provides the knowledge of the applicability of the drug by understanding the causative factor for the manifestation of the disease.

किंवा, रसविकल्पाच्च तथा दोषविकल्पाच्च हेत्वादिज्ञानं पृथगेव वक्तव्यं; रसभेदाद्धि तत्कार्यं लिङ्गमपि ज्ञायते, हेतुभेषजविज्ञानं तु रसभेदविज्ञानादेव वक्तव्यं, यतो रसभेदवद्द्रव्यमेव विकाराणां हेतुर्भेषजं च भवतीति; एवं दोषभेदं ज्ञात्वा च तस्य समानं हेतुं प्रत्येति, दोषविरोधि च द्रव्यं भेषजमिति।- (Or) With the knowledge of *Rasa Vikalpa* and *Doṣa Vikalpa*, to understand the etiology and clinical features of a disease should have been mentioned separately. From *Rasa Vikalpa* itself, their functions and features can be known. The knowledge of the cause of the disease and the therapeutics can be known by means of *Rasa Vikalpa* only; because the drug is the cause for the manifestation as well as treating a disease. Similarly the knowledge

of *Doṣa Vikalpa* helps in understanding the causative factor of a disease being similar to *Doṣās* and also the treatment because it is contrary to it.

तद्युक्तमुक्तं- न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिष्विति।- Thus it is said that whoever is well versed with the knowledge of *Rasa Vikalpa* and *Doṣa Vikalpa* never be gets confused in understanding the etiology, clinical features and therapeutics.

Rasa & Anurasa Lakṣaṇa [28]

व्यक्तः शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते।
विपर्ययेणानुरसो रसो नास्ति हि सप्तमः॥28॥

The taste that which is present in dry or wet substance and is perceived and clearly manifests by the contact of the toungue is known as *Rasa*; and others which are not clearly manifest or which are recognised at the end is designated as *Anurasa* (secondary taste). It is included in one of the six tastes and there is no separate seventh taste.



Cakrapāṇi:

पूर्वोक्तरसानुरसलक्षणमाह- व्यक्त इत्यादि।- By starting the verse with the word '*Vyaktaḥ*', the author has presented the characteristics of *Rasa* and *Anurasa*.

शुष्कस्य चेति चकारादार्द्रस्य च, आदौ चेति चकारादन्ते च; तेनशुष्कस्य वाऽऽर्द्रस्य वा प्रथमजिह्वासंबन्धे वाऽऽस्वादान्ते वा यो व्यक्तत्वेन मधुरोऽयमम्लोऽयमित्यादिना विकल्पेन गृह्यते, स व्यक्तः; यस्तूक्तावस्थाचतुष्टयेऽपि व्यक्तो नोपलभ्यते, किंतर्ह्यव्यपदेश्यतया छायामात्रेण कार्यदर्शनेन वा मीयते, सोऽनुरस इति वाक्यार्थः।- Here in the compound word '*Śuṣkasya Ca*', the term '*Ca*' represents the dry substances as well as wet substances also. 'आदौ च'- The '*Ca kāra*' in this term should be taken at the beginning and in the end. In a nutshell it can be told that the taste which can be clearly perceived in the beginning or at the end by the tongue through the contact of a dry or wet substance is known as *Rasa* such as *Madhura* (sweet), *Amla* (sour) etc. The one which cannot be perceived in the above mentioned 4 states (*Śuṣka, Ārdra, Ādi* and *Anta*), not being reflected, but is appreciated only like shade or is considered by its action is known as *Anurasa*.

यतश्च मधुरादय एव व्यक्तत्वाव्यक्तत्वाभ्यां रसानुरसरूपाः,अतोऽव्यक्तो नाम सप्तमो रसो नास्ति। अयं चार्थः पूर्वं प्रतिषिद्धोऽप्यनुगुणस्पष्टहेतुप्राप्त्या पुनर्निषिध्यते।- Because the tastes such as *Madhura* etc. are in their perceptible and imperceptible states are known as *Rasa* and *Anurasa* respectively. Hence there will be no such seventh taste known as *Avyakta Rasa*. Even after not accepting it before, this concept is being dismissed again by the reassignment of a reasonable explanation.

अन्ये त्वाहुः- शुष्कस्य चेत्यनेन यस्य द्रव्यस्य शुष्कस्य चार्द्रस्य चोपयोगः, तत्र शुष्कावस्थायां योऽव्यक्तः स रस उच्यते; यस्त्वार्द्रावस्थायां व्यक्तः सन् शुष्कावस्थायां नानुयाति , नासौ रसः, किन्त्वनुरसः।- Other scholars opined that the substances which can be used in both dry and wet stages are understood as that the taste which is perceived in the dry stage is known as *Rasa* and the taste perceived

in the wet stage is known as *Anurasa*.

यथा- पिप्पल्या आर्द्राया मधुरो रसो व्यक्तः, शुष्कायास्तु पिप्पल्याः कटुकः; तेन कटुक एव रसः पिप्पल्याः, मधुरस्त्वनुरसः; यस्तु द्राक्षादीनामार्द्रावस्थायां शुष्कावस्थायां च मधुर एव, तत्र विप्रतिपत्तिरपि नास्ति, तेन तत्र मधुर एव रसः; नित्यार्द्रप्रयोज्यानां तु काञ्जिकतक्रादीनामादौ व्यक्तो य उपलभ्यते रसः, अनु चोपलभ्यते यः सोऽनुरसो युक्तस्तिक्तत्वादिः;

For example:

- *Pippalī* is possessing *Madhura Rasa* during its wet stage and *Kaṭu Rasa* in its dry state. Thus *Kaṭu Rasa* can be considered as *Rasa* and *Madhura Rasa* as *Anurasa*.
- *Drākṣā* and other substances possessing *Madhura Rasa* only in both wet and dry states; and hence there is no contradiction about the taste of *Drākṣā* etc. The *Rasa* is *Madhura* only.
- *Kāñji* and *Takra* are the substances that should always be used in the wet form. In those substances whatever taste is being perceived initially is known as *Rasa* i.e. *Amla Rasa* and taste perceived afterwards is known as *Anurasa* i.e. *Tikta Rasa*.

तथा, आर्द्रावस्थायां शुष्कावस्थाविपरीतो यः पिप्पल्या इव मधुरः, सोऽनुरस इति। किन्त्वार्द्राऽपि पिप्पली मधुररसैवेति पश्यामः, यतो वक्ष्यति- "श्लेष्मला मधुरा चार्द्रा गुर्वी स्निग्धा च पिप्पली" (सू. अ. 27) इति; मधुरस्य तत्रानुरसत्वे गुरुत्वश्लेष्मकर्तृत्वान्यनुपपन्नानि; तेन, आर्द्रा पिप्पली व्यक्तमधुररसैव, शुष्का तुमधुरानुरसेति युक्तम्॥ -

- As mentioned earlier in contrast to the dry state of *Pippalī* is sweet in taste, when it is in wet condition. It is said that the fresh *Pippalī* aggravates *Kapha*, *Madhura* in taste, *Guru* (heaviness) and *Snigdha* (unctuous) – *Sūtrasthāna* 27/297. If *Madhura Rasa* is being accepted as *Anurasa* of *Pippalī*, the properties of *Śleṣmalā*, *Guru* and *Snigdha* cannot be explained. Thus it can be understood that *Pippalī* is possessing *Madhura Rasa* as the main taste when it is in the wet state and *Anurasa* when it is in the dry state.

Parādi Guṇa [29-30]

परापरत्वे युक्तिश्च संख्या संयोग एव च।
विभागश्च पृथक्त्वं च परिमाणमथापि च॥29॥
संस्कारोऽभ्यास इत्येते गुणा ज्ञेयाः परादयः।
सिद्ध्युपायाश्चिकित्साया
लक्षणैस्तान् प्रचक्ष्महे॥30॥

The following ten are called *Parādi Guṇa*. Since these are useful in achieving success in treatment, the characteristics of these ten will also be described.

1. *Para* (superiority).
2. *Apara* (inferiority).
3. *Yukti* (proper application).
4. *Saṅkhyā* (number for enumeration).
5. *Saṃyoga* (conjunction or combination of two or more drugs).
6. *Vibhāga* (disjunction or division).
7. *Pṛthaktva* (separation).
8. *Parimāṇa* (measurement).
9. *Saṃskāra* (processing or transformation).
10. *Abhyāsa* (regular practice).

Cakrapāṇi:

संप्रति पूर्वोक्तगुर्वादिगुणातिरिक्तान् परत्वापरत्वादीन् दशगुणान् रसधर्मत्वेनोपदेष्टव्यानाह- परेत्यादि।- Apart from the *Gurvādi Guṇās* which were explained earlier, the author is now going to explain 10 more attributes such as *Para*, *Apara* etc. based on the *Rasa* by starting the verse with the word

'Para'.

तच्च परत्वं प्रधानत्वम्, अपरत्वम् अप्रधानत्वम्।- 'Paratva' means superiority and 'Aparatva' means inferiority.



Para, Apara & Yukti Lakṣaṇa [31]

देशकालवयोमानपाकवीर्यरसादिषु ।

परापरत्वे, युक्तिश्च योजना या तु युज्यते॥31॥

- *Paratva* (superiority / par excellence) and *Aparatva* (inferiority / non-excellence) are in relation to *Deśa* (habitat), *Kāla* (season / time), *Vaya* (age), *Māna* (measure), *Vipāka* (transformation of the taste of the drug after digestion), *Vīrya* (potency), *Rasa* (taste) etc.
- *Yukti* is the rational and appropriate planning for theraputic application.

Cakrapāṇi:

तद्विवरणं- देशकालेत्यादि।- *Para* and *Apara* are related to *Deśa* (habitat), *Kāla* (time), *Vaya* (age) etc.

तत्र देशो मरुः परः, अनूपोऽपरः; कालो विसर्गः परः, आदानमपरः; वयस्तरुणं परम्, अपरमितरत्; मानं च शरीरस्य यथा वक्ष्यमाणं शारीरे परं, ततोऽन्यदपरं; पाकवीर्यरसास्तु ये यस्य योगिनस्ते तं प्रति पराः, अयौगिकास्त्वपराः।

S. No.	Various Parameters	Paratva (superiority / par excellence)	Aparatva (inferiority / non-excellence)
1.	*Deśa* (habitat)	*Maru Deśa* (arid land)	*Ānūpa Deśa* (marshy land)
2.	*Kāla* (time / season)	*Visarga Kāla* (nourishing period)	*Ādāna Kāla* (debilitating period)
3.	*Vaya* (age)	*Taruṇa Vaya* (young age)	*Apara* (childhood and old age)
4.	*Māna* (measurement)	Proper measurements of body parts mentioned in *Śārīrasthāna* (7/15)	Improper or disproportionate measurements of body parts.
5.	*Vipāka* (taste after digestion)	*Yogya* (suitable to the person) *Madhura Vipāka*	*Ayaugika* (unsuitable to the person) – *Amla, Kaṭu Vipāka*
6.	*Vīrya* (potency)	*Yogya* (suitable to the person) *Śīta Vīrya*	*Ayaugika* (unsuitable to the person) – *Uṣṇa Vīrya*
7.	*Rasa* (taste)	*Yogya* (suitable to the person) *Madhura Rasa*	*Ayaugika* (unsuitable to the person) – *Kaṭu Rasa*

आदिग्रहणात् प्रकृतिबलादीनां ग्रहणम्।- The word '*Ādi*' refers to be considered *Prakṛti* (body constitution), *Bala* (body strength) etc. also.

किंवा, परत्वापरत्वे वैशेषिकोक्ते ज्ञेये; तत्र देशापेक्षया सन्निकृष्टदेशसंबन्धिनमपेक्ष्य विदूरदेशसंबन्धिनि परत्वं, सन्निकृष्टदेशसंबन्धिनि चापरत्वं भवति; एवं सन्निकृष्टविप्रकृष्टकालापेक्षया च स्थविरे परत्वं, यूनि चापरत्वं भवति। वयःप्रभृतिषु परत्वापरत्वं यथासंभवं कालदेशकृतमेवेहोपयोगादुपचरितमप्यभिहितं, यतो न गुणे मानादौ गुणान्तरसंभवः।- If the terms of *Para* and *Apara* are taken according to *Vaiśeṣika* system of philosophy, regarding *Deśa Paratva* it is known that comparatively far off would be regarded as *Para* and the nearer would be *Apara*. Based on the same analogy of relative distance and proximity, the distance of old age should be *Para* and young age should be *Apara*. In fact *Vaya* etc. are included in *Kāla* and *Deśa*, because age is measurement of time, while *Māna* being an attribute and cannot have another attribute.

युक्तिश्चेत्यादौ योजना दोषाद्यपेक्षया भेषजस्य समीचीनकल्पना, अत एवोक्तं- या तु युज्यते; या कल्पना यौगिकी भवति सा तुयुक्तिरुच्यते, अयौगिकी तु कल्पनाऽपि सती युक्तिर्नोच्यते पुत्रोऽप्यपुत्रवत्। युक्तिश्चेयं संयोगपरिमाणसंस्काराद्यन्तर्गताऽप्यत्युपयुक्तत्वात् पृथगुच्यते।- The '*Yukti*' is that which implies the selection of appropriate therapy based on the nature of *Doṣās* vitiated. In other words *Yukti* is that which is rationally or appropriately planned and which should be useful. However in spite of being rationally or appropriately planned, but if useless, it cannot be considered as *Yukti*; similar to the imaginary son who is not born is no son at all. Although this rational appropriate scheme is included in the form of *Saṃyoga*, *Parimāṇa*, *Saṃskāra*, it is most important to mention it separately.

Saṅkhyā & Saṃyoga Lakṣaṇa [32]

संख्या स्याद्गणितं, योगः सह संयोग उच्यते।
द्रव्याणां द्वन्द्वसर्वैककर्मजोऽनित्य एव च॥32॥

- *Saṅkhyā* means number or calculation in the form of one, two, three etc.
- *Saṃyoga* (conjunction) is the special cause of conventional expressions of contact between two objects. The combination of two things, many things and one thing with another is called *Saṃyoga* and which is non-eternal.

3 Types of Saṃyoga

Cakrapāṇi:

संख्यां लक्षयति- संख्येत्यादि।- By starting the verse with '*Saṅkhyā*' the author has presented

the characteristics of Saṅkhyā, Saṃyoga etc.

गणितमिहैकद्वित्र्यादि।- Here the term 'Gaṇita' refers to the count of the numbers one, two, three etc.

संयोगमाह- योग इत्यादि।- By the term 'Yoga' it denotes the characteristics of Saṃyoga.

सहेति मिलितानां द्रव्याणां योगः प्राप्तिरित्यर्थः,सहेत्यनेनेहाकिंचित्करं परस्परसंयोगं निराकरोति।- 'Saṃyoga' means the special cause of conventional expressions of combination between two entities. Here the term 'Saha' signifies the rejection of the union of two objects.

तद्भेदमाह- द्वन्द्वेत्यादि। तत्र द्वन्द्वकर्मजो यथा- युध्यमानयोर्मेषयोः, सर्वकर्मजो यथा- भाण्डे प्रक्षिप्यमाणानां माषाणां बहुलमाषक्रियायोगजः, एककर्मजो यथा- वृक्षवायसयोः। अनित्य इति संयोगस्य कर्मजत्वेनानित्यत्वं दर्शयति।- 'Saṃyoga' is of 3 types.

- *Dvandva-karmaja*: If the activity is found both in the conjunct objects, it is known as *Dvandva-karmaja Saṃyoga*. For example: Fighting between 2 sheep.
- *Sarva-karmaja*: Combining many a number of things is known as *Sarva-karmaja Saṃyoga*. For example: Addition of one grain of *Māṣa* (blackgram) in a vessel containing many such grains.
- *Eka-karmaja*: Combination of one movable thing with the stable object is known as *Eka-karmaja Saṃyoga*. For example: Sitting of a crow on a tree.

Vibhāga & Pṛthaktva Lakṣaṇa [33]

विभागस्तु विभक्तिः स्याद्वियोगो भागशो ग्रहः।
पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता॥33॥

- *Vibhāga* (disjunction) is the attribute which destroys the conjunction. The division of particles or division of combined objects is called as *Vibhāga*. *Absence* of combining factor is also called as *Vibhāga*.
- *Pṛthaktva* is the special cause of conventional expressions such this is distinct from that. Separation or seggregation of the things basing on their distinct qualities is called *Pṛthaktva*.

3 Types of Pṛthaktva

Cakrapāṇi:

विभागमाह- विभागस्त्वित्यादि।- By starting the verse with '*Vibhāgastu*' the author has presented the characteristics of *Vibhāga*.

विभक्तिः विभजनम्। विभक्तिमेव विवृणोति- वियोग इति; संयोगस्य विगमो वियोगः।- '*Vibhāga*' means *Vibhakti* i.e. separation, partition or division. Division of cohesion is called *Vibhāga*.

तत् किं संयोगाभाव एव वियोगइत्याह- भागशो ग्रह इति। विभागशो विभक्तत्वेन ग्रहणं यतो भवतीति भावः; तेन विभक्तिरित्येषा भावरूपा प्रतीतिः, न संयोगाभावमात्रं भवति, किंतर्हि भावरूपविभागगुणयुक्ता इत्यर्थः।- '*Vibhāga*' is opposite to *Saṃyoga*. On the other hand, it is not merely absence or negation of *Saṃyoga*, as in a subtype that is given as part of partial distribution, in which the part or portion is accepted. This indicates that the *Vibhāga* is a positive unit.

पृथक्त्वं तु 'इदं द्रव्यं पटलक्षणं,घटात् पृथग्' इत्यादिका बुद्धिर्यतो भवति, तत् पृथक्त्वं भवति।- Separation or segregation of things based on their distinct qualities is known as *Pṛthaktva*. Earthenware can be differentiated a cloth on the basis of their special features. Thus the knowledge of segregation of *Ghaṭa* and *Paṭa* on the basis of their distinct qualities is known as *Pṛthaktva*.

तच्चाचार्यस्त्रैविध्येनाह- पृथक्त्वमित्यादि।- The author has presented 3 types of *Pṛthaktva* in the present verse by starting with the term '*Pṛthaktvaṃ*'.

1. *Asaṃyoga*
2. *Vailakṣaṇya*
3. *Anekatā*

तत्र यत् सर्वथाऽसंयुज्यमानयोरिव मेरुहिमाचलयोः पृथक्त्वम्, एतदसंयोग इत्यनेनोक्तम्।

- *Asaṃyoga*: Nonunion of any two things forever is known as *Asaṃyoga Pṛthaktva*.

For example: Unable to unify *Meru Parvarta* and the Himalayan Mountains, which are located in faraway places.

तथा संयुज्यमानानामपि पृथक्त्वं विजातीयानां महिषवराहादीनां, तदाह- वैलक्षण्यमित्यादि। विशिष्टलक्षणयुक्तत्वलक्षितं विजातीयानां पृथक्त्वमित्यर्थः।

- *Vailakṣaṇya*: Despite the possibility of integration, they are unable to unite forever due to their specific characteristics. It is known as *Vailakṣaṇya Pṛthaktva*.

For example: The characteristics of *Mahiṣa* (buffalo) and *Varāha* (boar) are entirely different from each other. Thus they cannot unite together forever.

तथैकजातीयानामप्यविलक्षणानां माषाणां पृथक्त्वं भवतीत्याह- अनेकतेति।

एकजातीयेषु हि संयुक्तेषु न वैलक्षण्यं नाप्यसंयोगः, अथ चानेकता पृथक्त्वरूपा भवतीति भावः।

- *Anekatā*: Separation of even similar type of substances from each other due to its variety is known as *Anekata Pṛthaktva*.

For example: Separation of one variety of *Māṣa* from its other variety.

किंवा, पृथक्त्वं गुणान्तरमिच्छन् लोकव्यवहारार्थमसंयोगवैलक्षण्यानेकतारूपमेव यथोदाहृतं पृथक्त्वं दर्शयति।- (Or) *Pṛthaktva* is differentiated into 3 types viz. *Asaṃyoga*, *Vailakṣaṇya* and *Anekatā* and explained with examples for proper understanding.

Parimāṇa, Saṃskāra and Abhyāsa Lakṣaṇa

परिमाणं पुनर्मानं, संस्कारः करणं मतम्।
भावाभ्यसनमभ्यासः शीलनं सततक्रिया॥34॥

- *Parimāṇa* is the measure or measurement of the length, body parts, various liquids, solids etc.
- *Saṃskāra* is the method of transformation of natural properties of the substances through various processing techniques.
- *Abhyāsa* is the repetition of the same thing again and again. It is also known

as Śīlana (habituation) and *Satata-Kriyā* (constant practice).

Cakrapāṇ

मानं प्रस्थाढकादितुलादिमेयम्।– *Māna* is the measurement such as *Prastha, Āḍhaka, Tulā* etc.

करणं गुणान्तराधायकत्वं संस्करणमित्यर्थः; यद्वक्ष्यति– "संस्कारो हिगुणान्तराधानमुच्यते" (वि. अ. 1) इति।– *Saṃskāra* is the method of transformation of original properties by means of various processing techniques; as is quoted vide 1/22 of *Vimānasthāna*.

भावस्य षष्टिकादेर्व्यायामादेश्चाभ्यसनमभ्यासः। अभ्यसनमेवलोकप्रसिद्धाभ्यां पर्यायाभ्यां विवृणोति–शीलनं सततक्रियेति; यं लोकाः शीलनसततक्रियाभ्यामभिदधति सोऽभ्यासइति भावः।– Regular consumption of the same substance or performing the same action again and again is known as *Abhyāsa*. *Śīlana* and *Satata Kriyā* are the synonyms of *Abhyāsa*.

For example:

- Habitual intake of *Ṣaṣṭika* type of rice
- Doing physical exercises on regular basis

अयं च संयोगसंस्कारविशेषरूपोऽपि विशेषेण चिकित्सोपयुक्तत्वात् पृथगुच्यते।– Though *Abhyāsa* comes under *Saṃyoga* and *Saṃskāra*, even then it is being important in therapeutics and hence it is described separately.

Conclusion Regarding Guṇa [35]

इति स्वलक्षणैरुक्ता गुणाः सर्वे परादयः।
चिकित्सा यैरविदितैर्न यथावत् प्रवर्तते॥35॥

In this way, all the *Parādi Guṇās* are explained. Those doctors who are unaware of these qualities, they can not move forward for proper treatment and are not going to get fruitful results.

Cakrapāṇi:

न यथावत् प्रवर्तत इति वचनेन शब्दादिषु च गुर्वादिषु च परादीनामप्राधान्यं सूचयति।– *'Na Yathāvat Pravartate'* refers to that those who are not well versed about *Parādi Guṇās* are not going to be successful in their endeavors while treating a patient. It is also stated that these *Parādi Guṇās* are inferior to *Śabdādi Guṇa* as well as *Gurvādi Guṇa*.

Guṇa is Not Resided in Rasa [36]

गुणा गुणाश्रया नोक्तास्तस्माद्रसगुणान् भिषक्।
विद्याद्द्रव्यगुणान् कर्तुरभिप्रायाः पृथग्विधाः ॥36॥

Guṇa cannot exist in another *Guṇa*. Hence a physician should consider the *Guṇās* of *Rasa* as *Dravya Guṇa* i.e. the attributes of a substance which has that particular taste. The ideas underlying the instructions of the author vary according to the context.

Cakrapāṇi:

संप्रति रसानां परस्परसंयोगो गुण उक्तः, तथाऽग्रे च स्निग्धत्वादिर्गुणो वाच्यः, स च गुणरूपरसे न संभवतीति यथा रसानां गुणनिर्देशो बोद्धव्यस्तदाह– गुणा इत्यादि।– Now the attributes of the combination of *Rasās* have described. Further the attributes like *Snigdha* etc. will be going to be explained. Because these attributes cannot be found in *Rasa*. How the knowledge of the attributes of *Rasās* can be known is clearly explained by the author by starting the verse with the word '*Guṇa*'.

गुणा गुणाश्रया नोक्ता इति दीर्घञ्जीवितीये "समवायी तु निश्चेष्टः कारणं गुणः" (सू. अ. 1) इत्यनेन।– It is clearly mentioned in the 1st chapter of *Sūtrasthāna* entitled *Dīrghañjīvitīya Adhyāya* that *Guṇās* cannot exist in another *Guṇa*. *Guṇa* is that which exists with intimate relation with *Dravya* and is devoid of action.

रसगुणानिति रसे स्निग्धादीन् गुणान्निर्दिष्टान् तद्रसाधारद्रव्यगुणानेव विद्यात्।– By the words '*Rasa Guṇān*', it can be understood that whatever the attributes of *Rasa* like *Snigdha, Rūkṣa* etc. are mentioned should be considered as the attributes of the substance which possess those tastes.

ननु, यदि द्रव्यगुणा एव ते, तत् किमिति रसगुणत्वेनोच्यन्त इत्याह– कर्तुरित्यादि; कर्तुरिति तन्त्रकर्तुः। अभिप्राया इति तत्र तत्रोपचारेण तथा सामान्यशब्दादिप्रयोगेण तन्त्रकरणबुद्धयः; सामान्यशब्दोपचारादिप्रयोगश्च प्रकरणादिवशादेव स्फुटत्वात् तथा प्रयोजनवशाच्च क्रियते। तच्च प्रकरणादि "अतश्च प्रकृतं बुद्ध्वा' इत्यादौदर्शयिष्यामः।– Now the question arises that "If *Rasa* is considered as the *Guṇa* of *Dravya*; what is the necessity of mentioning *Snigdha, Rūkṣa* etc. as *Rasa Guṇa*?" The answer is given by the author as '*Karturabhiprāya*'. That means the purpose or intention of the author is to explain the subject in the text with the usage of common words. Thus the usage of common words should be understood according to the reference to the context.

इह च द्रव्यगुणानां रसेषु यदुपचरणं तस्यायमभिप्रायो– यत्– मधुरादिनिर्देशेनैव स्निग्धशीतादिगुणा अपि प्रायो मधुराद्यव्यभिचारिणो द्रव्ये निर्दिष्टा भवन्तीति न मधुरत्वं निर्दिश्य स्निग्धत्वादिप्रतिपादनं पुनः पृथक् क्रियत इति।– In the present context the description of *Guṇās* of the *Dravya* in the *Rasās* is given as *Snigdha, Śīta* etc. are the properties accompanied with *Madhura Rasa*; and through this intrinsic association of *Snigdha, Śīta* etc. along with *Madhura Rasa* gets associated with drugs. In order to show this intrinsic relationship of the attributes like *Snigdha, Śīta* with *Madhura Rasa*, yet to be more clear the author has described *Madhura* and other *Rasās* initially and mentioned *Snigdha* and other attributes separately.

Taking the Appropriate Meaning According to the Context [37]

अतश्च प्रकृतं बुद्ध्वा देशकालान्तराणि च।
तन्त्रकर्तुरभिप्रायानुपायांश्चार्थमादिशेत् ॥37॥

In the event of conflicting views of the text one should interpret the subject matter on the basis of context (*Prakṛta*), place (*Deśa*), time (*Kāla*), intention of the author (*Tantrakartru Abhiprāya*) and *Tantrayukti* (*Upāya*).

Cakrapāṇi:

अभिप्रायपृथक्त्वे सति यथा ग्रन्थो बोद्धव्यस्तदाह– अतश्चेत्यादि।– In case of difference of opinion how one has to interpret the subject matter has been explained in the present verse by starting with the word '*Ataśca*'.

तत्र प्रकृतं बुद्ध्वा, यथा– "क्षाराः क्षीरं फलं पुष्पम्" इत्यत्रोद्भिदगणस्य प्रकृतत्वात् क्षीरमिति स्नुह्यादिक्षीरमेव क्षीरशब्देन वदेत्।– '*Prakṛtaṃ Buddhvā*' means after knowing any subject or context, the exact meaning must be understood. For example: "क्षाराः क्षीरं फलंपुष्पम". In the present verse, as all are related to herbal drugs, and hence the term 'क्षीरं' should be understood as the milky latex of *Snuhi, Arka* etc. but not the milk of animals.

देशान्तरं बुद्ध्वेति यथा–शिरसि शोधनेऽभिधीयमाने "क्रिमिव्याधौ (सू. अ. 2)" इति, तच्छिरोगतक्रिमिव्याधावेव भवति।– '*Deśāntaraṃ Buddhvā*' means after knowing the variation of the place. For example: The term "क्रिमिव्याधौ" should be understood as *Śirogata Krimi* in the present context of *Śiraḥ Śodhana– Sūtrasthāna* 2/ 6.

कालान्तरे यथा– वमनकालेऽभिहितं "प्रतिग्रहांश्चोपहारयेत्" (सू. अ. 15) इति, तत्र प्रतिग्रहशब्देन पात्रमुच्यते, न तु ग्रहणं प्रतिग्रहः।– Example for *Kālāntara*: During the process of

Vamana Karma, the term '*Pratigraha*' should be understood as the spittoon but not the body.

तन्त्रकर्तुरभिप्रायानिति यथोक्तं रसेषु गुणारोपणे तद्बोद्धव्यम्।- Example for *Tantrakarta Abhiprāya* (authors intention): Description of the *Guṇās* of *Dravya* through the *Rasās* mentioned earlier vide verse no 36.

उपायानिति शास्त्रोपायान् तन्त्रयुक्तिरूपान्।- '*Upāya*' means *Tantrayukti*.

अर्थम् अभिधेयम्।- The person has to get exact meaning from the above mentioned aspects.

यद्यपि प्रकृतादयोऽपि तन्त्रकर्तुरभिप्राया एव, तथाऽपि यत्र प्रकृतत्वादि न स्फुटं प्रतीयते तत्र तन्त्रकर्तुरभिप्रायत्वेन बोद्धव्यम्।- If the subject matter may not be clearly understood by the above aspects, the author's exact version or purpose should be known.

Origin of Ṣaḍrasa [38]

षड्विभक्तीः प्रवक्ष्यामि रसानामत उत्तरम्।
षट् पञ्चभूतप्रभवाः संख्याताश्च यथा रसाः॥३८॥

Now it is going to be explained about the six types of *Rasās* and also how these 6 tastes are originated from *Pañcamahābhūtās*.

Cakrapāṇi:

षड्विभक्तीरिति मधुरादिषड्विभागानित्यर्थः।- '*Ṣaḍ-Vibhakti*' means the division of six tastes such as *Madhura*, *Amla* etc.

षट् पञ्चभूतप्रभवा इति पञ्चभूतप्रभवाः सन्तो यथोक्तेन प्रकारेण 'सोमगुणातिरेकात्' इत्यादिना यथा षट् संख्याताः षट्संख्यापरिच्छिन्ना भवन्ति, तथा वक्ष्यामीति योजना।- *Madhura* etc. the six types of tastes will be originated from *Pañcamahābhūtās* as per their relative predominance, such as from the predominance of '*Soma-guṇa*' etc. This statement highlights the fact that *Rasās* are only six.



Origin of *Ṣaḍrasa*

Role of Water in Manifestation of Rasās [39]

सौम्याः खल्वापोऽन्तरिक्षप्रभवाः प्रकृतिशीता लघ्व्यश्चाव्यक्तरसाश्च, तास्त्वन्तरिक्षाद्भ्रश्यमाना भ्रष्टाश्च पञ्चमहाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्तीरभिप्रीणयन्ति, तासु मूर्तिषु षडभिमूर्च्छन्ति रसाः॥३९॥

Moon is the governing deity of water. The atmospheric water (*Āntarikṣa jala*) is cold, light and possessing unmanifested state of *Rasa* (*Avyakta Rasa*). The moment it starts falling from sky, it gets filled with the properties of *Pañcamahābhūta* and when falls on the ground it nourishes vegetation and animal kingdom. At this juncture the six tastes manifest themselves in these individuals.

Cakrapāṇi:

संप्रति रसानामादिकारणमेव तावदाह- सौम्या इत्यादि।- Now the author is going to be explained the primary cause for the origin of *Rasās* by starting the verse with the word '*Saumyāḥ*'.

Role of water in manifestation of *Rasa*

सौम्याः सोमदेवताकाः।- '*Saumyāḥ*' means that which possesses the attributes of deity of *Soma* (the moon).

भ्रश्यमाना इति वदता भूमिसंबन्धव्यतिरेकेणान्तरीक्षेरितैः पृथिव्यादिपरमाण्वादिभिः संबन्धो रसारम्भको भवतीति दर्श्यते।- The rain water while falling down from the sky before touching the earth, it comes in contact with the atoms of *Pṛthvī* and the other *Pañcamahābhūtās* and begins the manifestation of *Rasās*.

मूर्तीरिति व्यक्तीः।- '*Mūrti*' means the body of an individual.

अभिप्रीणयन्तीति तर्पयन्ति, किंवा जनयन्ति।- '*Abhiprīṇayanti*' means to satiate or to generate.

अभिमूर्च्छन्ति रसा इति व्यक्तिं यान्ति।- '*Abhimūrcchanti Rasa*' means expression of tastes.

अत्र चान्तरीक्षमुदकं रसकारणत्वे प्रधानत्वादुक्तं, तेन क्षितिस्थमपि स्थावरजङ्गमोत्पत्तौ रसकारणं भवत्येव।- Hence the main source of *Rasa* is atmospheric water (*Āntarikṣa jala*). In this way, atmospheric water not only nourishes but also creates flora and fauna.

Relationship of Rasa and Mahābhūta [40]

तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो रसः, पृथिव्यग्निभूयिष्ठत्वादम्लः, सलिलाग्निभूयिष्ठत्वाल्लवणः, वाय्वग्निभूयिष्ठत्वात् कटुकः, वाय्वाकाशातिरिक्तत्वात्तिक्तः, पवनपृथिवीव्यतिरेकात् कषाय इति। एवमेषां रसानां षट्त्वमुपपन्नं न्यूनातिरेकविशेषान्महाभूतानां भूतानामिव स्थावरजङ्गमानां नानावर्णाकृतिविशेषाः; षड्तुकत्वाच्च कालस्योपपन्नो महाभूतानां न्यूनातिरेकविशेषः॥४०॥

All these six tastes will be manifested by the predominance of one or other *Mahābhūtās* as mentioned under in the tabular form:

S. No.	Name of the Rasa	Prdominance of Mahābhūta
1.	*Madhura Rasa*	*Soma* i.e. *Jala*
2.	*Amla Rasa*	*Pṛthvī + Agni*
3.	*Lavaṇa Rasa*	*Jala + Agni*
4.	*Kaṭu Rasa*	*Vāyu + Agni*
5.	*Tikta Rasa*	*Vāyu + Ākāśa*
6.	*Kaṣāya Rasa*	*Vāyu + Pṛthvī*

Thus all the 6 *Rasās* manifests due to the predominance or minority of *Pañcamahābhūtās*, similar to the formation of various colors and shapes of plants and animals. This type of predominance or minority of *Pañcamahābhūtās* depends on the variations of six seasons.

Cakrapāṇi:

सोमगुणातिरेकादिति अतिरेकशब्देन सर्वेष्वेव रसेषु सर्वभूतसान्निध्यमस्ति, क्वचित्तु कस्यचिद्भूतगुणस्यातिरेकाद्रसविशेषो भवतीति दर्शयति;- '*Somaguṇātirekāt*' - Here the word *Atireka* means all the *Pañcamahābhūtās* exists in all the *Rasās*. Thus it can be understood as that the *Rasās* are formed due to the dominancy of any one of the *Mahābhūtās*.

एतच्च मधुरं प्रति अबुगुणातिरिक्तत्वं विशेषोत्पत्तौ कारणत्वेन ज्ञेयं; यच्चाधारकारणत्वमपां, तत् सर्वसाधारणम्।- Although *Ap Mahābhūta* is the common cause for the expression of all the tastes, yet due to the predominance of *Ap Mahābhūta*, the sweet taste (*Madhura Rasa*) is formed, because *Jala* is the base for *Madhura Rasa*.

एवं लवणेऽप्यपां कारणत्वं ज्ञेयम्। लवणस्तु सुश्रुतेपृथिव्यग्न्यतिरेकात् पङ्क्तिः, अस्मिंश्च विरोधे कार्यविरोधो नास्त्येव।- *Ap Mahābhūta* is also said to be predominant along with *Agni Mahābhūta* for the formation of *Lavaṇa Rasa*. While *Ācārya Suśruta* opined that *Lavaṇa Rasa* is formed due to the dominancy of *Pṛthvī* and *Agni Mahābhūtās*. Even though the idea of both the authors is different in formation of *Lavaṇa Rasa* but there is no difference in action.

ननु, उष्णशीताभ्यामग्निसलिलाभ्यां कृतस्य लवणस्याप्युष्णशीतत्वेन भवितव्यं, तल्लवणं कथमुष्णं भवति?- In fact *Lavaṇa Rasa* is formed by the dominancy of *Agni* and *Jala Mahābhūtās;* in such circumstances it should be having both *Uṣṇa* and *Śīta Guṇās*. But why it is having *Uṣṇa Guṇa* only?

नैवं, यतो भूतानामयं स्वभाव:- यत्- केनचित् प्रकारेण सन्निविष्टाः कश्चिद्गुणमारभन्ते, न सर्वम्।- The above doubt is clarified as mentioned under.

Whenever any of the two *Mahābhūtās* are combined together it manifests some of the *Guṇās* only but not the all because it is the nature of *Mahābhūtās*.

यथा- मकुष्ठकेऽद्भिर्मधुरो रस: क्रियते, न स्नेह:; तथा सैन्धवे वह्निनाऽपि नोष्णत्वमारभ्यते।- For example: In case of *Makuṣṭhaka, Jala Mahābhūta* manifests *Madhura Rasa* only but not *Snigdha Guṇa*. Similarly the attribute of *Uṣṇa* is not exhibited in case of *Saindhavalavaṇa* even though it is formed due to the dominancy of *Agni Mahābhūta*.

अयं च भूतानां सन्निवेशोऽदृष्टप्रभावकृत एव, स च सन्निवेशः कार्यदर्शनेनोन्नेयः। तेन यत्र कार्यं दृश्यते तत्र कल्प्यते, यथा- लवणे उष्णत्वादग्निर्विष्यन्दित्वाच्च जलमनुमीयते।- The combination of *Mahābhūtās* is invisible and unknown and can be assumed by its specific effect. For example: Due to *Uṣṇatā* (hotness) and *Viṣyandatā* (moisture) one can infer the presence of *Agni* and *Jala Mahābhūtās* respectively in *Lavaṇa Rasa*.

आगमवेदनीयश्चायमर्थो नात्रास्मद्विधानां कल्पना: प्रसरन्ति।- This kind of effect can only be understood by the scriptures, but not by the common man.

एतेन यदुच्यते- तोयवत् पृथिव्यादयोऽपि किमिति पृथग्रसान्तरं न कुर्वन्ति, तथा तोयवातादिसंयोगादिभ्य: किमिति रसान्तराणि नोत्पद्यन्त इति, तदपि भूतस्वभावापर्यनुयोगादेव प्रत्युक्तम्।- It also says that but for *Jala* the other *Mahābhūtās* such as *Pṛthvī* etc. and also *Jala* with *Vāyu* cannot manifest any *Rasa*.

इह च कारणत्वं भूतानां रसस्य मधुरत्वादिविशेष एव निमित्तकारणरूपमुच्यते, तेन नीरसानामपि हि दहनादीनां कारणत्वमुपपन्नमेव व्युत्पादितम्।- It clearly shows that there is some inherent ability in these *Mahābhūtās* to generate the taste of sweetness etc. by their respective combination and produce effect in various ways. These *Mahābhūtās* in spite of being efficient cause of manifestation of *Rasās*, some may not possess any *Rasa* in themselves such as *Dahana* (*Agni*). Despite being tasteless, it is able to produce *Amla, Lavaṇa* and *Kaṭu Rasās*.

रसभेदं दृष्टान्तेनसाधयन्नाह- एवमित्यादि।- In the present verse the author has tried to present the types of *Rasās* by starting with the word '*Evaṃ*'.

रसानां षट्त्वं महाभूतानां न्यूनातिरेकविशेषात् सोमगुणातिरेकपृथिव्यग्न्यतिरेकादे: षड्रुत्पादकारणादुपपन्नं,

षड्भ्य: कारणेभ्य: षट् कार्याणि भवन्तीति युक्तमेवेति भाव:।- The six types of tastes are formed due to the combination of less and more quantity of *Mahābhūtās*.

For example:

- Formation of *Madhura Rasa* due to dominance of *Soma Guṇa*.
- Formation of *Amla Rasa* due to dominance of *Pṛthvī* and *Agni Mahābhūta*.

Thus it should be understood that due to six types of causes for the manifestation of tastes, six types of *Rasās* are produces.

भूतानां यथा नानावर्णाकृतिविशेषा महाभूतानां न्यूनातिरेकविशेषात्, तथा रसानामपीति।- It is seen that the variation in different colors and shapes in human beings is due to the differentiation in the quantities of *Pañcamahābhūtās*. Similarly the combination of less and more quantity of *Mahābhūtās* results in formation of different tastes.

भूतानां यथोक्तानामतिरेकविशेषहेतुमाह- षड्तुकत्वादित्यादि।- The author has explained the rationality of variation in quantities of *Mahābhūtās* is because of the six seasons.

षड्तुकत्वेन कालो नानाहेमन्तादिरूपतया कश्चिद्भूतविशेषं क्वचिद्वर्धयति, स चात्मकार्यं रसं पुष्टं करोति, यथा- हेमन्तकालसोमगुणातिरेको भवति, शिशिरे वाय्वाकाशातिरेक:, एवं तस्याशितीयोक्तरसोत्पादक्रमेण वसन्तादावपि भूतोत्कर्षो ज्ञेय:; षड्तुकाच्चेति चकारेणाहोरात्रकृतोऽपिभूतोत्कर्षो ज्ञेय:,तथाऽदृष्टकृतश्च; तेन हेमन्तादावपि रसान्तरोत्पाद: क्वचिद्वस्तुन्युपपन्नो भवति।- As these six *Ṛtūs* are influences the tastes, any one of the tastes increases in that particular season and nourishes the body. *Jala Mahābhūta* is predominant during *Hemanta Ṛtu; Vāyu* and *Ākāśa Mahābhūtās* are predominant in *Śiśira Ṛtu*. In this way dominance of different *Mahābhūtās* in various seasons can be understood by the explanation given by the author in the chapter entitled '*Tasyāśitīya Adhyāya*'.

The usage of '*Ca kāra*' in the word '*Ṣaḍṛtukatvāt ca*', infers that the variation of *Mahābhūtās* is also seen not only in various seasons but also during day, night and other unseen states also. By this word '*Adṛṣṭa*', it can be understood that formation of unusual tastes in different seasons.

यद्यपि च, ऋतुभेदेऽपि भूतोत्कर्षविशेष एव कारणं, यदुक्तं- "तावेतावर्कवायू" (सू. अ. 6) इत्यादि, तथाऽपि बीजाङ्कुरकार्यकारणभाववत् संसारानादितयैव भूतविशेषत्वो: कार्यकारणभावो वाच्य:।।- On the other hand predominance of *Mahābhūtās* plays an important role in making the variations in seasons as told that *Arka* (sun) and *Vāyu* (air) are the factors responsible for the formation of seasons. (Sū. 6/5). There is an interdependence of seasons and the *Bhūtās* just as seed and sprouts.

Movement of Rasās According to the Dominance of Mahābhūtās [41]

तत्राग्निमारुतात्मका रसा: प्रायेणोर्ध्वभाज:, लाघवादुत्प्लवनत्वाच्च वायोरूर्ध्वज्वलनत्वाच्च वह्ने:; सलिलपृथिव्यात्मकास्तु प्रायेणाधोभाज:, पृथिव्या गुरुत्वान्निम्नगत्वाच्चोदकस्य; व्यामिश्रात्मका: पुनरुभयतोभाज:।।41।।

As *Vāyu* is lighter and it moves naturally upwards and the fire burns and the flames of fire directed upwards; and hence the *Rasās* formed with the predominance of *Vāyu* and *Agni Mahābhūtās* moves in the upward direction. Those *Rasās* formed by the predominace of *Pṛthvī* and *Jala Mahābhūtās* moves downwards as *Pṛthvī* is heavy and *Jala* naturally moves in the downward direction. By the combination of both the types of above mentioned *Bhūtās*, they move in both the directions.

Movement of *Rasās* according to dominance of *Mahābhūta*

Cakrapāṇi:

भूतविशेषकृतं रसानां धर्मान्तरमाह- तत्रेत्यादि।- By starting the verse with the word '*Tatra*', the author has tried to present the other features of the movement of *Rasās* based on the dominancy of *Pañcamahābhūta*.

प्रायेणेति न सर्वे।- '*Prāyeṇa*' means probably but not always.

रसा इति रसयुक्तानि द्रव्याणि।- '*Rasāḥ*' means the substances possessing the *Rasās*.

प्लवनत्वादितिगतिमत्त्वात्; यद्यपि गतिरधोऽपि स्यात्, तथाऽपि लघुत्वपरिगतगतिरिह वायोरूर्ध्वमेव गमनं करोति, यथा-शाल्मलीतुलानाम्।- '*Plavanatvāt*' means moveable or having movement. Though the movement is also having in the downward direction, there will be upward movement can be seen in the lighter substances due to the predominance of *Vāyu Mahābhūta* as the air moves in the upward direction. For example: The silk fibers of *Śālmalī*.

हेत्वन्तरमाह- ऊर्ध्वज्वलनत्वाच्चाग्नेरिति; अग्नेरप्यूर्ध्वगतित्वादित्यर्थः।- The other reason for the upward movement is that the flames of fire always moves in the upward direction, and that is the intention.

निम्नगत्वमधोगत्वमेव।- '*Nimnagati*' means downward movement and it is the natural characteristic feature of water.

Features (Guṇa) & Actions (Karma) of Individual Rasās [42]

तेषां षण्णां रसानामेकैकस्य यथाद्रव्यं गुणकर्माण्यनुव्याख्यास्यामः॥42॥

Now each one of the six *Rasās* are being explained through their characteristics (*Guṇa*) and actions (*Karma*) as follows:

Cakrapāṇi:

यथाद्रव्यमिति यद्यस्य रसस्य द्रव्यमाधारस्तदनतिक्रमेण। एतेन रसानां गुणकर्मणी रसाधारे द्रव्ये बोद्धव्ये इति दर्शयति।- '*Yathā-dravyaṃ*' means to understand without being mentioning the basic taste of the substance. It means the qualities and actions of *Rasās* should be understood as properties of those substances which never change.

Madhura Rasa Guṇa & Karma

तत्र, मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोस्थिमज्जौजःशुक्राभिवर्धन आयुष्यः षडिन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णादाहप्रशमनस्त्वच्यः केश्यः कण्ठ्यो बल्यः प्रीणनो जीवनस्तर्पणो बृंहणः स्थैर्यकरः क्षीणक्षतसन्धानकरो घ्राणमुखकण्ठौष्ठजिह्वाप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्च।

Drugs possessing *Madhura Rasa* (sweet in taste) acts as mentioned under:

- Wholesome to the body (*Śarīra Sātmyāt*) and promotes or increases *Rasa* (plasma), *Rudhira* (blood), *Māṃsa* (muscular tissue), *Medas* (fatty tissue), *Asthi* (bony tissue), *Majjā* (bone marrow), *Śukra* (semen) and *Ojas*.
- Promotes lifespan (*Āyuṣya Abhivardhanaḥ*).
- Pleasing all the six sense organs (*Ṣaḍindriya prasādaka*).
- Relieves *Pitta* and *Vāta* and also acts as antitoxic (*Pitta-viṣa-mārutaghna*).
- Pacifies thirst and burning sensation (*Tṛṣṇā-Dāha-praśamana*).
- Beneficial for skin, hair, throat and acts as strength promoter (*Tvacya-Keśya-Kaṇṭhya-Balya*).
- Gratifying (*Prīṇana*), enlivening (*Jīvana*), satiating (*Tarpaṇa*), nourishing (*Bṛṃhaṇa*) and causes stability (*Sthairyakara*).
- Heal up emaciation and consumption (*Kṣīṇa-Kṣata-Sandhānakara*).
- Soothing to the nose, mouth, throat, lips and tongue (*Ghrāṇa-Mukha-Kaṇṭha-Auṣṭha-Jihvā Prahlādana*).
- Relieves fainting (*Mūrcchā Praśamana*).
- Very much liked by bees and ants (*Ṣaṭpada Pipīlikānām Iṣṭatama*).
- Unctuous (*Snigdha*), cold (*Śīta*) and heavy (*Guru*).

Cakrapāṇi:

तत्रेत्यादि। मधुर आदावुच्यते प्रशस्तायुष्यादिगुणतया प्रायः प्राणिप्रियतया च।- By starting the verse with the word '*Tatra*', the author has presented the *Guṇa* and *Karma* of *Madhura Rasa* initially because it promotes longevity (*Āyuṣya*) and is often liked by the individuals.

षडिन्द्रियाणि मनसा समम्।- '*Ṣaḍindriyāṇi*' means the *Manas* along the five sense organs.

जीवनः अभिघातादिमूर्च्छितस्य जीवनः।- '*Jīvana*' means revival of a person from the state of unconsciousness due to injury.

आयुष्यस्तु आयुःप्रकर्षकारित्वेन।- '*Āyuṣyastu*' means increasing the lifespan.

क्षीणस्य सन्धानकरो धातुपोषकत्वेन; किंवा क्षीणश्चासौक्षतश्चेति, तेन क्षीणक्षतस्य उरःक्षतं संदधाति।- '*Kṣīṇasya Sandhānakara*' means the act of uniting or healing the emaciated through the nourishing property of *Madhura Rasa* or healing the wound in case of *Uraḥ-kṣata*.

षट्पदाद्यभीष्टत्वगुणकथनं प्रमेहपूर्वरूपादिज्ञानोपयुक्तम्। यदुक्तं- "मूत्रेऽभिधावन्ति पिपीलिकाश्च" (चि. अ. 6) इति, तथा रिष्टे वक्ष्यति- "यस्मिन् गृध्नन्ति मक्षिकाः" (इ. अ. 5) इति, अनेन च मधुरत्वं ज्ञायते।- Bees and ants are being attracted due to the influence of *Madhura Rasa*. To diagnose *Prameha* it is mentioned in the premonitory stage of *Prameha* that the ants crawl towards the urine of a patient as it is sweet in taste (Ci. 6/14). Similarly to know the bad prognosis it is mentioned that the bees' crowd are run towards the patient hungrily as the body or sweat of the patient is sweet in

taste (Ca. In. 5/16). These details lay emphasis on the sweetness.

Complications Due to Excessive Intake of Madhura-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाष-मग्नेर्दौर्बल्यमास्यकण्ठयोर्मांसाभिवृद्धिं श्वास-कासप्रतिश्यायालसकशीतज्वरानाहास्यमाधु-र्यवमथुसंज्ञास्वरप्रणाशगलगण्डगण्डमालाश्ली-पदगलशोफबस्तिधमनीगलोपलेपाक्ष्यामया-भिष्यन्दानित्येवंप्रभृतीन् कफजान् विकारा-नुपजनयति (1)

Excessive intake of *Madhura Rasa Dravyās* leads to vitiation of *Kapha* and results in the following complications:

- Obesity (*Sthaulya*).
- Softness (*Mārdava*).
- Lazyness (*Ālasya*).
- Excessive sleep (*Atinidrā*).
- Heaviness (*Gaurava*).
- Lack of desire towards food (*Anannābhilāṣa*).
- Decreased digestive power (*Agni Daurbalya*).
- Abnormal muscular growth in face and throat (*Āsya-Kaṇṭhayoḥ-Māṃsābhivṛddhi*).
- *Śvāsa* (dyspnea), *Kāsa* (cough), *Pratiśyāya* (coryza), *Alasaka* (intestinal hypotony), *Śītajvara* (fever with rigors), *Ānāha* (hardness of bowels), *Āsya-mādhurya* (sweetness in the mouth), *Vamathu* (vomiting), *Sañjñānāsa* (loss of sensation), *Svarapraṇāśa* (aphonia), *Galagaṇḍa* (goiter), *Gaṇḍamālā* (scrofula), *Ślīpada* (filariasis), *Galaśopha* (pharangitis), *Vasti-Dhamanī-Galopalepa* (coating in the bladder, vessels and throat), *Akṣyāmaya* (eye diseases), *Abhiṣyanda* (conjunctivitis) etc.

Cakrapāṇi:

अक्ष्यामयेनैवाभिष्यन्दे लब्धे विशेषोपादानार्थं पुनर्वचनं; किंवा अभिष्यन्दो नासादिष्वपि ज्ञेयः।।- The condition of *Abhiṣyanda* (conjunctivitis) can be understood by the mentioning of the term '*Akṣyāmaya*' itself; but repeatation of the word *Abhiṣyanda* indicates similar affliction such as excessivie moisture or congestion of nose and the other organs.

Amla Rasa Guṇa & Karma

अम्लो रसो भक्तं रोचयति, अग्निं दीपयति, देहं बृंहयति ऊर्जयति, मनो बोधयति, इन्द्रियाणि दृढीकरोति, बलं वर्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यमास्रावयति, भुक्तमपकर्षयति क्लेदयति जरयति, प्रीणयति, लघुरुष्णः स्निग्धश्च।

Drugs possessing *Amla Rasa* (sour in taste) acts as mentioned under:

- Enhances the taste of food (*Bhaktaṃ Rocayati*).
- Increases the power of digestion (*Agniṃ Dīpayati*).
- Nourishes and gives energy to the body (*Dehaṃ Bṛṃhayati Ūrjayati*).
- Enlightens the mind (*Mano Bodhayati*).
- Strengthen the sense organs (*Indriyāṇi Dṛḍhīkaroti*).

- Promotes the strength (*Balaṃ Vardhayati*).
- Helps for the downward movement of *Vāta* (*Vātam Anulomayati*).
- Makes the heart happy (*Hṛdayaṃ Tarpayati*).
- Causes salivation (*Āsyam Āsrāvayati*).
- Helps in swallowing, moistioning and digestion of food (*Bhuktaṃ Apakarṣayati-Kledayati-Jarayati*).
- Gives satisfaction (*Prīṇayati*).
- Light, hot and unctuous (*Laghu-Uṣṇa-Snigdha*).



Cakrapāṇi:

हृदयं तर्पयतीति हृद्यो भवति।- '*Hṛdayaṃ Tarpayati*' means it satiates the heart. That means *Amla Rasa* makes it pleasant for the mind.

भुक्तमपकर्षयतीति सारयति; क्लेदयति तथा जरयति भुक्तमेव।- *Amla Rasa* pushes ingested food downwards, moistens and digests.

Complications Due to Excessive Intake of Amla-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्षयति, संमीलयत्यक्षिणी, संवेजयति लोमानि, कफं विलापयति, पित्त-मभिवर्धयति, रक्तं दूषयति, मांसं विदहति, कायं शिथिलीकरोति, क्षीणक्षतकृशदुर्बलानां श्वयथुमापादयति, अपि च क्षताभिहतदष्टदग्ध-धभग्नशूनप्रच्युतावमूत्रितपरिसर्पितमर्दितच्छि-न्नभिन्नविश्लिष्टोद्विद्धोत्पिष्टादीनि पाचयत्या-ग्नेयस्वभावात्, परिदहति कण्ठमुरो हृदयं च (2)

Excessive intake of *Amla Rasa Dravyās* results in the following complications:

- Produces morbid sensitiveness of the teeth (*Dantān Harṣayati*)
- Thirst (*Tarṣayati*)
- Closure of eyes (*Sammīlayati Akṣiṇī*)
- Horripilation (*Saṃvejayati Lomāni*)
- Liquefaction of *Kapha* (*Kaphaṃ Vilāpayati*)
- Increase of *Pitta* (*Pittam Abhivardhayati*)
- Vitiation of blood (*Raktaṃ Dūṣayati*)
- Decomposition of muscle (*Māṃsaṃ Vidahati*)
- Looseness of the body (*Kāyaṃ Śithilīkaroti*)
- Swelling in wasted, injured, emaciated and weak (*Kṣīṇa-Kṣata-Kṛśa-Durbalānāṃ Śvayathum Āpādayati*)
- Due to hot property induces suppuration (*Āgneya Svabhāvāt Pācayati*) in the conditions like *Kṣata* (ulcer), *Abhihata* (trauma), *Daṣṭa* (bites), *Dagdha* (burns), *Bhagna* (fracture), *Śūna* (swelling), *Pracyuta* (dislocation), *Avamūtrita* (body spots due to urination of poisonous animals),

Parisarpita (creeping the poisonous insects), *Mardita* (bruise), *Chinna* (excision), *Bhinna* (incision), *Viśliṣṭa* (separation), *Udviddha* (puncture) and *Utpiṣṭa* (crushing).

- Causes burning sensation in the throat (*Kaṇṭha*), chest (*Uras*) and cardiac region (*Hṛdaya*).

Cakrapāṇi:

अवमूत्रितं मूत्रविषैर्जन्तुभिः, परिसर्पितं च स्पर्शविशेषैः कारण्डादिभिः।।– '*Avamūtrita*' means contact of the body parts with the urination of poisonous animals. '*Parisarpita*' means creaping the poisonous insects on the body such as *Kāraṇḍa* etc.

Lavaṇa Rasa Guṇa & Karma

लवणोरसः पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनस्तीक्ष्णः सरो विकास्यधःस्रंस्यवकाशकरो वातहरः स्तम्भबन्धसङ्घातविधमनः सर्वरसप्रत्यनीकभूतः, आस्यमास्रावयति, कफं विष्यन्दयति, मार्गान् विशोधयति, सर्वशरीरावयवान् मृदूकरोति, रोचयत्याहारम्, आहारयोगी, नात्यर्थं गुरुः स्निग्ध उष्णश्च।

Drugs possessing *Lavaṇa Rasa* (saline in taste) acts as mentioned under:

- It is carminative (*Pācana*).
- Produces stickiness (*Kledana*).
- Acts as digestive (*Dīpana*).
- Causes secretion (*Cyāvana*).
- Excision (*Chedana*).
- Incision (*Bhedana*).
- Sharp (*Tīkṣṇa*), mobile (*Sara*) and *Vikāsī* .
- Causes downward movement (*Adhaḥ Sraṃsī*).
- Creates space (*Avakāśakara*).
- Pacifies *Vāta* (*Vātahara*).
- Removes stiffness, obstruction and accumulation (*Stambha-Bandha-Saṅghāta Vidhmana*).
- Over power all the tastes (*Sarvarasa pratyanīkabhūtaḥ*).
- Causes salivation (*Āsyam Āsrāvayati*)
- Liquefies *Kapha* (*Kaphaṃ Viṣyandayati*).
- Clears the channels (*Mārgān Viśodhayati*).
- Bestows softness in all the body parts (*Sarva-Śarīra-Avayavān Mṛdūkaroti*).
- Gives taste to food (*Rocayati Āhāram*).
- Useful in food processing (*Āhārayogī*).
- They neither too heavy, unctuous nor hot (*Nātyartha Guru- Snigdha-Uṣṇa*).

Lavaṇa Rasa

Cakrapāṇi:

विकासी क्लेदच्छेदनः।– '*Vikāsī*' means that which removes the wetness or moisture.

अधःस्रंसी विष्यन्दनशीलः।– '*Adhaḥsraṃsī*' means that which makes to ooze.

सर्वरसप्रत्यनीकभूत इति यत्र मात्रातिरिक्तो लवणो भवति तत्र नान्यो रस उपलक्ष्यते।– '*Sarvarasa pratyanīkabhūtaḥ*' means wherever excessive salt is used in any food substance, the saline taste suppresses all other flavors and displays it only in the form of salty.

आहारयोगीति आहारे सदा युज्यते।– '*Āhārayogī*' means that which is used always with food substances.

Complications Due to Excessive Intake of Lavaṇa-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति, रक्तं वर्धयति, तर्षयति, मूर्च्छयति तापयति, दारयति, कुष्णाति मांसानि, प्रगालयति कुष्ठानि, विषं वर्धयति, शोफान् स्फोटयति, दन्तांश्च्यावयति, पुंस्त्वमुपहन्ति, इन्द्रियाण्युपरुणद्धि, वलिपलितखालित्यमापादयति, अपि च लोहितपित्ताम्लपित्तविसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन्विकारानुपजनयति(3)

Excessive intake of *Lavaṇa Rasa Dravyās* results in the following complications:

- Vitiates *Pitta* (*Pittam Kopayati*).
- Aggravates blood (*Raktaṃ Vardhayati*).
- Causes thirst (*Tarṣayati*).
- Causes fainting (*Mūrcchayati*).
- Induce hotness (*Tāpayati*).
- Causes erosion (*Dārayati*).
- Depletion of muscle tissue (*Kuṣṇāti Māṃsāni*).
- Cause to fall off body parts afflicted with *Kuṣṭha* (*Pragālayati Kuṣṭhāni*).
- Aggravates the effects of poisonous substances (*Viṣam Vardhayati*).
- Bursting of inflammed parts (*Śophān Sphoṭayati*).
- Cause to move the teeth (*Dantān Cyāvayati*).
- Causes impoency (*Puṃstvam Upahanti*).
- Obstructs the fuctions of sense organs (*Indriyāṇi Uparuṇaddhi*).
- Produces premature wrinkling, graying of hair and baldness (*Valī-Palita-Khālityam Āpādayati*).
- Produces *Lohitapitta* (hemorragic disorders), *Amlapitta* (hyper acidity), *Visarpa* (erysipelas), *Vātarakta* (gout), *Vicarcikā* (eczema), *Indralupta* (alopecia) etc.

Cakrapāṇi:

मोहयति वैचित्यं कुरुते।– '*Mohayati*' means that which causes mental confusion.

मूर्च्छयतीति संज्ञानाशं करोति।।– '*Mūrcchayati*' means that which causes loss of consciousness.

Kaṭu Rasa Guṇa & Karma

कटुको रसो वक्त्रं शोधयति, अग्निं दीपयति, भुक्तं शोषयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि, अलसकश्वयथूपचयोदर्दाभिष्यन्दस्नेहस्वेदक्लेदमलानुपहन्ति, रोचयत्यशनं, कण्डूर्विनाशयति व्रणानवसादयति, क्रिमीन् हिनस्ति, मांसं विलिखति, शोणितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च।

Drugs possessing *Kaṭu Rasa* (pungent in

taste) acts as mentioned under:

- Keeps the mouth clean (*Vaktraṃ Śodhayati*).
- Promotes the power of digestion (*Agniṃ Dīpayati*).
- Helps in absorption of food (*Bhuktaṃ Śoṣayati*).
- Causes secretion from nose (*Ghrāṇam Āsrāvayati*).
- Induces lacrimation (*Cakṣur virecayati*).
- Facilitate the proper functioning of sense organs (*Sphuṭīkarotī Indriyāṇi*).
- Cures the diseases like *Alasaka* (intestinal hypotony), *Śvayathu* (oedema), *Upacaya* (obesity), *Udarda* (urticaria), *Abhiṣyanda* (conjunctivitis).
- Removes *Sneha* (unctuousness), *Sveda* (sweating), *Kleda* (moisture) and *Mala* (waste products).
- Gives taste to the food (*Rocayati Aśanaṃ*).
- Cures itching sensation (*Kaṇḍūḥ Vināśayati*).
- Retards the growth of ulcers (*Vraṇān Avasādayati*).
- Kills the germs (*Krimīn Hinasti*).
- Scrapes the muscle tissue (*Māṃsaṃ Vilikhati*).
- Breaks the blood clots (*Śoṇita-Saṅghātaṃ Bhinatti*).
- Removes the obstructions (*Bandhāṃ cinatti*).
- Clears the channels (*Mārgān vivṛṇoti*).
- Alleviates *Kapha* (*Śleṣmāṇaṃ Śamayati*).
- Possesses *Laghu-Uṣṇa-Rūkṣa Guṇa*.


Kaṭu Rasa

Complications Due to Excessive Intake of Kaṭu-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पुंस्त्वमुपहन्ति, रसवीर्यप्रभावान्मोहयन्ति, ग्लापयति, सादयति, कर्शयति, मूर्च्छयति, नमयति, तमयति, भ्रमयति, कण्ठं परिदहति, शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति; अपि च वाय्वग्निगुणबाहुल्याद्भ्रमदवथुकम्पतोदभेदैश्चरणभुजपार्श्वपृष्ठ प्रभृतिषु मारुतजान् विकारानुपजनयति (4);

Excessive intake of *Kaṭu Rasa Dravyās* results in the following complications:

- Due to the influence of *Vipāka* it causes impotence (*Vipāka Prabhāvat Puṃstvam Upahanti*).
- Due to the influence of *Rasa* and *Vīrya* it causes unconsciousness (*Rasa-Vīrya Prabhāvāt Mohayanti*).
- It causes exhaustion (*Glāpayati*).
- It causes weariness (*Sādayati*).
- Causes emaciation (*Karśayati*).
- Causes fainting (*Mūrcchayati*).
- Causes to bend the body (*Namayati*).
- Causes choking (*Tamayati*).
- Causes giddiness (*Bhramayati*).
- Produces burning sensation in the throat (*Kaṇṭhaṃ Paridahati*).
- Produces temparature in the body (*Śarīra-tāpam Upajanayati*).
- Reduces the body strength (*Balaṃ Kṣiṇoti*).
- Produces thirst (*Tṛṣṇāṃ Janayati*).
- Due to dominance of *Vāyu* and *Agni* it produces *Bhrama* (giddiness); *Davathu* (burning sensation); *Kampa* (tremors); *Toda* (pricking pain) and *Bheda* (stabbing pain) in the legs (*Caraṇa*), hands (*Bhuja*), flanks (*Pārśva*) and back (*Pṛṣṭha*); and other *Vāta* disorders.

Cakrapāṇi:

विपाकस्य प्रभावो विपाकप्रभावः, विपाकश्च कटूनां कटुरेव; रसस्य वीर्यस्य च प्रभावो रसवीर्यप्रभावः; अयं च वक्ष्यमाणे सर्वत्र हेतुः।– The effect of *Vipāka* is known as '*Vipāka Prabhāva*'. The *Vipāka* of *Kaṭu Rasa* is always having *Kaṭu Vipāka* only. The effect of *Rasa* and *Vīrya* is known as '*Rasa-Vīrya Prabhāva*', which is always present in *Rasās*.

चरणादीनां साक्षाद्ग्रहणं तत्रैव प्रायो वातविकारभावात्।– By the mention of *Caraṇa*, *Bhuja*, *Pārśva*, *Pṛṣṭha* etc. (43/4) it should be understood as common sites of manifestation of *Vāta* disorders.

अत्र च विपाकप्रभावादिकथनमुदाहरणार्थं, तेन मधुरादिषु विपाकादिकार्यमुन्नेयम्।– Here the effect of *Vipāka* etc. are given for the sake of example. The effects of *Madhura Vipāka* and the others should be inferred.

Tikta Rasa Guṇa & Karma

तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः क्रिमिघ्नो मूर्च्छादाहकण्डूकुष्ठ तृष्णाप्रशमनस्त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नो दीपनः पाचनः स्तन्यशोधनो लेखनः क्लेदमेदोवसामज्जलसीकापूयस्वेदमूत्रपुरीष-पित्तश्लेष्मोपशोषणो रूक्षः शीतो लघुश्च।

Drugs possessing *Tikta Rasa* (bitter in taste) acts as mentioned under:

- Although it is not tasty itself, but it promotes deliciousness (*Svayam Arociṣṇu api Arocaghna*).
- Anti-toxic (*Viṣaghna*).
- Germicidal (*Krimighna*).
- Cures *Mūrcchā* (fainting), *Dāha* (burning sensation), *Kaṇḍū* (itching sensation), *Kuṣṭha* (skin diseases) and *Tṛṣṇā* (thirst).
- Promotes firmness of skin and muscles (*Tvak Māṃsayoḥ Sthirīkaraṇo*).
- Relieves fever (*Jvaraghna*).
- Digestive (*Dīpana*).
- Carminative (*Pācana*).
- Purifies breast milk (*Stanya śodhana*)
- *Lekhana*.
- Causes dry and depletion of moisture (*Kleda*), fat (*Medas*), muscle fat (*Vasā*), bone marrow (*Majjā*), lymph (*Lasīkā*), pus (*Pūya*), sweat (*Sveda*), urine (*Mūtra*), stool (*Purīṣa*), *Pitta* and *Śleṣma*.

- Possesses the attributes like *Rūkṣa* (dry), *Śīta* (cold) and *Laghu* (light).

Tikta Rasa

Complications Due to Excessive Intake of Tikta-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो रौक्ष्यात्खरविषदस्वभावाच्च रसरुधिरमांसमेदोस्थिमज्जशुक्राण्युच्छोषयति, स्रोतसां खरत्वमुपपादयति, बलमादत्ते, कर्शयति, ग्लपयति, मोहयति, भ्रमयति, वदनमुपशोषयति, अपरांश्च वातविकारानुपजनयति (5);

Excessive intake of *Tikta Rasa Dravyās* results in the following complications:

- Due to dryness (*Raukṣya*), roughness (*Khara*) and non-sliminess (*Viśada*) it reduces *Rasa* (lymph), *Rudhira* (blood), *Māṃsa* (muscle tissue), *Medas* (fat), *Asthi* (bone), *Majjā* (bone marrow) and *Śukra* (semen).
- Produces roughness in the channels (*Srotasāṃ Kharatvam Upapādayati*).
- Takes away the strength (*Balaṃ Ādatte*).
- Causes emaciation (*Karśayati*).
- Weariness (*Glāpayati*).
- Causes confusion (*Mohayati*).
- Causes giddiness (*Bhramayati*).
- Produces dryness in the mouth (*Vadanam Upaśoṣayati*).
- Manifests other types of *Vāta* disorders (*Vāta Vikāran Upajanayati*).

Cakrapāṇi:

ग्लपयति हर्षक्षयं करोति।– '*Glāpayati*' means that which cause for the removal of happiness or which leads to exhaustion

Kaṣāya Rasa Guṇa & Karma

कषायो रसः संशमनः संग्राही सन्धानकरः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतोऽलघुश्च।



Kaṣāya Rasa

Drugs possessing *Kaṣāya Rasa* (astringent in taste) acts as mentioned under:

- *Paliative* (*Saṃśamana*), constipative (*Saṅgrāhī*) and promotes union (*Sandhānakara*).
- Produces pressure on the affected part (*Pīḍano*).

- Causes healing (*Ropaṇa*); absorbing or drying (*Śoṣana*) and arresting (*Stambhana*).
- Alleviates *Śleṣma*, *Rakta* and *Pitta*.
- Absorbs the body fluid (*Śarīra Kledasya Upayoktā*).
- Possesses the attributes like *Rūkṣa* (dry), *Śīta* (cold) and *Alaghu* (heavy).

Complications Due to Excessive Intake of Kaṣāya-rasa Dravya

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमान आस्यं शोषयति, हृदयं पीडयति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, श्यावत्वमापादयति, पुंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषरेतांस्यवगृह्णाति, कर्शयति, ग्लपयति, तर्षयति, स्तम्भयति, खरविशदरूक्षत्वात् पक्षवधग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयति॥43॥

Excessive intake of *Kaṣāya Rasa Dravyās* results in the following complications:

- Causes dryness of mouth (*Āsyam Śoṣayati*).
- Feeling of compression over cardiac region (*Hṛdayaṃ Pīḍayati*).
- Causes abdominal distension (*Udaram Ādhmāpayati*).
- Causes obstruction in speech (*Vācaṃ Nigṛhṇāti*).
- Obstructs the channels (*Srotāṃsi Avabadhnāti*).
- Causes blackish discoloration (*Śyāvatvam Āpādayati*).
- Decreases the virility (*Puṃstvam Upahanti*).
- Delays digestion (*Viṣṭabhya Jarāṃ Gacchati*).
- Obstructs the flow of *Vāta*, *Mūtra*, *Purīṣa* and *Retas* (semen).
- Causes emaciation (*Karśayati*).
- It causes exhaustion (*Glāpayati*).
- Induces thirst (*Tarṣayati*).
- Produces stiffness (*Stambhayati*).
- Due to *Khara* (roughness), *Viśada* (non-sliminess) and *Rūkṣatva* (dryness) it causes *Pakṣavadha* (hemiplegia), *Graha* (spasm), *Apatānaka* (convulsions), *Ardita* (facial paralysis) and other *Vāta* disorders.

Cakrapāṇi:

पीडनो व्रणपीडनः।– '*Pīḍana*' means which produces pressure on the wound.

शरीरक्लेदस्योपयोक्तेति आचूषकः।– '*Śarīra Kledasya Upayokta*' means that which causes to absorb the moisture in the body.

'शीतोऽलघुश्च' इत्यकारप्रश्लेषादलघुः।– In the word '*Śīto Alaghuśca*', the term *Alaghu* should be understood as *Guru* because of the usage of '*Akāra*' before *Laghu*.

अवगृह्णातीति बद्धानि करोति ।– '*Avagṛhṇāti*' means that which causes the flow to stop or control.

Conclusion Regarding Guṇa and Karma of Rasās:

इत्येवमेते षड्रसाः पृथक्त्वेनैकत्वेन वा मात्रशः सम्यगुपयुज्यमाना उपकाराय भवन्त्यध्यात्मलोकस्य, अपकारकराः पुनरतोऽन्यथा भवन्त्युपयुज्यमानाः; तान् विद्वानुपकारार्थमेव मात्रशः

...म्युपयोजयेदिति॥४४॥

Thus these are the six tastes when used separately or jointly in an appropriate quantity are beneficial to the human beings; and consumption of improper quantity leads to harmful effects. Therefore an intelligent person should use them in the right quantity to get beneficial results.

Cakrapāṇi:

पृथक्त्वेनेति एकैकशो मात्रश:।- '*Pṛthaktvena*' means to use the six tastes separately with an appropriate quantity.

एकत्वेनेति एकीकृत्य समुदायमात्रश इत्यर्थ:।- '*Ekatvena*' means the use of all the tastes jointly with an appropriate quantity.

मात्रश इति मात्रया।- '*Mātraśa*' means usage of appropriate quantity.

तच्चैकीकरणंद्वित्र्यादिभि: सर्वैर्ज्ञेयम्।- The mixture of *Rasās* should be known by the combination of two or three *Rasās*.

अध्यात्मलोकस्येतिसर्वप्राणिजनस्य।- '*Adhyātmaloka*' means the world of all living beings.

अन्यथेति अमात्रया।- '*Anyathā*' means improper quantity.

Determination of Vīrya According to Rasa

भवन्ति चात्र-

शीतं वीर्येण यद्द्रव्यं मधुरं रसपाकयो:।

तयोरम्लं यदुष्णं च यद्द्रव्यं कटुकं तयो:॥४५॥

Thus it is said:

- The drugs which possess *Madhura Rasa* and *Madhura Vipāka* are of having *Śīta Vīrya*.
- In the same way the drugs possessing *Amla Rasa* and *Vipāka* as well as *Kaṭu Rasa* and *Kaṭu Vipāka* will be of *Uṣṇa Vīrya*.



Cakrapāṇi:

संप्रति रसद्वारेणैव द्रव्याणां वीर्यमाह- शीतमित्यादि।- Now the author has presented the details regarding the determination of *Vīrya* of a substance based on its taste by starting the verse with the word '*Śītam*'.

यद्द्रव्यं रसे पाके च मधुरं तच्छीतं वीर्येण ज्ञेयं; तथा तयोरिति रसपाकयोर्यदम्लं द्रव्यं तदुष्णं वीर्येण; तथा यच्च द्रव्यं तयोरिति रसपाकयो: कटुकमुक्तं तच्चोष्णं वीर्येण,'भवति' इति शेष:। किंवा 'यच्चोष्णं कटुकं तयो:' इति पाठ:।- The drug which possess *Madhura Rasa* and *Madhura Vipāka* should be known as that the drug belongs to *Śīta Vīrya*. Similarly the drug possessing *Amla Rasa* and *Amla Vipāka* belongs to *Uṣṇa Vīrya*. Likewise *Kaṭu Rasa* and *Kaṭu Vipāka* drugs also should be known as *Uṣṇa Vīrya Dravyās*. Or based on the other version 'यच्चोष्णं कटुकं तयो:', it can be known that *Kaṭu Rasa* and *Vipāka* drugs are having *Uṣṇa Vīrya*.

तत्र यद्रसतो मधुरं तद्वीर्यत: शीतमिति वक्तव्ये यद्रसपाकयोरिति करोति, तन्मधुररसोचितपाकस्यैव मधुरद्रव्यस्य शीतवीर्यताप्राप्त्यर्थम्; एवमम्लकटुकयोरपि वाच्यम्।- Here the drug and diet which contains *Madhura Rasa* is having *Śīta Vīrya* and it is going to be converted into *Madhura Vipāka*, because the usual transformation of *Madhura Rasa* is *Madhura Vipāka* only. Thus *Madhura Rasa Dravyās* normally fall under the group of *Śīta Vīrya*. The same principle also can be applicable to the drugs and diets of *Amla Rasa* and *Kaṭu Rasa*.

More Details about Rasa [47]

तेषां रसोपदेशेन निर्देश्यो गुणसंग्रह:।

वीर्यतोऽविपरीतानां पाकतश्चोपदेक्ष्यते॥४६॥

यथा पयो यथा सर्पिर्यथा वा चव्यचित्रकौ।

एवमादीनि चान्यानि निर्दिशेद्रसतो भिषक्॥४७॥

- Here the properties of the substances whose *Vīrya* and *Vipāka* are in accordance with *Rasa* are explained.
- For example both milk and ghee contain *Madhura Rasa* and *Madhura Vipāka* and therefore they should be having *Śīta Vīrya*. Similarly both *Cavya* and *Citraka* possess *Kaṭu Rasa* and *Kaṭu Vipāka* and thus they belong to *Uṣṇa Vīrya*.
- Thus the physician can understand the properties of other similar substances on the basis of same analogy.

Cakrapāṇi:

तेषामिति मधुरपाकादीनां,- *Teṣām*' means among the *Vipākās* such as *Madhura*, *Amla* and *Kaṭu* etc.;

रसोपदेशेनेति रसमात्रकथनेनैव, यतो विपाकोऽपि रसत एव प्रायो ज्ञायते; यद्वक्ष्यति-'कटुतिक्तकषायाणां विपाक: प्रायश: कटु:' इत्यादि।- Just by saying the taste of any substance, the *Vipāka* of that drug can be identified, because the *Vipāka* is recognized by the knowledge of *Rasa*. It has already been reported that the drugs possessing *Kaṭu*, *Tikta* and *Kaṣāya Rasās* are probably having *Kaṭu Vipāka*.

एतच्च न सर्वत्रेत्याह- वीर्यत इत्यादि।- The above rule is not applicable in all the times and the same opinion is explained in the present verse by starting with the word '*Vīrya to*'.

वीर्यतोऽविपरीतानां रसद्वारा वीर्यज्ञानं, न तु रसविरुद्धवीर्याणां महापञ्चमूलादीनां; न केवलं रसेन किंतर्हि पाकतश्च य उपदेक्ष्यते गुणसंग्रह: 'शुक्रहा बद्धविण्मूत्रो विपाको वातल: कटु:' इत्यादिना, स च वीर्यतोऽविरुद्धानां विज्ञेय:; यदि तत्र वीर्यं विरोधि भवति तदा विपाकोऽपि यथोक्तगुणकारी न स्यात्।- Whenever the *Vīrya* and *Vipāka* are in conformity with *Rasa*, the knowledge of *Vīrya* of any one of the substances can be known directly on the basis of its *Rasa* only. But this theory doesn't apply in cases of such of the drugs and diets where *Vīrya* is not in conformity with *Rasa*. For example: *Bṛhat Pañcamūla* (Among them some of the drugs are having *Madhura*, *Tikta* and *Kaṣāya Rasa* but it belong to the category of *Uṣṇa Vīrya Dravya*). Thus only on the basis

of *Rasa* one cannot ascertain the *Vipāka* of any one of the drugs. Do at times even the *Vipāka* give the knowledge of the attributes as is said that "*Kaṭu Vipāka* aggravates *Vāta*; causes constipation and oliguria; and reduces semen". This is only can be known when the *Vīrya* is not contrary with *Rasa*. If the *Vīrya* is contrary with *Rasa*, the knowledge of attributes cannot be understood on the basis of *Vipāka*.

किंवा, पाकतश्चाविपरीतानां रसोपदेशेन गुणसंग्रहः शीतोष्णलक्षणोनिर्देश्यः, यस्यास्तुपिप्पल्याः कटुकायाअपि विपरीतमधुरपाकित्वं, न तत्र कटुरसत्वेनोष्णत्वमित्यर्थः।– If *Vīrya* is not compatible with *Vipāka*, then the substance will not show appropriate action; as in *Pippalī* which has *Kaṭu Rasa* but *Madhura Vipāka*; The *Uṣṇa Guṇa* is not correspond to *Kaṭu Rasa* because the *Vipāka* is *Madhura*.

अस्मिंश्च पक्षे 'उपदेक्ष्यते' इति 'यथा पयः' इत्यादिना संबध्यते। तान्येवाविपरीतवीर्यविपाकान्याह– यथा पय इत्यादि। पयःप्रभृतीनि हि द्रव्यगुणकथनेऽविरुद्धवीर्यविपाकान्युपदेष्टव्यानि।।– '*Asmiṃśca Pakṣe*' means the theory of compatibility of *Vīrya* with *Vipāka*. For example: *Paya* (milk). It possesses *Madhura Rasa*, *Madhura Vipāka* and *Śīta Vīrya*. Thus the properties of milk can be assessed, just with the knowledge of *Rasa*.

Viruddha Vīrya Dravya - Examples [48-49]

मधुरं किंचिदुष्णं स्यात् कषायं तिक्तमेव च।
यथा महत्पञ्चमूलं यथाऽब्जानूपमामिषम्॥48॥
लवणं सैन्धवं नोष्णमम्लमामलकं तथा।
अर्कागुरुगुडूचीनां तिक्तानामुष्णमुच्यते॥49॥

Here are some examples of *Vīrya* in contrary to *Rasa*:

- Meat of aquatic and marshy animals: Even though they possess *Madhura Rasa* they are having *Uṣṇa Vīrya*.
- Similarly *Bṛhat Pañcamūla*, even though they possess *Kaṣāya* and *Tikta Rasa* they exhibit *Uṣṇa Vīrya* instead of *Śīta Vīrya*.
- In the same way *Saindhavalavaṇa* and *Āmalakī* exhibits *Śīta Vīrya* instead of *Uṣṇa Vīrya* even though they possess *Lavaṇa* and *Amla Rasās* respectively.
- Likewise *Arka*, *Aguru* and *Guḍūcī* possess *Tikta Rasa* but they exhibit *Uṣṇa Vīrya* instead of *Śīta Vīrya*.



Ānūpa, Udaka Māṃsa
- ***Madhura Rasa***
- ***Uṣṇa Vīrya***

Bṛhat Pañcamūla
- ***Kaṣāya Tikta Rasa***
- ***Uṣṇa Virya***

Saindhvalavaṇa & Āmalakī
- ***Lavaṇa Rasa & Amla Rasa Respectively***
- ***Śīta Vīrya***

Arka, Aguru & Guḍūcī
* ***Tikta Rasa***
* ***UṣṇaVīrya***

Viruddha Vīrya Dravya

Cakrapāṇi:

संप्रति यत्र विरुद्धवीर्यत्वेन रसेनोष्णत्वादि न निर्देश्यं तदाह– मधुरमित्यादि।– Now the author has submitted that it is unable to identify the *Vīrya* based on *Rasa* in case of *Viruddha Vīrya* by starting the verse with the word '*Madhuraṃ*'.

किंचित् कषायं चोष्णं तिक्तं चोष्णमिति योजना, कषायतिक्तलवणानामुदाहरणमसूत्रितानामपि प्रकरणात् कृतम्।– Some of the drugs having *Madhura Rasa* belongs to *Uṣṇa Vīrya*; some *Kaṣāya Rasa* and *Tikta Rasa Dravyās* also belongs to the group of *Uṣṇa Vīrya*. Even though the examples of drugs containing *Kaṣāya*, *Tikta* and *Lavaṇa* are not given here, they will be mentioned at the respective places.

महत्पञ्चमूलं बिल्वादिपञ्चमूलमिह। एतच्च तिक्तस्य कषायस्य चोष्णतायामुदाहरणम्,– *Mahatpañcamūla* means *Bilvādi Pañcamūla* and it is the example of *Uṣṇa Vīrya Dravya* which contains *Tikta*, *Kaṣāya Rasās*.

अब्जानूपामिषं तु मधुरस्योष्णवीर्यत्वे।– Though the meat of aquatic and marshy animals contains *Madhura Rasa* they comes under the category of *Uṣṇa Vīrya Dravyās*.

Some more Details about Rasa [50-52]

किंचिदम्लं हि संग्राहि किंचिदम्लं भिनत्ति च।
यथा कपित्थं संग्राहि भेदि चामलकं तथा॥50॥
पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते।
कषायः स्तम्भनः शीतः सोऽभयायामतोऽन्यथा ॥51॥
तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेत्।
दृष्टं तुल्यरसेऽप्येवं द्रव्ये द्रव्ये गुणान्तरम्॥52॥

- Some drugs having *Amla Rasa* acts as constipating such as *Kapittha*; and the others like *Āmalakī* acts as laxative.
- Even though *Kaṭu Rasa* is said to be non-aphrodisiac (*Avṛṣya*), nevertheless *Pippalī* and *Nāgara* both of *Kaṭu Rasa* drugs acts as aphrodisiac (*Vṛṣya*) due to their *Madhura Vipāka*.
- In general *Kaṣāya Rasa* drugs should be of *Śīta Vīrya* and arrests or stops the flow (*Stambhana*) but *Harītakī* is an exception and it possess *Uṣṇa Vīrya* and acts as laxative.
- Thus it is not possible to understand the properties of all the drugs only on the basis of their tastes, because individual drugs with similar tastes are different in relation to their properties.

Cakrapāṇi:

वीर्यप्रसङ्गादन्यमप्यम्लादीनां विरुद्धगुणमाह– किंचिदित्यादि।– The author has introduced the verse with the word '*Kiṃcit*' and presented the *Viruddha Vīrya* of *Amla* and other flavored substances.

अभयायामतोऽन्यथेति अभयायां कषायो रसो भेदनश्चोष्णश्चेत्यर्थः।– '*Abhayāyām ato anyathā*' – Although *Abhayā*(*Harītakī*) has *Kaṣāya Rasa* it acts as cathartic (*Bhedi*) rather than arresting the flow of fluids from the body (*Stambhaka*) due to its *Uṣṇa Vīrya*.

Relative Superiority of Tastes Based on Certain Qualities [53-56]

रौक्ष्यात् कषायो रूक्षाणामुत्तमो मध्यमः कटुः।
तिक्तोऽवरस्तथोष्णानामुष्णत्वाल्लवणः परः॥53॥
मध्योऽम्लः कटुकश्चान्त्यः स्निग्धानां मधुरः परः।
मध्योऽम्लोलवणश्चान्त्योरसःस्नेहान्निरुच्यते॥54॥
मध्योत्कृष्टावराः शैत्यात् कषायस्वादुतिक्तकाः ।
स्वादुर्गुरुत्वादधिकः कषायाल्लवणोऽवरः॥55॥
अम्लात् कटुस्ततस्तिक्तो लघुत्वादुत्तमोत्तमः ।
केचिल्लघूनामवरमिच्छन्ति लवणं रसम्॥56॥
गौरवे लाघवे चैव सोऽवरस्तूभयोरपि।

Rasās are categorized into 3 types viz. *Uttama* (superior / high), *Madhyama* (moderate) and *Avara* (inferior / low) in relation to the prominent six attributes.

S. No.	Name of the Attribute	Uttama (superior / high)	Madhyama (moderate)	Avara
1.	*Rūkṣa*	*Kaṣāya*	*Kaṭu*	*Tikta*
2.	*Snigdha*	*Madhura*	*Amla*	*Lavaṇa*

3.	Uṣṇa	Lavaṇa	Amla	Kaṭu
4.	Śīta	Madhura	Kaṣāya	Tikta
5.	Guru	Madhura	Kaṣāya	Lavaṇa
6.	Laghu	Tikta	Kaṭu	Amla

- Some scholars opined that *Laghu Guṇa* is low in *Lavaṇa Rasa*. Thus the drugs possessing *Lavaṇa Rasa* are inferior in both *Guru* and *Laghu Guṇa*.

Cakrapāṇi:

रौक्ष्यादित्यादि।– The author has started the verse with the word '*Raukṣyāt*' and presented the relative superiority of the tastes based on certain qualities.

रौक्ष्येण कषाय उत्तम इति रूक्षतमः, तिक्तो रूक्षः, कटुस्तु मध्यो रूक्षतरः; एवमन्यत्रापि।– In view of *Rūkṣa Guṇa*, *Kaṣāya Rasa* displays it at the maximum level i.e. *Rūkṣa Tama*; while *Tikta Rasa* has the lowest level i.e. *Rūkṣa* and *Kaṭu Rasa* is considered to be *Rūkṣa* Tara i.e. a medium level. In the similar fashion the maximum, medium and the lowest levels of various attributes in different tastes should be understood.

कटुकश्चान्त्य इति अवर इत्यर्थः।– '*Kaṭukaścāntya*' means that *Uṣṇa Guṇa* has the lowest level in *Kaṭu Rasa*.

एवं लवणश्चान्त्य इति अवर इत्यर्थः। लवणोऽवर इति गुरुत्वेनेत्यर्थः।– '*Lavaṇaścāntya*' means in view of *Guru Guṇa*, *Lavaṇa Rasa* displays it at the minimum level.

अम्लात् कटुरित्यादौ अम्लात् कटुर्लघुः, ततः कटुकादुत्तमात्तिक्तो लघुत्वेनोत्तमोत्तमः; उत्तमात् कटुकादत्तम उत्तमोत्तमः।– '*Amlāt Kaṭu*' means *Kaṭu* is more *Laghu* in comparison with *Amla Rasa*. Similarly *Tikta Rasa* is much more *Laghu* than *Kaṭu*. Thus in view of *Laghu Guṇa* it can be said that *Amla Rasa* is *Laghu*; *Kaṭu Rasa* is *Laghu-tara* and *Tikta Rasa* is *Laghu-tama*.

एकीयमतमाह- केचिदित्यादि। एकीयमतं वचनभङ्ग्या स्वीकुर्वन्नाह- गौरव इत्यादि। एतेन, गौरवे लाघवे चावरत्वं लवणस्य स्वीकुर्वन् गौरवेऽवर इत्यनेनाम्लकटुतिक्तेभ्यो गुरुत्वं स्वीकरोति लवणस्य, लाघवे चावर इत्यनेनाम्लादपि लघुनोऽल्पं लाघवं लवणस्य स्वीकरोति। न च वाच्यम्- अम्ले पृथिवी कारणं लवणे तु तोयं, ततः पृथिव्यपेक्षया तोयजन्यस्य लवणस्यैव लाघवमुचितमिति; यतो न भूतनिवेशेन गौरवलाघवे शक्येतेऽवधारयितुं, तथाहि तोयातिरेककृतो मधुरः पृथिव्यतिरेककृतात् कषायाद्गुरुर्भवति।– By the mentioning of the term '*Kecit*', the author has presented the opinion of other scholars and which can be accepted. It should not be argued that the drugs having *Amla Rasa* should be heavier due to the dominance of *Pṛthvī Mahābhūta* when compared with *Lavaṇa Rasa* as they are formed by the dominance of *Jala Mahābhūta*. The heaviness or lightness cannot be determined on the basis of the predominance of the *Mahābhūtās* concerned. Even the *Madhura Rasa*, which is composed of *Jala Mahābhūta*, is heavier than *Kaṣāya Rasa* which is composed due to the dominance of *Pṛthvī Mahābhūta*.

Enunciation of Vipāka [57-58]

परं चातो विपाकानां लक्षणं संप्रवक्ष्यते॥57॥
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः।
अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणस्तथा॥58॥

Generally the relationship with *Rasa* and *Vipāka* is as follows.

- *Kaṭu*, *Tikta* and *Kaṣāya Rasa Dravyās* are going to be transformed into *Kaṭu Vipāka* in general.
- *Amla Rasa Dravyās* will be converted into *Amla Vipāka*.
- In the same way *Madhura* and *Lavaṇa Rasa Dravyās* are going to be transformed into *Madhura Vipāka* in general.



Cakrapāṇi:

संप्रति विपाकस्यापि रसरूपत्वाल्लक्षणमाह- परमित्यादि।– As *Vipāka* is also having the features of *Rasa*, the author has presented the characteristics of *Vipāka* in the present verse by starting with the word '*Paraṃ*'.

प्रायोग्रहणात् पिप्पलीकुलत्थादीनां रसाननुगुणपाकितां दर्शयति। कटुकादिशब्देन च तदाधारं द्रव्यमुच्यते, यतो न रसाः पच्यन्ते किंतु द्रव्यमेव।– On the basis of the word '*Prāyaḥ*', it should be understood that the *Vipāka* of the drugs like *Pippalī*, *Kulattha* etc. are not in accordance with their *Rasās*. With the word '*Kaṭu*' etc. it should be taken as its supporting substance because the digestion of substances is done not on the basis of *Rasās*.

लवणस्तथेति लवणोऽपि मधुरविपाकः प्राय इत्यर्थः।– '*Lavaṇastathā*' means that *Lavaṇa Rasa Dravyās* are probably transformed into *Madhura Vipāka*.

विपाकलक्षणं तु- जङ्गराग्नियोगादाहारस्य निष्ठाकाले यो गुण उत्पद्यते स विपाकः;वचनं हि- "जाङ्गरेणाग्निना योगाद्यदुदेति रसान्तरम्। आहारपरिणामान्ते स विपाकः प्रकीर्तितः;" (वा. सू. अ. ९)।– After the ingestion, the food gets digested by the digestive fire (*Jāṭharāgni*) and the properties that emerge thereafter are known as *Vipāka*. It is also quoted by *Vāgbhaṭa* in the *Sūtrasthāna* of his work vide 1/20 that the altered *Rasa* emerging at the end of digestion of ingested food after contact with *Jāṭharāgni* is known as *Vipāka*.

Snigdha & Rūkṣa Rasās [59-60]

मधुरो लवणाम्लौ च स्निग्धभावात्त्रयो रसाः।
वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः॥59॥
कटुतिक्तकषायास्तु रूक्षभावात्त्रयो रसाः।
दुःखाय मोक्षे दृश्यन्ते वातविण्मूत्ररेतसाम्॥60॥

- Due to unctuousness (*Snigdha Bhava*) of the drugs possessing *Madhura*, *Lavaṇa* and *Amla Rasa* can be easily eliminates *Vāta*, *Mūtra* and *Purīṣa*.
- Since there is un-unctuousness (*Rūkṣa Bhava*) in the drugs containing *Kaṭu*, *Tikta* and *Kaṣāya Rasa* and therefore, it is difficult to eliminate *Vāta*, *Mūtra*, *Purīṣa* and *Retas* (semen).

Cakrapāṇi:

संप्रति वक्ष्यमाणविपाकलक्षणे मधुराम्लपाकयोर्वातमूत्रपुरीषानवरोधकत्वे तथा कटोर्विपाकस्य वातमूत्रपुरीषविबन्धकत्वे हेतुमाह- मधुर इत्यादि।– By starting the present verse with the word '*Madhura*' the author has tried to present the rationality of the action of the substances that those possessing *Madhura* and *Amla Vipāka* as elimination of *Mūtra* and *Purīṣa*; and the action of *Kaṭu Vipāka* as creation of obstacles in elimination of *Mūtra* and *Purīṣa*.

अत्र मधुराम्ललवणा निष्ठापाकं गता अपि सन्तःस्नेहगुणयोगाद्वातमूत्रपुरीषाणां विसर्गं सुखेन कुर्वन्तीति वाक्यार्थः। तेन मधुराम्लपाकयोरेतत्

समानं लवणम्। एवं कटुतिक्तकषायेष्वपि विपर्ययेऽपि [illegible]र्थः।।– The tastes such as *Madhura*, *Amla* and *Lavaṇa* even after their transformation into their respective *Vipāka*, they do not give up their *Sneha Guṇa* (unctuous property) and hence they cause for comfortable elimination of faeces, urine etc. Therefore both *Madhura* and *Amla Vipāka Dravyās* possess this kind of similar actions. On the basis of same analogy, the action of the drugs having *Kaṭu*, *Tikta* and *Kaṣāya Rasās* also can be understood. That means the substances possessing *Kaṭu*, *Tikta* and *Kaṣāya Rasās* will be transformed into *Kaṭu Vipāka*, even after that they do not give up their *Rūkṣa Guṇa* (un-unctuousness) and hence they create obstacles in the elimination of faeces, urine etc.

Actions of Different Types of Vipāka [61-62]

शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः।
मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः॥61॥
पित्तकृत् सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः।
तेषां गुरुः स्यान्मधुरः कटुकाम्लावतोऽन्यथा॥62॥

- *Kaṭu Vipāka* aggravates *Vāta*, reduces *Śukra Dhātu* and obstructs *Viṭ* (stools) and *Mūtra* (urine).
- *Madhura Vipāka* aggravates *Kapha*, increases *Śukra Dhātu* and easily eliminates *Viṭ* (stools) and *Mūtra* (urine).
- *Amla Vipāka* aggravates *Pitta*, reduces *Śukra Dhātu* and easily eliminates *Viṭ* (stools) and *Mūtra* (urine).
- Among them *Madhura Vipāka* is *Guru* (heavy) and the rest of the two viz. *Kaṭu* and *Amla Vipāka* are *Laghu* (light).

Cakrapāṇi:

संप्रति विपाकलक्षणं हेतुव्युत्पादितं शुक्रहत्वादिविशेषयुक्तं वक्तुमाह- शुक्रहेत्यादि।– By starting the present verse with the word '*Śukrahā*' the author has discussed the action of *Kaṭu Vipāka* which reduces semen.

अतोऽन्यथेति लघुः।।– The term '*Ato Anyathā*' should be understood as that *Madhura Vipāka* is *Guru* and *Kaṭu* & *Amla Vipākās* are *Laghu*.

More Details about Vipāka [63]

विपाकलक्षणस्याल्पमध्यभूयिष्ठतां प्रति।
द्रव्याणां गुणवैशेष्यात्तत्र तत्रोपलक्षयेत्॥63॥

Alpa (less), *Madhya* (moderate) and *Bhūyiṣṭha* (excess) states of *Vipāka* can be assessed by the characteristics of a substance (*Dravya*).

Cakrapāṇi:

संप्रति यथोक्तविपाकलक्षणानां द्रव्यभेदे क्वचिदल्पत्वं क्वचिन्मध्यत्वं क्वचिच्चोत्कृष्टत्वं यथा भवति तदाह- विपाकेत्यादि।– Now the author is going to present the characteristics of *Vipāka* and the different states of *Vipāka* such as *Alpa* (less), *Madhya* (moderate) and *Utkṛṣṭa* (excess) according to the substance by starting the verse with the word '*Vipāka*'.

विपाकलक्षणस्याल्पमध्यभूयिष्ठतामुपलक्षयेत्, प्रति प्रति द्रव्याणां गुणवैशेष्याद्धेतोरित्यर्थः।– The category of *Vipāka* such as *Alpa* (less), *Madhya* (moderate) and *Bhūyiṣṭha* (excess) depends upon the properties of a substance.

एतेन, द्रव्येषु यद्गुणवैशेष्यं मधुरत्वमधुरतरत्वमधुरतमत्वादि, ततो हेतोर्विपाकानामल्पत्वादयो विशेषा भवन्तीत्युक्तं भवति।– In this way the peculiar qualities of a substance such as *Madhura*, *Madhura-tara* and *Madhura-tama* corresponds to *Alpa* (less), *Madhya* (moderate) and *Bhūyiṣṭha* (excess) states of *Vipāka*.

अत्र केचिद्ब्रुवते- प्रतिरसं पाको भवति, यथा मधुरादीनां षण्णां षण्मधुरादयः पाका इति; केचिद्ब्रुवते- बलवतां रसानामबलवन्तो रसा वशतां यान्ति, ततश्चानवस्थितः पाकः। तत्रैतद्द्वितयमपि पाके व्यवस्थाऽकरणमनादृत्य सुश्रुतेन द्विविधः पाको मधुरः कटुश्चाङ्गीकृतः।–

- Some scholars say that *Vipāka* is of six types according to each *Rasa* such as *Madhura*, *Amla* etc.
- Some other scholars opined that the *Vipāka* is based on each one of *Rasās*; the number of *Vipāka* cannot be fixed as the stronger *Rasa* suppresses the weaker one. Thus the nature is uncertain.
- Since these two opinions are creating confusion, *Suśruta* has denied them and has stated only two types of *Vipāka* i.e. *Madhura Vipāka* and *Kaṭu Vipāka*.

द्वैविध्यं च पञ्चभूतात्मके द्रव्ये गुरुभूतपृथिवीतोयातिरेकान्मधुरः पाको भवति, शेषलघुभूतातिरेकात्तु कटुकः पाको भवति;– Among all the substances which are predominantly having *Pṛthvī* and *Ap Mahābhūta* are going to be transformed into *Madhura Vipāka* and those substances predominantly having the dominancy of remaining *Mahābhūtās* such as *Tejas*, *Vāyu* and *Ākāśa* will be transformed into *Kaṭu Vipāka*.

यदुक्तं- "द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः।
निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥
तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु।
निर्वर्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते" (सु. सू. अ. 40) इति।– It is clearly quoted by *Suśruta* vide reference (Su. Sū. 40/11-12) that the substances having the dominance of the properties of *Pṛthvī* and *Ambu* are being digested and converted into *Madhura Vipāka*. On the other hand the substances having the dominance of the properties of *Tejas*, *Vāyu* and *Ākāśa* are being digested and converted into *Kaṭu Vipāka*.

प्रतिरसपाके तथाऽनवस्थितपाके च द्रव्यं रसगुणेनैव तुल्यं पाकावस्थायामपि भवति, तेन न कश्चिद्विशेषो विपाकेन तत्र बोध्यत इति सुश्रुतेन तत्पक्षद्वयमुपेक्षितमिति साधुकृतम्। तृतीयाम्लपाकनिरासस्तु दोषमावहति, यतो व्रीहिकुलत्थादीनामम्लपाकतया पित्तकर्तृत्वमुपलभ्यते;

- *Suśruta* has rightly denied the above cited two views i.e. Six types of *Vipāka* according to each *Rasa* and the uncertainty of *Vipāka* due to suppression of weaker one by the strong *Rasa*; because in both cases the drug or diet caries the properties of *Rasa* even in the stage of *Vipāka*.
- However the opinion of non-acceptance of *Amla Rasa* by *Suśruta* is incorrect, because *Vrīhi* and *Kulatthā* acts as *Pitta* aggravating substances only because of *Amla Vipāka*.

अथ मन्यसे- व्रीह्यादेरुष्णवीर्यत्वेन तत्र पित्तकर्तृत्वं; तन्न, मधुरस्य व्रीहेस्तन्मते मधुरविपाकस्योष्णवीर्यतायामपि सत्यां न पित्तकर्तृत्वमुपपद्यते, रसविपाकाभ्यामेकस्य वीर्यस्य बाधनीयत्वात्।

- If someone can argue that aggravation of *Pitta* may be due the *Uṣṇa Vīrya* of *Vrīhi*; but it is not acceptable because *Vrīhi* has *Madhura Rasa*, *Madhura Vipāka* and *Uṣṇa Vīrya*; and the *Vīrya* could be subdued by the combined effect *Rasa* and *Vipāka*.

किंच, अम्लपाकत्वाद्व्रीह्यादेः पित्तमम्लगुणमुत्पद्यते, यदि तु तदुष्णवीर्यताकृतं स्यात्तदा कटुगुणभूयिष्ठं पित्तं स्यात्; दृश्यते च व्रीहिभक्षणादम्लोद्गारादिनाऽम्लगुणभूयिष्ठतैवेति।

- Due to *Amla Vipāka* of *Vrīhi* the *Pitta* aggravates, and *Pitta* has more of *Amla Guṇa*. If *Uṣṇa Vīrya* had been caused for the aggravation of *Pitta*, then the *Pitta* should have more of *Kaṭu Guṇa*; but which is not seen in practice. Because by the consumption of *Vrīhi*, the person gets

sour eructation and it clearly suggests the increase of more *Amla Guṇa* of *Pitta*.

किंच, पृथिवीसोमगुणातिरेकान्मधुरः पाको भवति, वाय्वग्न्याकाशातिरेकाच्च कटुर्भवतीति पक्षे यदा व्यामिश्रगुणातिरेकता भवति तदा सोमाग्न्यात्मकस्याम्लस्योत्पादः कथं प्रतिक्षेपणीयः।

- Other than this it is also cited that due to the dominance of *Pṛthvī* and *Soma Guṇa* it is going to transform into *Madhura Vipāka* and due to the dominance of *Vāyu*, *Agni* and *Ākāśa* it is going to transform into *Kaṭu Vipāka*.
- In such circumstances what is the objection in accepting the existence of *Amla Vipāka* which might have been formed due to the predominance of combination of both the groups of *Mahābhūtās*?

अथवा, तन्त्रकारयोः किमनयोरनेन वचनमात्रविरोधेन कर्तव्यं; यतो यदम्लपाकं चरको ब्रूते, तत् सुश्रुतेन वीर्योष्णमिति कृत्वा समाधीयते; तेन न कश्चिद्द्रव्यगुणे विरोधः।

- In fact there is no difference of opinion among *Caraka* and *Suśruta*. *Ācārya Caraka* has stated that *Vrīhi Dhānya* aggravates *Pitta* due to its *Amla Vipāka;* whereas *Suśruta* says that the aggravation of *Pitta* is happened due to its *Uṣṇa Vīrya*. Thus everyone gets the answer with the explanation of both the scholars by the end result of the action of drug.

यत्तु सुश्रुतेऽम्लपाकनिरासार्थं दूषणमुच्यते "पित्तं हि विदग्धमम्लतामुपैति" (सु. सू. अ. 40) इत्यादिना, तदनभ्युपगमादेव निरस्तम्।

- *Ācārya Suśruta* has said in the context of rejecting *Amla Vipāka* that "*Pitta* becomes *Amla* when it is not having proper digestion" (Su. Sū. 40/10). But this is not acceptable.

ननु, लवणस्य मधुरपाकित्वे पित्तरक्तादिकर्तृत्वमनुपपन्नं, तथा तिक्तकषाययोः कटुपाकित्वे पित्तहन्तृत्वमनुपपन्नं?

- It may be argued that when *Lavaṇa Rasa* is having *Madhura Vipāka* and how can be explained the action of aggravation of *Pitta* and *Rakta*?
- Similarly how could be the drugs of *Tikta*, *Kaṣāya Rasa* and *Kaṭu Vipāka* pacifies *Pitta*?

नैवं, सत्यपि लवणस्य मधुरपाकित्वे तत्र लवणरस उष्णं च वीर्यं यदस्ति तेन तत् पित्तरक्तादिकारकं, विपाकस्तु तत्र पित्तरक्तहरणलक्षणे कार्ये बाधितः सन् 'सृष्टविण्मूत्र' इत्यादिना लक्षणेन लक्ष्यत एव। एतेन यदुच्यते- लवणे मधुरो विपाकश्चेद्रसवीर्याभ्यां बाधितः सन् स्वकार्यकरो न भवति तत् किं तेनोपदिष्टेनेति, तन्निरस्तं भवति। यतोऽस्त्येव सृष्टविण्मूत्रतादिना तत्र लवणे मधुरविपाकित्वं लक्षणीयम्।

- Even though *Lavaṇa Rasa* is having *Madhura Vipāka*, it aggravates *Pitta* and *Rakta* due to its *Uṣṇa Vīrya*. Thus the *Vipāka* is subdued by *Vīrya*. The effect of *Vipāka* of *Lavaṇa Rasa* is seen as laxative and diuretic action.
- That's why the *Madhura Vipāka* of *Lavaṇa* is subdued by its *Rasa* and *Vīrya* thus becomes inactive in exerting its effect, it shows its effect as laxative and diuretic.

अनया दिशा तिक्तकषाययोरपि पूर्वपक्षपरिहारः।- In the similar fashion the effects of the *Tikta*, *Kaṣāya Rasās* also can be understood.

अन्ये त्वेतद्दोषभयाल्लवणोऽप्यम्लं पच्यत इति व्याख्यानयन्ति, लवणस्तथेत्यत्र तथाशब्देन विप्रकृष्टस्याम्लमित्यस्य कर्षणादिति।- Fearing this error, others have argued that *Pāka* of *Lavaṇa* is also *Amla* with the help of the word '*Tathā*', and that it is connected with '*Amlam*', i.e. to accept *Lavaṇā's Amla Pāka*.

तत्र, "कट्वादीनां कटुर्विपाकोऽम्लोऽम्लस्य शेषयोर्मधुरः"- इति जतूकर्णवचनात्।- But it should not be happened like so. In this context *Jatūkarṇa* has clearly mentioned that the substances having *Kaṭu*, *Tikta* and *Kaṣāya Rasās* are going to be transformed into *Kaṭu Vipāka; Amla Dravyās* into *Amla Vipāka* and *Madhura* & *Lavaṇa Rasa Dravyās* into *Madhura Vipāka*.

नच वाच्यं, कस्मात्त्रय एव विपाका भवन्ति न पुनस्तिक्तादयोऽपीति; यतो भूतस्वभाव एवैषः, येन मधुरादयस्त्रय एव भवन्ति, भूतस्वभावाश्चापर्यनुयोज्याः।- Nobody should be questioned why there are only 3 types of *Vipāka* and not more than that like *Tikta*, *Kaṣāya* etc. These 3 types of *Vipāka* are due to specific nature of *Bhūtās* and hence it is unquestionable.

ननु, यश्च रसविपरीतः पाको यथा- लवणस्य मधुरः, तिक्तकषाययोश्च कटुः, स उच्यतां; यस्तु समानगुणो मधुरस्य मधुरोऽम्लस्याम्लः कटुकस्य वा कटुकः, तत्कथने किं प्रयोजनं? यतो रसगुणैरेव तत्र विपाकगुणोऽपि ज्ञास्यते।

- Now the doubt arises that how dissimilar *Pākā* of *Rasa* such as *Madhura Vipāka* of *Lavaṇa Rasa*' *Kaṭu Vipāka* of *Tikta* & *Kaṣāya Rasās* are accepted?
- If *Madhura Vipāka* of *Madhura Rasa; Amla Vipāka* of *Amla Rasa* and *Kaṭu Vipāka* of *Kaṭu Rasa* is accepted what is the sense of describing *Vipāka*? It is because of the properties or action of *Vipāka* also can be known only through *Rasa* and *Guṇa*.

नैवं, येन लवणादिवद्विसदृशरसान्तरोत्पादशङ्कानिरासार्थमपि तत्रानुगुणोऽपि विपाको वक्तव्य एव; विपाकजश्च रस आहारपरिणामान्ते भवति, प्राकृतस्तु रसो विपाकविरुद्धः परिणामकालं वर्जयित्वा ज्ञेयः; तेन पिप्पल्याः कटुकरसत्वमादौ कण्ठस्थश्लेष्मक्षपणमुखशोधनादिकर्तृत्वेन सप्रयोजनं, मधुरविपाकत्वं तु परिणामेन वृष्यत्वादिज्ञापनेन सप्रयोजनम्।

- But it is not so. To explain the *Vipāka* of dissimilar *Rasa* i.e. *Madhura Vipāka* of *Lavaṇa Rasa* it is imperative to explain *Vipāka* because the site of action both *Rasa* and *Vipāka* are different.
- The *Rasa* starts its action immediately it comes in contact with the body until the completion of digestion; while *Vipāka* comes into action after that.
- For example: The drug *Pippalī* due to *Kaṭu Rasa* and in the beginning it acts as to decrease the mucous present in the throat as well as cleansing the mouth. After getting digestion *Pippalī* is transformed into *Madhura Vipāka* and then it acts as aphrodisiac etc.

तथा, यत्र विपाकस्य रसाः समानगुणतयाऽनुगुणा भवन्ति तत्र बलवत् कार्यं भवति, विपर्यये तु दुर्बलमिति ज्ञेयम्।

- Wherever the *Rasa* and *Vipāka* are similar the effect becomes stronger and is less in case of their dissimilarity.

एतच्च पाकत्रयं द्रव्यनियतं, तेन ग्रहण्यध्याये वक्ष्यमाणाहारावस्थापाकाद्भिन्नमेव; तत्र ह्यविशेषेण सर्वेषामेव रसानामवस्थावशात्त्रयः पाका वाच्याः: "अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः:" (चि. अ. 15) इत्यादिना ग्रन्थेन।।

- So these 3 types of *Vipākās* of the substances are stable.
- These are different from the three types of *Avasthā Pākās* described in the chapter *Grahaṇī Adhyāya*.
- In the chapter *Grāhaṇī* the 3 types of *Avasthā Pākās* of all the *Rasās* of drug and diet is described.
- It is told that the ingested food of all the six tastes by digestion produces three *Rasās* viz. *Madhura*, *Amla* and *Kaṭu* stage wise (Ca. Ci.15/9) and which is different from the *Vipāka* which we are discussing

in the present chapter.

Vīrya Bheda & Lakṣaṇa [64-65]

मृदुतीक्ष्णगुरुलघुस्निग्धरूक्षोष्णशीतलम् ।
वीर्यमष्टविधं केचित्, केचिद्द्विविधमास्थिताः ॥64॥
शीतोष्णमिति, वीर्यं तु क्रियते येन या क्रिया।
नावीर्यं कुरुते किंचित् सर्वा वीर्यकृता क्रिया॥65॥

- Some scholars opined that *Vīrya* (potency) is of 8 types viz. *Mṛdu*, *Tīkṣṇa*, *Guru*, *Laghu*, *Snigdha*, *Rūkṣa*, *Uṣṇa* and *Śīta*.
- According to some others *Vīrya* is of 2 types viz. *Śīta Vīrya* and *Uṣṇa Vīrya*.
- *Vīrya* is the one which performs the action. There will be no action without *Vīrya* and all the actions will be done only through *Vīrya*.



Cakrapāṇi:

एकीयमतेन वीर्यलक्षणमाह- मृद्वित्यादि।- By starting the above verse with the word '*Mṛdu*', the author has tried to present the features of *Vīrya* according to the opinion of some other scholars.

एतच्चैकीयमतद्वयं पारिभाषिकीं वीर्यसंज्ञां पुरस्कृत्य प्रवृत्तम्।- The two different opinions of the scholars are considered here by taking the term *Vīrya* in the technical sense.

वैद्यके हि रसविपाकप्रभावव्यतिरिक्ते प्रभूतकार्यकारिणी गुणे वीर्यमति संज्ञा, तेनाष्टविधवीर्यवादिमते पिच्छिलविशदादयो गुणा न रसादिविपरीतं कार्यं प्रायः कुर्वन्ति, तेन तेषां रसाद्युपदेशेनैव ग्रहणं; मृद्वादीनां तु रसाद्यभिभावकत्वमस्ति, यथा- पिप्पल्यां कटुरसकार्यं पित्तकोपनमभिभूय तद्गते मृदुशीतवीर्ये पित्तमेव शमयत इति, तथा कषाये तिक्तानुरसे महति पञ्चमूले तत्कार्यं वातकोपनमभिभूयोष्णेन वीर्येण तद्विरुद्धं वातशमनमेव क्रियते, तथा मधुरेऽपीक्षौ शीतवीर्यत्वेन वातवृद्धिरित्यादि।- According medical science the factor which is having predominant action apart from *Rasa*, *Vipāka* and *Prabhāva* is known as *Vīrya*.

- Based on this definition, the followers of *Aṣṭa Vidha Vīrya Vāda* opine that *Picchila* and *Viśada* should be considered under *Rasa* itself because they do not perform any action.
- On the other hand *Mṛdu* and the other eight *Guṇās* perform actions overpowering *Rasa* etc. For example:
- In general *Kaṭu Rasa* of *Pippalī* should aggravate *Pitta*. But it overcomes the effect of *Kaṭu Rasa* by the action of *Mṛdu* and *Śīta Vīrya*, so that it pacifies *Pitta*.
- *Bṛhat Pañcamūla* should aggravate *Vāta* due to *Kaṣāya* and *Tikta Rasa*. But due to *Uṣṇa Vīrya* it mitigates *Vāta* by overcoming the effect of *Rasa*.
- Even though *Ikṣu* has possessing *Madhura Rasa*, it aggravates *Vāta* due to its *Śīta Vīrya*.

यदुक्तं सुश्रुते- "एतानि खलु वीर्याणि स्वबलगुणोत्कर्षाद्रसमभिभूयात्मकर्म दर्शयन्ति" (सु. सू. अ. 40) इत्यादि।- *Suśruta* has said that "The *Vīrya* performs its actions due to their own strength by overpowering the effect of *Rasās*" (Su. Sū. 40/5).

शीतोष्णवीर्यवादिमतं त्वग्नीषोमीयत्वाज्जगतः शीतोष्णयोरेव प्राधान्याज्ज्ञेयम्।- The believers of *Dvividha Vīrya Vāda* argues that only *Agni* and *Soma* are the predominant qualities in the world and hence the *Vīrya* is also only of two types viz. *Uṣṇa Vīrya* and *Śīta Vīrya*.

उक्तं च "नानाऽऽत्मकमपि द्रव्यमग्नीषोमौ महाबलौ। व्यक्ताव्यक्तं जगदिव नातिक्रामति जातुचित्" (वा. सू. अ. 9) इति।- It is also said by *Vāgbhaṭa* that even if all the substances are formed out of *Pañcamahābhūtās*, the dominancy of *Agni* and *Soma* is seen in them. The form of *Agni* and *Soma* exists in the world either in *Vyakta* or in *Avyakta Rūpa* and never transgresses the world similar to all the substances which never transgresses *Agni* and *Soma* (A.S. Sū. 9/17).

एतच्च मतद्वयमप्याचार्यस्य परिभाषासिद्धमनुमतमेव, येनोत्तरत्र "रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते" इत्यादौ पारिभाषिकमेव वीर्यं निर्देक्ष्यति।- As these two opinions are being technically proven, it is acceptable by the author of this treatise. Thus the statements mentioned subsequently which are related to *Rasa*, *Vīrya*, *Vipāka* appear to be similar. Here the term *Vipāka* is used in technical sense.

पारिभाषिकवीर्यसंज्ञापरित्यागेन तु शक्तिपर्यायस्य वीर्यस्य लक्षणमाह- वीर्यं त्वित्यादि। वीर्यमिति शक्तिः।- Apart from the technical meaning, *Vīrya* also means *Śakti*. It is the synonym.

येनेति रसेन वा विपाकेन वा प्रभावेण वा गुर्वादिपरादिभिर्वा गुणैर्या क्रिया तर्पणह्लादनशमनादिरूपा क्रियते, तस्यां क्रियायां तद् रसादि वीर्यम्।- '*Vīrya*' means the power and through either *Rasa*, *Vipāka*, *Prabhāva* or *Gurvādi* / *Parādi Guṇa* etc. which is the cause of actions such as *Tarpaṇa* (satiating), *Hlādana* (pleasing), *Śamana* (mitigating) etc.

अत एवोक्तं सुश्रुते- "येन कुर्वन्ति तद्वीर्यम्" (सु. सू. अ. 40) इति। अत्रैव लोकप्रसिद्धामुपपत्तिमाह- नावीर्यमित्यादि। अवीर्यम् अशक्तमित्यर्थः। वीर्यकृतेति वीर्यवता कृता बीर्यकृता।- That's why *Suśruta* quoted that "By which they act is *Vīrya*" (Su.Sū.40/5). In the present context the worldly phrase is also mentioned that no action is done without strength. *Avīrya* means powerless. *Vīryakṛtā* means all the actions will be done by the strength only.

Determination of Rasa, Vipāka and Vīrya [66]

रसो निपाते द्रव्याणां, विपाकः कर्मनिष्ठया।
वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते॥66॥

- *Rasa* (taste) can be determined immediately when a substance comes in contact with the tongue.
- *Vipāka* (taste after digestion) can be assessed by the action.
- *Vīrya* (potency) can be determined while in association with the body and or even immediately after coming in contact with the body.

Cakrapāṇi:

रसादीनामेकद्रव्यनिविष्टानां भेदेन ज्ञानार्थं लक्षणमाह- रसो निपात इत्यादि।- By starting the verse with the word '*Raso Nipāte*', the author has tried to explain the characteristics of *Rasa*, *Vipāka* and *Vīrya* individually which exists in a substance.

निपात इति रसनायोगे।- '*Nipāta*' means immediately when it comes in contact with the tongue.

कर्मनिष्ठयेति कर्मणो निष्ठा निष्पत्तिः कर्मनिष्ठा क्रियापरिसमाप्तिः, रसोपयोगे सति योऽन्त्याहारपरिणामकृतः कर्मविशेषः कफशुक्राभिवृद्ध्यादिलक्षणः, तेन विपाको निश्चीयते।- '*Karma Niṣṭhayā*' means by the end of action. The end result of the taste of a substance after the digestion is known as *Vipāka*. By the observation of increase of *Kapha* and *Śukra* also, it can be assessed the *Vipāka* of that particular substance.

अधीवासः सहावस्थानं, यावदधीवासादिति यावच्छरीरनिवासात्; एतच्च विपाकात् पूर्वं निपाताच्चोर्ध्वं

ज्ञेयम्- '*Adhīvāsa*' means till it stays inside the body. This *Vīrya* can be understood before its transformation into *Vipāka* and after contacting the substance with the tongue.

निपाताच्चेति शरीरसंयोगमात्रात्; तेन यथा- किंचिद्वीर्यमधीवासादुपलभ्यते, आनूपमांसादेरुष्णत्वं; किंचिच्च निपातादेव लभ्यते, यथा- मरीचादीनां तीक्ष्णत्वादि; किंचिच्च निपाताधीवासाभ्यां, यथा- मरीचादीनामेव।

- '*Nipātācca*' means simply by contact of the substance with the body.
- The *Vīrya* of certain substances can be understood due to the stay of the substance inside the body. For example: *Uṣṇa Vīrya* of the meat of marshy animals.
- The *Vīrya* of certain substances can be perceived simply by the contact of the substance with the tongue. For example: the *Tīkṣṇatva* of *Marica*.
- In certain substances the *Vīrya* can be understood by means of both by *Nipāta* as well as *Adhīvāsa*. Example: *Marica* etc.

एतेन रसः प्रत्यक्षेणैव; विपाकस्तु नित्यपरोक्षः, तत्कार्येणानुमीयते; वीर्यं तु किंचिदनुमानेन, यथा- सैन्धवगतं शैत्यमानूपमांसगतं वा औष्ण्यं, किंचिच्च वीर्यं प्रत्यक्षेणैव, यथा- राजिकागतं तैक्ष्ण्यं घ्राणेन, पिच्छिलविशदस्निग्धरूक्षादयः चक्षुःस्पर्शनाभ्यां निश्चीयन्त इति वाक्यार्थः।- Among these *Rasa* can be perceived directly. *Vipāka* is always being known indirectly and hence it should be inferred; whereas the *Vīrya* of a substance can be known at certain places by inference. For example: *Śīta Vīrya* of rock salt and *Uṣṇa Vīrya* of the meat of marshy animals. At times the *Vīrya* of certain substances can be known directly. For example: The sharpness of *Rājikā* by olfactory perception. *Picchila* (sliminess), *Viśada* (non-sliminess); *Snigdha* (unctuousness) and *Rūkṣa* (dryness) etc. can be perceived by vision or touch.

एतच्च वीर्यं सहजं कृत्रिमं च ज्ञेयम्। एतच्च यथासंभवं गुरुलघ्वादिषु वीर्येषु लक्षणं ज्ञेयम्।- '*Vīrya*' is said to be natural as well as artificial. In this way the features of *Guru* and *Laghu Vīrya* also should be understood.

द्रव्याणामिति उपयुज्यमानद्रव्याणाम्। एतच्च वीर्यलक्षणं पारिभाषिकवीर्यविषयमेव।- The word '*Dravya*' refers to useful drugs. The characteristics of *Vīrya* mentioned here are in relation to its definition.

Lakṣaṇa of Prabhāva [67]

रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते।
विशेषः कर्मणां चैव प्रभावस्तस्य स स्मृतः॥67॥

In the case of two substances, despite being similar in their *Rasa*, *Vīrya* and *Vipāka* and if there is a difference in action, then it should be understood that this is due to *Prabhāva* (specific action).



Cakrapāṇi:

प्रभावलक्षणमाह- रसवीर्येत्यादि।- The author has presented the characteristics of *Prabhāva* by starting present verse with the word '*Rasa Vīrya*'.

सामान्यमिति तुल्यता।- '*Sāmānyaṃ*' means *Tulyatā* i.e. equivalency.

विशेषः कर्मणामिति दन्त्याद्याश्रयाणां विरेचनत्वादीनाम्।- '*Viśeṣaḥ Karmaṇāṃ*' means the purgative action of *Dantī* and the other substances.

सामान्यं लक्ष्यत इत्यनेन रसादिकार्यत्वेन यत्रावधारयितुं शक्यते कार्यं तत् प्रभावकृतमिति सूचयति,- '*Sāmānyaṃ Lakṣyate*' means that the action of the drug which cannot be known on the basis of their *Rasa*, *Vīrya*, *Vipāka* etc. and it is understood as specific action or *Prabhāva*.

अत एवोक्तम्- प्रभावोऽचिन्त्य उच्यते; रसवीर्यविपाककार्यतयाऽचिन्त्य इत्यर्थः।- Thus *Prabhāva* is said to be unable to imagine. Such drugs are acting differently and not in accordance with their *Rasa*, *Vīrya*, *Vipāka* etc.

More Details about Prabhāva with Examples [68]

कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः।
तद्वद्दन्ती प्रभावात्तु विरेचयति मानवम् ॥68॥
विषं विषघ्नमुक्तं यत् प्रभावस्तत्र कारणम्।
ऊर्ध्वानुलोमिकं यच्च तत् प्रभावप्रभावितम्॥69॥
मणीनां धारणीयानां कर्म यद्विविधात्मकम्।
तत् प्रभावकृतं तेषां प्रभावोऽचिन्त्य उच्यते ॥70॥
सम्यग्विपाकवीर्याणि प्रभावश्चाप्युदाहृतः।

- Even though both *Citraka* and *Dantī* are having *Kaṭu Rasa*, *Kaṭu Vipāka* and *Uṣṇa Vīrya*, *Dantī* acts as purgative but *Citraka* doesn't. The purgative action of *Dantī* is due to its *Prabhāva*.
- Similarly *Viṣa* acts as antitoxic due to its *Prabhāva*.
- In the same way emetics and purgative drugs also acts accordingly due to their *Prabhāva*.
- The effect of wearing precious gems and amulets can also be understood in the similar fashion.
- Hence the effect of specific action (*Prabhāva*) is unimaginable.
- Thus *Vipāka*, *Vīrya* and *Prabhāva* are explained in detail along with examples.

The Action of the Drug According to the Dominance of its Active Principles [71-72]

किंचिद्रसेन कुरुते कर्म वीर्येण चापरम्॥71॥
द्रव्यं गुणेन पाकेन प्रभावेण च किंचन।
रसं विपाकस्तौ वीर्यं प्रभावस्तानपोहति॥72॥
बलसाम्ये रसादीनामिति नैसर्गिकं बलम्।

- Certain drugs exhibit their action by means of their *Rasa* (taste), some on the basis of their *Vīrya* (potency) or other qualities, some by *Vipāka* and others by *Prabhāva*.
- When *Rasa*, *Vipāka*, *Vīrya* and *Prabhāva* are all in equal strength, *Rasa* is subdued by *Vipāka*; both *Rasa* and *Vipāka* are subdued by *Vīrya* and *Prabhāva* supersedes all of them. This is the natural order of strength.

Cakrapāṇi:

अस्यैव दुरभिगमत्वादुदाहरणानि बहून्याह- कटुक इत्यादिना।- As it is difficult to understand the nature of *Prabhāva*, the author has given many a number of examples by starting the verse with the word '*Kaṭukaḥ*'.

तद्वदिति चित्रकसमानगुणा।- '*Tadvat*' means *Dantī* is similar to *Citraka* in its attributes and both having *Kaṭu Rasa*, *Kaṭu Vipāka* and *Uṣṇa Vīrya*; but due to its specific action *Dantī* acts as purgative, whereas *Citraka* did not.

विषघ्नमुक्तमिति "तस्माद्दंष्ट्राविषं मौलं" (चि. अ. 23) इत्यादिना।- '*Viṣaṃ Viṣaghnamuktaṃ*' means *Viṣa* acts as *Viṣaghna* (anti-toxic) due to its *Prabhāva*. It is clearly mentioned in the 23rd

chapter of Cikitsāsthāna that 'Daṃṣtrā Viṣam Maulam'. That means Jaṅgama Viṣa acts as anti-toxic for Sthāvara Viṣa similarly Sthāvara Viṣa is the antidote for Jaṅgama Viṣa.

ऊर्ध्वानुलोमिकमिति युगपदुभयभागहरं, किंवा ऊर्ध्वहरं तथाऽनुलोमहरं च।- '*Ūrdhvānulomikaṃ*' means elimination of *Doṣās* through both the upper and lower routes at a time (or) expulsion of *Doṣās* through mouth and also through anus separately.

कर्म यद्विविधात्मकमिति विषहरणशूलहरणादि।- '*Karma Yad Vividhātmakam*' means by wearing precious gems it acts in many ways such as *Viṣahara* (anti-toxic), *Śūla hara* (antispasmodic) etc.

एतच्चोदाहरणमात्रं, तेन जीवनमेध्यादिद्रव्यस्य रसाद्यचिन्त्यं सर्वं 'प्रभाव' इति ज्ञेयम्।- The purgative action of *Dantī*, anti-toxic effect of poisonous substances and different actions of precious gems are mentioned here only for the sake of example. Apart from this all other effects such as *Jīvanīya*, *Medhya* etc. which cannot be explained or understood on the basis of their *Rasa*, *Guṇa*, *Vīrya* etc. and should be known due to their *Prabhāva*.

प्रभावश्चेह द्रव्यशक्तिरभिप्रेता, सा च द्रव्याणां सामान्यविशेषः दन्तीत्वादियुक्ता व्यक्तिरेव, यतः शक्तिर्हि स्वरूपमेव भावानां, नातिरिक्तं किंचिद्धर्मान्तरम्; एवं प्रदेशान्तरोक्तगुणप्रभावादिष्वपि वाच्यम्; यथोक्तं- 'द्रव्याणि हि द्रव्यप्रभावाद्गुणप्रभावात्' इत्यादि।- Here *Prabhāva* is considered as the power of a substance and which is the specific characteristic feature of the substance. It can be exhibited in certain substances like *Dantī*, because the power is its own specific nature and not any other character. In the similar fashion, the *Guṇa Prabhāva* described at other places also should be understood. As it is told that "The substances exert their effect by means of *Dravya Prabhāva* and or by *Guṇa Prabhāva*".

न च वाच्यं दन्त्यादिः स्वरूपत एव विरेचयति, तेन किमिति जलाद्युपहता दन्ती न विरेचयतीति; प्रतिबन्धकाभावविशिष्टस्यैव प्रभावस्य कारणत्वात्, जलोपहतायां दन्त्यां जलोपघातः प्रतिबन्धक इत्याद्यनुसरणीयम्।- Thus it should not be said that '*Dantī*' causes purgation by its nature; then why *Dantī* is not going to be a purgative in the absence of water content? The drug acts or exhibits its specific action only in the absence of inhibiting factors. Thus it should be understood as *Jalopaghāta* acts as inhibiting factor in *Dantī*, and hence it cannot perform the purgative action.

नैयायिकशक्तिवादे या च विषस्य विषघ्नत्वे उपपत्तिरुक्ता ऊर्ध्वाधोगामित्वविरोधलक्षणा साऽन्तर्भागत्वात् प्रभावादेव भवति। एवमूर्ध्वानुलोमिकत्वादौ पार्थिवत्वादिकथनेऽपि वाच्यम्।- According to the *Śakti Vāda* of *Naiyāyika*; the anti-poisonous effect of *Viṣa* is described on the basis of their upward and downward movements of two types of poisons as both are antagonistic each other. This specific action comes under *Prabhāva*. The rationality in the movement of upward as well as downward direction may be the predominance of *Vāyu Mahābhūta* and *Pṛthvī Mahābhūta* respectively.

Explication of Madhura Rasa [73-74]

षण्णां रसानां विज्ञानमुपदेक्ष्याम्यतः परम्॥७३॥

Now it is being told about the characteristics of all the six *Rasās*.

स्नेहनप्रीणनाह्लादमार्दवैरुपलभ्यते ।
मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च॥७४॥

Madhura Rasa (sweetness) can be determined by the following features:

- Unctuousness (*Snehana*).
- Pleasing (*Prīṇana*).
- Refreshing (*Hlādana*).

- Softness (*Mārdava*).
- By keeping it in the mouth it spreads the entire mouth (*Āsyam Vyāpnuṃ*) and as if it makes a coating there on (*Limpati iva*).

Explication of Amla Rasa [75]

दन्तहर्षान्मुखास्रावात् स्वेदनान्मुखबोधनात्।
विदाहाच्चास्यकण्ठस्य प्राश्यैवाम्लं रसं वदेत्॥७५॥

Amla Rasa (sourness) can be determined by the following features:

- Hyperesthesia of teeth (*Dantaharṣa*).
- Salivation (*Mukha-srāva*).
- Sweating (*Svedana*).
- Clarity of mouth (*Mukha bodhanāt*).
- Burning sensation in the mouth and throat (*Āsya Kaṇṭha Vidāha*).

Explication of Lavaṇa Rasa [76]

प्रलीयन् क्लेदविष्यन्दमार्दवं कुरुते मुखे।
यः शीघ्रं लवणो ज्ञेयः स विदाहान्मुखस्य च॥७६॥

Lavaṇa Rasa (salty taste) can be determined by the following features:

1. It dissolves quickly (*Śīghraṃ Pralīyan*) and produces.
2. Moisture (*Kleda*).
3. Dripping liquid state (*Viṣyandana*)
4. Softness (*Mārdava*).
5. Burning sensation in the mouth (*Mukha Vidāha*).

Explication of Kaṭu Rasa [77]

संवेजयेद्यो रसानां निपाते तुदतीव च।
विदहन्मुखनासाक्षि संस्रावी स कटुः स्मृतः॥७७॥

Kaṭu Rasa (pungent taste) can be determined by the following features:

- Irritation in the tongue (*Saṃvejayati*).
- Pricking pain in the tongue (*Tudati*).
- Due to burning sensation (*Vidāha*) it causes watering in the mouth, nose and eyes (*Mukha-Nasā-Akṣi Srāva*).

Explication of Tikta Rasa [78]

प्रतिहन्ति निपाते यो रसनं स्वदते न च।
स तिक्तो मुखवैशद्यशोषप्रह्लादकारकः ॥७८॥

Tikta Rasa (bitter taste) can be determined by the following features:

- Reduces the taste perception (*Rasānāṃ Pratihanti*).
- Not delicious (*Na Svādate*).
- Produces freshness in the mouth (*Mukha Vaiśadya*), dryness of the mouth (*Śoṣā*) and delightfulness (*Prahlāda*).

Explication of Kaṣāya Rasa [79]

वैशद्यस्तम्भजाड्यैर्यो रसनं योजयेद्रसः।
बध्नातीव च यः कण्ठं कषायः स विकास्यपि॥७९॥

Kaṣāya Rasa (astringent taste) can be determined by the following features:

- Clearness of the tongue (*Vaiśadya*).
- Stiffness of the tongue (*Stambha*).
- Senselessness of the tongue (*Jāḍyāt*).
- Obstructs the throat (*Kaṇṭhaṃ Badhnāti*).

Cakrapāṇi:

विज्ञायतेऽनेनेति विज्ञानं लक्षणमित्यर्थः।- '*Vijñāna*' is

the one through which the accurate knowledge is obtained.

प्रलीयन्निति विलीनो भवन्।- '*Pralīyan*' means to become dissolved.

संस्रावयतीति संस्रावी।- '*Saṃsrāvayati*' means that which flows together.

विकासीति हृदयविकसनशीलः; उक्तं हि सुश्रुते- "हृदयं पीडयति" (सु. सू. अ. 42) इति।।- '*Vikāsī*' means that which causes the dilatation of the heart; it is also said in *Suśruta* that, which causes pain in the heart or compression in the chest region. (Su. Sū. 42/10).

Query of Agniveśa related to Incompatible Drugs & Diet [80]

एवमुक्तवन्तं भगवन्तमात्रेयमग्निवेश उवाच- भगवन्! श्रुतमेतदवितथमर्थसंपद्युक्तं भगवतो यथावद्द्रव्यगुणकर्माधिकारे वचः, परं त्वाहारविकाराणां वैरोधिकानां लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति॥80॥

Having listened to expositions given Lord *Ātreya* regarding *Dravya, Guṇa, Karma* etc.; *Agniveśa* asked the teacher to explain the details about the incompatible food items neither too briefly nor elaborately.

Cakrapāṇi:

संप्रति विरुद्धाहारं वक्तुमाह- एवमित्यादि।- Now the author is going to present details about '*Viruddhāhāra*' by starting the verse with the word '*Evam*'.

शरीरधातुविरोधं कुर्वन्तीति वैरोधिकाः, लक्ष्यते वैरोधिकमनेनेति लक्षणंवैरोधिकाभिधायको ग्रन्थ एव। 'यत् किंचिद्दोषमास्राव्य' इत्यादि वैरोधिकलक्षणं ज्ञेयम्।- '*Vairodhika*' means that which causes antagonism to the tissues. The characteristics by which antagonism is identified which can be considered as the definition of contradictory substances. The main feature of antagonistic substance is that which can be able to eliminate partial vitiation of *Doṣās* but not the entirety.

Reply by Bhagavān Ātreya [81]

Definition of Viruddhāhāra (Incompatible Food):

तमुवाच भगवानात्रेयः- देहधातुप्रत्यनीकभूतानि द्रव्याणि देहधातुभिर्विरोधमापद्यन्ते; परस्परगुणविरुद्धानि कानिचित्, कानिचित् संयोगात्, संस्कारादपराणि, देशकालमात्रादिभिश्चापराणि, तथा स्वभावादपराणि॥81॥

Lord *Ātreya* replied as mentioned under:

- The substances which are unwholesome to normal *Dhātūs* (tissue elements) and *Doṣās* are known as *Viruddhāhāra*. In fact those substances oppose the proper growth and development of body tissues.
- *Viruddhāhāra* is of several types viz.
- *Guṇa Viruddha* (incompatibility due to mutual contradictory qualities).
- *Saṃyoga Viruddha* (incompatibility due to combination).
- *Saṃskāra Viruddha* (incompatibility due to method of preparation or processing).
- *Deśa Viruddha* (incompatibility due to habitat)
- *Kāla Viruddha* (incompatibility due to time).
- *Mātrā Viruddha* (incompatibility due to dosage).
- *Svabhāva Viruddha* (incompatibility by their inherent nature).

Cakrapāṇi:

देहधातुप्रत्यनीकभूतानीति देहधातूनां रसादीनां वातादीनां च प्रकृतिस्थानां प्रत्यनीकस्वरूपाणि।- '*Deha Dhātu Pratyanīkabhūtāni*' means that those substances which are antagonists not only to the bodily tissues like *Rasa, Rakta* etc. but also to the normal state of *Doṣās* like *Vāta, Pitta* and *Kapha*.

विरोधमापद्यन्त इति देहधातूनां विरोधमाचरन्ति, दूषयन्तीति यावत्।- '*Virodhamāpadyanta*' means that which acts as an opponent or is being contaminated the bodily components.

यथाभूतानि द्रव्याणि देहधातुभिर्विरोधमापद्यन्ते तदाह- परस्परविरुद्धानि कानिचिदित्यादि।- The type of substances which acts as antagonists to the bodily components is called mutually contradictory; and which are seen only in certain substances.

तत्र परस्परगुणविरुद्धानि यथा- "न मत्स्यान् पयसाऽभ्यवहरेत्, उभयं ह्येतत्" इत्यादिनोक्तानि।- *Paraspara Guṇa Viruddha*: For example: Fish should not be taken along with milk because the properties of both the substances are mutually contradictory.

संयोगविरुद्धं यथा-"तदेव निकुचं पक्वं न माष" इत्यादि नोक्तं;- *Saṃyoga Viruddha*: For example: The ripen fruit of *Nikuca* should not be taken along with the soup of *Māṣa* because of their combination is mutually contradictory.

यत् संस्कारादिविरुद्धगुणकथनं विना साहित्यमात्रेण विरुद्धमुच्यते, तत् संयोगविरुद्धम्। मत्स्यपयसोस्तु यद्यपि सहोपयोगो विरुद्धत्वेनोक्तः, तथाऽप्यसौ गुणविरुद्धत्वे कथित इति गुणविरोधकस्यैवोदाहरणम्।- This sort of antagonism is without any processing, but just due to combination and it is known as *Saṃyoga Viruddha*. Even if fish and milk taken together are not harmful simply by their combination, but their properties are mutually contradictory and hence such a combination has been shown as an example for *Guṇa Viruddha*.

विरोधश्च विरुद्धगुणत्वे सत्यपि क्वचिदेव द्रव्यप्रभावाद्भवति; तेन षड्रसाहारोपयोगे मधुराम्लयोर्विरुद्धशीतोष्णवीर्ययोर्विरोधो नोद्भावनीयः।- This antagonism is sometimes seen due to the properties of the substances and in other places it is due the efficacy of the substances. However this analogy is not understandable during usage of the substances having *Madhura* and *Amla Rasa* as well as the drugs belongs to *Śīta* and *Uṣṇa Vīrya*.

संस्कारतो विरुद्धं यथा- "न कपोतान् सर्षपतैलभृष्टान्" इत्यादि।- *Saṃskāra Viruddha*: For example: The meat of *Kapota* (pigeon) when fried with mustard oil is considered as *Saṃskāra Viruddha*.

देशो द्विविधः- भूमिः, शरीरं च।- *Deśa* is of two types viz. *Bhūmi* (the land) and *Śarīra* (the body)

तत्र भूमिविरुद्धं यथा- "तदेव भस्मपांशुपरिध्वस्तम्", किंवा यत् किंचिदगोचरभृतं तद्देशविरुद्धं;- *Deśa Viruddha*: The meat of *Harila* bird when it falls over ashes or dust (*Or*) the meat of animals fed in unknown region is considered as *Deśa Viruddha*.

शरीरविरुद्धं यथा- उष्णार्तस्य मधु मरणाय।- *Śarīra Viruddha*: Intake of honey by the person exhausted by heat is the example for *Śarīra Viruddha*.

कालविरुद्धं यथा- पर्युषिता काकमाची मरणाय।- *Kāla Viruddha*: The use of stale *Kākamācī* is the example for *Kāla Viruddha*.

मात्राविरुद्धं यथा- समघृते मधुसर्पिषी मरणाय।- *Mātrā Viruddha*: Intake of equal quantity of ghee and honey causes death. This is the example for *Mātrā Viruddha*.

आदिग्रहणाद्दोषप्रकृत्यादिविरुद्धानां ग्रहणम्।- The usage of word '*Ādi*' is includes *Doṣa*, *Prakṛti* and the others also.

स्वभावविरुद्धं यथा- विषम्।- '*Svabhāva Viruddha* means just like poison.

Examples of Viruddhāhāra [82]

तत्र यान्याहारमधिकृत्य भूयिष्ठमुपयुज्यन्ते तेषामेकदेशं वैरोधिकमधिकृत्योपदेक्ष्यामः- न मत्स्यान् पयसा सहाभ्यवहरेत्, उभयं ह्येतन्मधुरं मधुरविपाकं महाभिष्यन्दि शीतोष्णत्वाद्विरुद्धवीर्यं विरुद्धवीर्यत्वाच्छोणितप्रदूषणाय महाभिष्यन्दित्वान्मार्गोपरोधाय च॥८२॥

Now some incompatible diets which are usually in practice are being explained as under.

- Fish (*Matsya*) should not be taken along with milk (*Paya*). Even though both possess *Madhura Rasa* and *Madhura Vipāka*, the *Vīrya* differs in those substances. Milk is having *Śīta Vīrya* whereas fish is *Uṣṇa Vīrya*. Thus they vitiate the blood (*Śoṇita pradūṣaṇa*) due to contradictory in potency (*Viruddha Vīrya*) and obstruct the channels of circulation (*Mārga-uparodhāya*) due to *Mahā-Ābhiṣyandi* (serious effusions).

Bhadrakāpya's Opinion about Cilicima Type of Fish [83]

तन्निशम्यात्रेयवचनमनु भद्रकाप्योऽग्निवेशमुवाच- सर्वानेव मत्स्यान् पयसा सहाभ्यवहरेदन्यत्रैकस्माच्चिलिचिमात्, स पुनः शकली लोहितनयनः सर्वतो लोहितराजी रोहिताकारः प्रायो भूमौ चरति, तं चेत् पयसा सहाभ्यवहरेन्निःसंशयं शोणितजानां विबन्धजानां च व्याधीनामन्यतममथवा मरणं प्राप्नुयादिति॥८३॥

- Having listened to Lord *Ātreya*, *Bhadrakāpya* told to *Agniveśa* that "All types of fish can be taken along with milk except *Cilicima* type of fish". *Cilicima* is identified with the following characteristics.
- *Śakalī* (having scales).
- *Lohita Nayana* (eyes are red).
- *Sarvato Lohita Rājī* (having red streaks all over the body).
- *Rohita Ākāra* (having the shape similar to red carp fish).
- *Prāyo Bhūmau carati* (almost it moved on the ground).
- If *Cilicima* type of fish is taken with milk it causes constipation, diseases related to blood and may even death.

Cakrapāṇi:

वैरोधिकमधिकृत्येति वैरोधिकमुद्दिश्य।- '*Vairodhikam Adhikṛtya*' means the description is related to the complications arises due to the intake of incompatible food substances.

शीतोष्णत्वादिति पयः शीतमुष्णवीर्याश्च मत्स्याः, शेषं मधुरत्वादि समानम्। एतच्च द्रव्यप्रभावादेव विरोधि।- '*Śītoṣṇatvāt*' means that milk is having *Śīta Vīrya* and the fish belongs to *Uṣṇa Vīrya*. '*Śeṣām*' - In other aspects like *Rasa* and *Vīrya* both these substances are similar as both contain *Madhura Rasa* and *Madhura Vipāka*. Due to *Dravya Prabhāva* it becomes incompatible.

'स पुनः शकली' इत्यादिना 'नान्दिनिः' इति ख्यातो मत्स्य उच्यते।- The fish '*Śakalī* ' is also known as '*Nāndini*'.



Rohita Matsya

Answer to Bhadrakāpya's Views as told by Bhagavān Ātreya

नेति भगवानात्रेयः- सर्वानेव मत्स्यान्न पयसा सहाभ्यवहरेद्विशेषतस्तु चिलिचिमं, स हि महाभिष्यन्दित्वात् स्थूललक्षणतरानेतान् व्याधीनुपजनयत्यामविषमुदीरयति च।

Lord *Ātreya* replied to *Bhadrakāpya* that one should not take any kind of fish and milk and especially *Cilicima* with milk, because it obstructs the channels of circulation greatly and causes diseases with clear symptoms and also produces *Āmaviṣa*.

Some Other Examples of Viruddhāhāra [84]

ग्राम्यानूपौदकपिशितानि च मधुतिलगुडपयो माषमूलकबिसैर्विरूढधान्यैर्वा नैकध्यमद्यात्, तन्मूलं हि बाधिर्यान्ध्यवेपथुजाड्यकलमूकतामैण्मिण्यमथवा मरणमाप्नोति। न पौष्करं रोहिणीकं शाकं कपोतान् वा सर्षपतैलभ्रष्टान्मधुपयोभ्यां सहाभ्यवहरेत्, तन्मूलं हि शोणिताभिष्यन्दधमनीप्रवि (ति) चयापस्मारशङ्खकगलगण्डरोहिणीनामन्यतमं प्राप्नोत्यथवा मरणमिति।

न मूलकलशुनकृष्णगन्धार्जकसुमुखसुरसादीनि भक्षयित्वा पयः सेव्यं, कुष्ठाबाधभयात्। न जातुकशाकं न निकुचं पक्वं मधुपयोभ्यां सहोपयोज्यम्, एतद्धि मरणायाथवा बलवर्णतेजोवीर्योपरोधायालघुव्याधये षाण्ढ्याय चेति। तदेव निकुचं पक्वं न माषसूपगुडसर्पिर्भिः सहोपयोज्यं वैरोधिकत्वात्।

तथाऽऽम्राम्रातकमातुलुङ्गनिकुचकरमर्दमोचदन्तशठबदरकोशाम्रभव्यजाम्बवकपित्थतिन्तिडीक- पारावताक्षोडपनसनालिकेरदाडिमामलकान्येवंप्रकाराणि चान्यानि द्रव्याणि सर्वं चाम्लं द्रवमद्रवं च पयसा सह विरुद्धम्। तथा कङ्गुवनकमकुष्ठककुलत्थमाषनिष्पावाः पयसा सह विरुद्धाः।

पद्मोत्तरिकाशाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं वातं चातिकोपयति। हारिद्रकः सर्षपतैलभृष्टो विरुद्धः पित्तं चातिकोपयति।

पायसो मन्थानुपानो विरुद्धः श्लेष्माणं चातिकोपयति।

उपोदिका तिलकल्कसिद्धा हेतुरतीसारस्य।

बलाका वारुण्या सह कुल्माषैरपि विरुद्धा, सैव शूकरवसापरिभृष्टा सद्यो व्यापादयति।

मयूरमांसमेरण्डसीसकावसक्तमेरण्डाग्निप्लुष्टमेरण्डतैलयुक्तं सद्यो व्यापादयति।

हारिद्रकमांसं हारिद्रसीसकावसक्तं हारिद्राग्नि-

प्लुष्टं सद्यो व्यापादयति; तदेव भस्मपांशुपरिध्वस्तं सक्षौद्रं सद्यो मरणाय।
मत्स्यनिस्तालनसिद्धाः पिप्पल्यस्तथा काकमाची मधु च मरणाय।
मधु चोष्णमुष्णार्तस्य च मधु मरणाय।
मधुसर्पिषी समघृते, मधु वारि चान्तरिक्षं समघृतं, मधु पुष्करबीजं, मधु पीत्वोष्णोदकं, भल्लातकोष्णोदकं, तक्रसिद्धः कम्पिल्लकः, पर्युषिता काकमाची, अङ्गारशूल्यो भासश्चेति विरुद्धानि।
इत्येतद्यथाप्रश्नमभिनिर्दिष्टं भवतीति॥84॥

- One should not take the meat of domestic, marshy and aquatic animals (*Grāmya-Ānūpa-Udaka Māṃsa*) along with honey (*Madhu*), sesamum seeds (*Tila*), jaggery (*Guḍa*), milk (*Paya*), blackgram (*Māṣa*), radish (*Mūlaka*), lotus stalk (*Bisa*) and germinated grains (*Virūḍha Dhānya*). By the intake of such incompatible foods he may be afflicted with deafness (*Bādhirya*), blindness (*Andha*), tremors (*Vepathu*), sluggishness (*Jāḍya*), dumbness (*Mūkatā*), nasal voice (*Mainmiṇya*) and even death (*Maraṇa*).
- Vegetables like *Pauṣkara*, *Rohiṇī* and meat of *Kapota* (dove) when fried in mustard oil should not be taken along with honey and milk. This may leads to obstruction of channels of circulation (*Śoṇita Abhiṣyanda*), dilatation of blood vessels (*Dhamanī Pravicaya*), *Apasmāra* (epilepsy), *Śaṅkhaka* (temporal headache), *Galagaṇḍa* (goiter), *Rohiṇī* (diphtheria) or even death.
- One should not take milk immediately after the consumption of *Mūlaka*, *Laśuna*, *Kṛṣṇagandhā*, *Ārjaka*, *Sumukhā*, *Surasā* etc., because it may cause *Kuṣṭha* (skin disorders).
- *Jātuka Śāka* (leaves of *Hiṅgu*) or ripe fruit of *Nikuca* (monkey jack fruit) should not be taken along with honey and milk. Otherwise it causes death or loss of strength (*Bala*), complexion (*Varṇa*), radiance (*Tejas*), virility (*Vīrya*), sterility (*Ṣāṇḍhya*) and other serious disorders (*Alaghu Vyādhi*) and even death.
- Similarly ripe fruit of *Nikuca* (monkey jack fruit) should not be taken along with blackgram soup (*Māṣa Sūpa*), jaggery (*Guḍa*) and ghee (*Sarpi*) because they are mutually contradictory.
- *Āmra, Āmrātaka, Mātuluṅga, Nikuca, Karamarda, Moca, Dantaśaṭha, Badara, Kośāmra, Bhavya, Jambū, Kapittha, Tintiḍī, Pārāvāta Māṃsa, Akṣoḍa, Panasa, Nālikera, Dāḍima, Āmalaka* and other solid and liquid sour substances should not be taken with milk because they are mutually contradictory.
- Similarly *Kaṅgu, Vanaka, Makuṣṭhaka, Kulattha, Māṣa* and *Niṣpāva* should not be taken with milk because they are also mutually contradictory.
- *Padmottarikā Śāka* (*Kusumbha*) should not be taken along with *Śarkarā Madya* or with *Maireya Madya* and honey, because it causes severe aggravation of *Vāta*.
- Meat of *Hāridraka* bird fried with mustard oil is incompatible and it causes aggravation of *Doṣās* especially *Pitta*.
- *Pāyasa* (milk pudding) when taken with *Mantha* (mixed beverage) is unwholesome and it aggravates *Doṣās* especially the *Kapha*.
- *Upodikā* when processed with *Tila Kalka* is unwholesome and causes *Atīsāra* (diarrhea).
- Meat of *Balākā* (crane) taken with *Vāruṇī* type of alcoholic beverage or with *Kulmāṣa* is incompatible. Similarly eating the meat of *Balākā* fried with *Śūkara Vasā* (muscle fat of a boar) cause instantaneous death.
- Through the stem of castor plant, the flesh of *Mayūra* (peacock) roasted on the flame of castor firewood and eats with castor oil causes immediate death.
- Through the stem of *Hāridra* plant, the flesh of *Hāridraka* (*Haritāla* bird) roasted on the flame of *Hāridra* firewood and by eats cause immediate death. Similarly when the meat of *Hāridraka* (*Haritāla* bird) sticks with the dust and ashes and taken along with honey also causes instantaneous death.
- Intake of *Pippalī* fried in a vessel used for cooking fish causes death. Similarly intake of honey along with *Kākamācī* causes death.
- When honey (*Madhu*) is heated and administered for the person suffering from heat, then causes death.
- Some of the incompatible food substances are mentioned as under:
- Equal quantity of honey and ghee (*Madhu Sarpiṣo Samaghṛte*).
- Equal quantity of honey and ghee along with rain water (*Madhu Āntarikṣa Vāri Samaghṛte*).
- Intake of honey along with the seeds of lotus (*Madhu Puṣkara-bījaṃ*).
- Intake of hot water after taking honey (*Madhu pītvoṣṇodakaṃ*).
- Consumption of *Bhallātaka* with hot water (*Bhallātakoṣṇodakaṃ*).
- *Kampillaka* boiled with buttermilk (*Takrasiddha Kampillaka*).
- Consumption of stored or stale *Kākamācī* (*Paryuṣitā Kākamācī*).
- Flesh of *Bhāsa* roasted with a grill or firestick (*Aṅgāra śūlyo Bhāsaśca*).
- Thus explanation was given according to the doubts raised by the disciples.

Cakrapāṇi:

ग्राम्यपिशितादीनि मध्वादीनामन्यतरेणापि विरुद्धानि।– Intake of the meat of domestic, marshy and aquatic animals (*Grāmya Piśitādīni*) along with any one of the substances like *Madhu*, *Tila*, *Guḍa*, *Kṣīra* is incompatible.

कलमूकतेति कलमूकता अव्यक्तवचनता।– '*Kalamūkatā*' means indistinct expression.

पौष्करादीनां मधुपयोभ्यां सहाभ्यवहारो विरुद्धः,– Intake of *Pauṣkara* and the other substances along with honey and milk is incompatible.

पौष्करं पुष्करत्रत्ररूपं शाकं, रोहिणी कटुरोहिणी।– '*Pauṣkara*' means 3 types of leafy vegetable. *Rohiṇī* means *Kaṭukarohiṇī*.

(धमनीप्रतिचयः सिराजग्रन्थिः।)– '*Dhamanī Praticaya*' means the gland developed in the blood vessels.

जातुशाकं वंशपत्रिका।– '*Jātu Śākaṃ*' means *Vaṃśa*

Patrikā i.e. leaves of bamboo

वैरोधिकत्वादित्यनेन प्रकरणलब्धस्यापि वैरोधिकत्वस्य पुनरभिधानं सामान्योक्तषाण्ढ्यादिव्याधिकर्तृतोपदर्शनार्थम्, एवमन्यत्रापि सामान्येऽपि वैरोधिकत्वमात्राभिधाने वक्तव्यम्।- Even if the term '*Vairodhikatvāt*' expresses the meaning of incompatibility, repetition of the word antagonism is just to emphasize the complications caused by this in general such as impotence etc. This can also be applied in other similar places.

तथाऽम्लेत्यादी अम्लग्रहणेन लब्धानाप्यम्लाम्रातकादीनामभिधानं विशेषविरोधसूचनार्थम्। - Even though the word '*Amla*' conveys the sour substances like *Amla, Āmrātaka* etc. in order to emphasize the nature of antagonism in particular the drugs *Amla, Āmrātaka* are separately mentioned.

सर्वग्रहणेनैव द्रवाद्रवाम्ले प्राप्ते पुनर्द्रवाद्रववचनं 'सर्व' शब्दस्य द्रवाद्रवाम्लकात्स्न्यार्थताप्रतिषेधार्थं, भवति हि प्रकरणादेकदेशेऽपि सर्वव्यपदेशः, यथा सर्वान् भोजयेदितिः, किंवा सर्वग्रहणमम्लविपाकानां व्रीह्यादीनां ग्रहणार्थम्।- In the context of sour substances by the usage of the word '*Sarva*' expresses the meaning of all the types of sour substances such as liquid and solid. Yet the mention of the terms *Drava* and *Adrava* is just to emphasize that sour substances in any form i.e. either in the liquid or solid form are incompatible when taken with milk. Otherwise it could be to include the substances having *Amla Vipāka* such as *Vrīhi* etc.

पयसेति तृतीयैव सहार्थे लब्धे पुनः सहेत्यभिधानं केवलाम्लादियुक्तस्यैव विरोधितोपदर्शनार्थं; तेन, अम्लपयःसंयोगे गुडादिसंयोगे सति विरुद्धत्वं न दुग्धाम्रादीनाम्।- The word '*Payasā*' itself is of the third form, which refers to the union; Then the word '*Saha*' can be used as a sign of opposition to sour substances with milk. When mango and milk is mixed or jaggery with milk is mixed, it is not antagonistic.

वनको वनकोद्रवः।- '*Vanaka*' means *Vana Kodrava*.

पद्मोत्तरिका कुसुम्भः।- '*Padmottarikā*' means *Kusumbha*.

शार्कर इति मैरेयविशेषणम्।- '*Śārkara*' is one type of alcoholic beverage prepared from sugar.

वातं चातिकोपयतीति वचनेन पित्तकफावल्पं कोपयतीति बोधयति; एवं पित्तं चातिकोपयति कफं चातिकोपयतीत्येतयोरपि वाच्यम्।- The word '*Vātaṃ ca Atikopayati*' should be understood as *Vāta* aggravates excessively and *Pitta* as well as *Kapha* also aggravates slightly. The same principle is also applicable for '*Pittaṃ ca Atikopayati*' and for '*Kaphaṃ ca Atikopayati*'.

हारिद्रको 'हरिताल' इति ख्यातः पक्षी।- '*Hāridraka*' means the popular bird named *Haritāla*.

बलाका वारुण्या सह विरुद्धा, तथा कुल्माषैश्च बलाका विरुद्धा।- Intake of the meat of '*Balākā*' (crane) along with *Vāruṇi* (a type of wine) is incompatible. Similarly the meat of '*Balākā*' with *Kulmāṣa* (wheat or black gram soaked in water and then boiled in low fire for the whole day) is also antagonistic.

एरण्डसीसकावसक्तमिति एरण्डकाष्ठावसक्तं, सीसको हि भटित्रकरणकाष्ठमुच्यते।- '*Eraṇḍa Sīsakāvasaktam*' means hanging through the stem of castor plant. '*Sīsaka*' means furnace wood.

तदेवेति हारिद्रकमांसम्।- '*Tadeva*' means similar to the meat of the bird *Hāridraka*

मत्स्या निस्ताल्यन्ते पच्यन्ते यस्मिन् तन्मत्स्यनिस्तालनं; किंवा निस्तालनं वसा, जतूकर्णेऽप्युक्तं- "मत्स्यवसासिद्धाः पिप्पल्यः" इति।- '*Matsya Nistālanaṃ*' means that it should be considered as the muscle fat (*Vasā*) of the fish. *Jatūkarṇa* is also opined the similar view.

काकमाची मधु चेति संयोगविरुद्धम्।- Intake of *Kākamācī* along with honey is considered as *Saṃyoga Viruddha*.

भासो गोष्ठकुक्कुटः।- '*Bhāsa* means *Goṣṭha Kukkuṭa*.(a kind of crow).

Definition of Viruddhāhāra [85]

भवन्ति चात्र श्लोकाः-

यत् किञ्चिद्दोषमास्राव्य न निर्हरति कायतः।
आहारजातं तत् सर्वमहितायोपपद्यते॥८५॥

Thus it is said:

All the food substances which dislodge the *Doṣās* from their site and unable to eliminate from the body are considered as incompatible.

Cakrapāṇi:

अनुक्तवैरोधिकसंग्रहार्थमाह- यत् किञ्चिदित्यादि।- By starting the verse with the word '*Yat Kiñcit*', the author has presented the other incompatible substances, which were not mentioned earlier.

आह्रियत इत्याहारो भेषजमपि।- '*Āhriyata*' means which are consumable; means food substances as well as medicinal substances.

दोषमास्राव्येति दोषानुत्क्लिष्टरूपान् जनयित्वा न निर्हरतीति। अनेन वमनविरेचनद्रव्याणि निराकरोति, तानि हि दोषानास्राव्य निर्हरन्ति।- '*Doṣamāsrāvya*' means that the substances which dislodge the *Doṣās* from their site and unable to eliminate from the body. But the drugs such as emetics and purgatives are excluded from this category as they are capable in elimination of vitiated *Doṣās* from the body.

Different Types of Viruddhāhāra [86-87]

यच्चापि देशकालाग्निमात्रासात्म्यानिलादिभिः।
संस्कारतो वीर्यतश्च कोष्ठावस्थाक्रमैरपि॥८६॥
परिहारोपचाराभ्यां पाकात् संयोगतोऽपि च।
विरुद्धं तच्च न हितं हृत्संपद्विधिभिश्च यत्॥८७॥

The following are the different types of *Viruddhāhāra*:

- *Deśa Viruddha* (incompatible due to place / habitat).
- *Kāla Viruddha* (incompatible due to time / season).
- *Agni Viruddha* (incompatible due to digestive power).
- *Mātrā Viruddha* (incompatible due to dosage / quantity).
- *Sātmya Viruddha* (incompatible due to habit).
- *Doṣa Viruddha* (incompatible due to *Doṣās*).
- *Saṃskāra Viruddha* (incompatible due to processing).
- *Vīrya Viruddha* (incompatible due to potency).
- *Koṣṭha Viruddha* (incompatible due to variation of bowels).
- *Krama Viruddha* (incompatible due to variation in the order).
- *Parihāra Viruddha* (incompatible due to avoidance).
- *Upacāra Viruddha* (incompatible due to usage).
- *Pāka Viruddha* (incompatible due to cooking).
- *Saṃyoga Viruddha* (incompatible due to combination).
- *Hṛd Viruddha* (incompatible due to palatability).
- *Sampat Viruddha* (incompatible due to richness in quality).
- *Vidhi Viruddha* (incompatible due to

variation in rules of eating).

Deśa Viruddha [88]

विरुद्धं देशतस्तावद्रूक्षतीक्ष्णादि धन्वनि।
आनूपे स्निग्धशीतादि भेषजं यन्निषेव्यते॥88॥

➤ Consumption of *Rūkṣa-Tīkṣṇa Guṇa* substances in a place of desert land; and *Snigdha-Śīta Dravyās* in marshy land is considered as *Deśa Viruddha*.

Kāla Viruddha [89]

कालतोऽपि विरुद्धं यच्छीतरूक्षादिसेवनम्।
शीते काले, तथोष्णे च कटुकोष्णादिसेवनम्॥89॥

➤ Intake of *Śīta-Rūkṣa* substances during *Śīta Kāla;* and *Kaṭu-Uṣṇa Dravyās* in *Uṣṇa Kāla* are considered as *Kāla Viruddha*.

Anala Viruddha

विरुद्धमनले तद्वदन्नपानं चतुर्विधे।

➤ Intake of different type of food in 4 types of *Agni* is known as *Anala Viruddha*. For ex. heavy food in *Mandāgni* and light food in *Tīkṣṇāgni*.

Mātrā Viruddha [90]

मधुसर्पिः समधृतं मात्रया तद्विरुध्यते॥90॥

➤ Intake of *Madhu* and *Ghṛta* in equal quantity is the example for *Mātrā Viruddha*.

Sātmya Viruddha

कटुकोष्णादिसात्म्यस्य स्वादुशीतादिसेवनम्।
यत्तत् सात्म्यविरुद्धं तु

➤ Intake of sweet and cold substances (*Madhura* and *Śīta Sevana*) by the persons accustomed to pungent and hot substances (*Kaṭu-Uṣṇa Sātmya*) is the example for *Sātmya Viruddha*.

Doṣa Viruddha [91]

विरुद्धं त्वनिलादिभिः॥91॥
या समानगुणाभ्यासविरुद्धान्नौषधक्रिया।

➤ Utilization of drug, diet and regimen having similar properties to *Doṣa* but contrary to the practice of individual is *Doṣa Viruddha*.

Saṃskāra Viruddha [92]

संस्कारतो विरुद्धं तद्यद्भोज्यं विषवद्भवेत्॥92॥
एरण्डसीसकासक्तं शिखिमांसं यथैव हि।

➤ If the food article becomes like a poison due to processing it is known as *Saṃskāra Viruddha*. For ex.: Flesh of *Mayūra* (peacock) roasted on the flame of castor firewood through the stem of castor plant.

Vīrya Viruddha [93]

विरुद्धं वीर्यतो ज्ञेयं वीर्यतः शीतलात्मकम्॥93॥
तत् संयोज्योष्णवीर्येण द्रव्येण सह सेव्यते।

➤ Simultaneous consumption of *Uṣṇa Vīrya* and *Śīta Vīrya* substances is known as *Viruddha Vīrya*.

Koṣṭha Viruddha [94]

क्रूरकोष्ठस्य चात्यल्पं मन्दवीर्यमभेदनम्॥94॥
मृदकोष्ठस्य गुरु च भेदनीयं तथा बहु।
एतत् कोष्ठविरुद्धं तु,

➤ Administration of drug having mild poteny and less purgative action to the person having *Krūra Koṣṭha*; and higly potent, drastic purgative and heavy dosage to the person having *Mṛdu Kosha* is known as *Koṣṭha Viruddha*.

Avasthā Viruddha [95-96]

विरुद्धं स्यादवस्थया॥95॥
श्रमव्यवायव्यायामसक्तस्यानिलकोपनम्।
निद्रालसस्यालसस्य भोजनं श्लेष्मकोपनम्॥96॥

➤ Eating *Vāta aggravting* food after exhaustion, sexual intercourse and physical exercises; and *Kapha* aggravating food after sleep or idleness is known as *Avasthā Viruddha*.

Krama Viruddha [97]

यच्चानुत्सृज्य विण्मूत्रं भुङ्क्ते यश्चाबुभुक्षितः।
तच्च क्रमविरुद्धं स्याद्यच्चातिक्षुद्वशानुगः॥97॥

➤ Intake of the diet without excreting the stools and urine; and consumption of food when there is no appetite or when the hunger is too much aggravated are the examples for *Krama Viruddha*.

Parihāra Viruddha [98]

परिहारविरुद्धं तु वराहादीन्निषेव्य यत्।
सेवेतोष्णं घृतादींश्च पीत्वा शीतं निषेवते॥98॥

➤ Intake of hot substances after taking pork; and cold substances after taking ghee are the examples for *Parihāra Viruddha*.

Pāka Viruddha

विरुद्धं पाकतश्चापि दुष्टदुर्दारुसाधितम्।
अपक्वतण्डुलात्यर्थपक्वदग्धं च यद्भवेत्।

➤ Preparation of food with bad or damaged firewood; grains being not properly cooked, or excessively cooked or burnt are the examples for *Pāka Viruddha*.

Saṃyoga Viruddha [99]

संयोगतो विरुद्धं तद्यथाऽम्लं पयसा सह॥99॥

➤ Intake of milk along with sour substances is the example for *Saṃyoga Viruddha*.

Hṛd-Viriddha

अमनोरुचितं यच्च हृद्विरुद्धं तदुच्यते।

➤ Any substance which is not pleasant in taste is known as *Hṛd-Viruddha*.

Sampat Viruddha [100]

संपद्विरुद्धं तद्विद्यादसंजातरसं तु यत्॥100॥
अतिक्रान्तरसं वाऽपि विपन्नरसमेव वा।

➤ Intake of the substances which are yet to be ripened; over ripened or putrefied are called *Sampat Viruddha*.

Vidhi Viruddha [101]

ज्ञेयं विधिविरुद्धं तु भुज्यते निभृते न यत्।
तदेवंविधमन्नं स्याद्विरुद्धमुपयोजितम्॥101॥

➤ Intake of food in public places or not taken in privacy is the example for *Vidhi Viruddha*.

Cakrapāṇi:

यच्चापि देशकालाग्नीत्यादिग्रन्थं केचित् पठन्ति, स च

व्यक्त एव।– '*Deśa, Kāla* and *Agni Viruddha* etc. is read in certain treatises. The meaning of the above verses is clear.

Complications of Viruddhāhāra [102-103]

षाण्ढ्यान्ध्यवीसर्पदकोदराणां विस्फोट-
कोन्मादभगन्दराणाम्। मूर्च्छामदाध्मानगलग्रहाणां
पाण्ड्वामयस्यामविषस्य चैव॥102॥
किलासकुष्ठग्रहणीगदानां शोथाम्लपित्त-
ज्वरपीनसानाम् सन्तानदोषस्य तथैव
मृत्योर्विरुद्धमन्नं प्रवदन्ति हेतुम्॥103॥

The following are the complications arise due to intake of *Viruddhāhāra*.

- *Ṣāṇḍhya* (infertility).
- *Andhya* (blindness).
- *Vīsarpa* (erycipelas).
- *Dakodara* (ascites).
- *Visphoṭa* (eruptions).
- *Unmāda* (insanity).
- *Bhagandara* (fistula in ano).
- *Mūrcchā* (fainting).
- *Mada* (intoxication).
- *Ādhmāna* (abdominal distension with pain due to lower gut obstruction).
- *Galagraha* (spasmodic obstruction in the throat).
- *Pāṇḍūroga* (anaemia).
- *Āmaviṣa* (intoxication due to improper digestion).
- *Kilāsa* (vitiligo).
- *Kuṣṭha* (skin disorders).
- *Grahaṇī* (dysentery).
- *Śotha* (oedema).
- *Amlapitta* (hyperacidity).
- *Jvara* (fever).
- *Pīnasa* (coryza).
- *Santāna-Doṣa* (fetal disorders).
- *Mṛtyu* (death).

Cakrapāṇi:

षाण्ढ्यं नपुंसकता।– '*Ṣāṇḍhya*' means impotence.

सन्तानदोषो मृतवत्सत्वादिः।– '*Santāna Doṣa*' means stillbirths etc.

एतच्च वैरोधिककथनं विशेषवचनेन बाध्यते; तेन लशुनस्य क्षीरेण पानं क्वचित्र विरोधि; यदुक्तं- "साधयेच्छुद्धशुष्कस्य लशुनस्य चतुष्पलम्। क्षीरोदकेऽष्टगुणिते क्षीरशेषं च पाययेत्" (चि.अ.5), तथा "मूलकस्वरसं क्षीरं" इत्यादिप्रयोगेषूत्रेयम्।- The general rule of antagonism is altered in specific conditions. For example: *Laśunakṣīra pāna* never gets contradictory. Take 4 *Pala* of healthy and dried *Laśuna* and should be cooked by adding 8 times milk and water till the water is completely evaporated and then to be administered internally (Ca. Ci. 5/94). Similarly *Mūlaka Svarasa* with milk is also indicated.

किंवा, अनेकद्रव्यसंयोगादत्र विरोधिनामविरोधः; विरोधिमात्रसंयोग एव विरोधी भवति।– Apart from this, the antagonist is limited to the specific combination of particular substances, but not in the case of addition of other substances.

यतु मधुन उष्णेन वमनेन संयुक्तस्य सत्यपि मदनफलादिद्रव्यसंयोगेऽविरोधार्थमुक्तमपक्वगमनादि, तन्मधुनो द्रव्यान्तरसंयोगेऽप्युष्णसंबन्धात्ते विरोधित्वोपदर्शनार्थं; यतो विषान्वयं मधु, विषस्य चोष्णविरोधि।– Honey when it is added hot emetic decoctions and is not going to become antagonistic as it is expelled without being digested. Apart from this honey is not exhibiting the antagonism due to the combination of various other drugs. And also honey is prescribed for the treatment of poison which is hot and honey is contrary to hot substances.

लशुनादीनां तु द्रव्यान्तरासंयोगे सत्येव मेलको विरुद्ध इति शास्त्रवचनादुन्नीयते।– If *Laśuna* etc. has not been properly added to other substances, then only display its antagonism and this fact can be known based on classical statements.

Management of the Complications of Viruddhāhāra [104-113]

एषां खल्वपरेषां च वैरोधिकनिमित्तानां व्याधीनामिमे भावाः प्रतिकारा भवन्ति। तद्यथा- वमनं विरेचनं च, तद्विरोधिनां च द्रव्याणां संशमनार्थमुपयोगः, तथाविधैश्च द्रव्यैः पूर्वमभिसंस्कारः शरीरस्येति॥104॥

The above mentioned complications should be managed by means of the following measures:

- *Emesis* and purgation therapies (*Vamana* and *Virecana*).
- Adminstration of opposite substances useful for relieving complications (*Virodhināṃ ca Dravyāṇāṃ Saṃśamanārtham Upayogaḥ*).
- By adopting prophylactic measures.

भवतश्चात्र-
विरुद्धाशनजान् रोगान् प्रतिहन्ति विवेचनम्।
वमनं शमनं चैव पूर्वं वा हितसेवनम्॥105॥
सात्म्यतोऽल्पतया वाऽपि दीप्ताग्नेस्तरुणस्य च।
स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत्॥106॥

Thus it is said:

- The complications due to *Viruddhāhāra* can be managed by means of emesis, purgation, pacification and prior use of wholesome substances.
- *Viruddhāhāra* doesn't cause any ill effects in the following cases:
- Who are habituated to take incompatible food (*Sātmyata*).
- Intake of less quantity of incompatible substances (*Alpatayā*).
- Whoever has strong digestive fire (*Dīptāgni*).
- In the young age (*Taruṇa*).
- Whoever has undergone oleation therapy (*Snigdha*).
- Whoever has strong physic due to exercises (*Vyāyāma Balināṃ*).

Cakrapāṇi:

तद्विरोधिनामिति षाढ्यादिहराणाम्।– '*Tadvirodhināṃ*' means the opposite substances which will be useful for the management of complications like *Ṣāṇḍhya* etc.

तथाविधैरिति विरुद्धाहारजव्याधिविरुद्धैः।– '*Tathā Vidhaiḥ*' means that which are opposite to the diseases caused due to consumption of incompatible substances.

अभिसंस्कार इति सततोपयोगेनशरीरभावनम्। किंवा तथाविधैरितिरसायनप्रयोगैः।एतच्चानागताबाधचिकित्सितं ज्ञेयम्।– '*Abhisaṃskāra*' means make the substances compatible to the body elements by their regular use. By the use of *Rasāyana*, the immunity power in the body will be increased and also results in the prevention of the diseases.

To Sum Up [107-113]

तत्र श्लोकाः:-
मतिरासीन्महर्षीणां या या रसविनिश्चये।

द्रव्याणि गुणकर्मभ्यां द्रव्यसंख्या रसाश्रया॥107॥
कारणं रससंख्याया रसानुरसलक्षणम्।
परादीनां गुणानां च लक्षणानि पृथक्पृक्॥108॥
पञ्चात्मकानां षट्त्वं च रसानां येन हेतुना।
ऊर्ध्वानुलोमभाजश्च यद्गुणातिशयाद्रसाः॥109॥
षण्णां रसानां षट्त्वे च सविभक्ता विभक्तयः।
उद्देशश्चापवादश्च द्रव्याणां गुणकर्मणि॥110॥
प्रवरावरमध्यत्वं रसानां गौरवादिषु।
पाकप्रभावयोर्लिङ्गं वीर्यसंख्याविनिश्चयः॥111॥
षण्णामास्वाद्यमानानां रसानां यत् स्वलक्षणम्।
यद्यद्विरुध्यते यस्माद्येन यत्कारि चैव यत्॥112॥
वैरोधिकनिमित्तानां व्याधीनामौषधं च यत्।
आत्रेयभद्रकाप्यीये तत् सर्वमवदन्मुनिः॥113॥

In the present chapter entitled *Ātreya-Bhadrakāpyīya Adhyāya* - The author has presented the discussions held among the sages regarding various opinions on *Rasa* - Qualities and Actions of *Dravya* - Number of drugs according to Taste - Factors determining number of Tastes - Definition of *Rasa* and *Anurasa* - *Parādi Guṇa* and their individual features - Factors leading to the formation of *Ṣaḍrasa* out of *Pañcamahābhūta*- Rationality in upward and downward movement of substances of different tastes - Different combinations and permutations of *Ṣaḍrasa* - Explanation and exceptions for qualities and actions of substances - *Pravara Madhyama* and *Avara* of tastes for producing heaviness etc. - Definitions of *Vipāka*, *Prabhāva* - determination of number of *Vīrya* - Specific features of *Ṣaḍrasa* - *Viruddhāhāra* - Complications due to intake of *Viruddhāhāra* and their management etc.

Cakrapāṇi:

संग्रहे द्रव्यसंख्या रसाश्रया इति 'भेदश्चैषां' इत्यादिना; रससंख्या हि परमार्थतो द्रव्यसंख्यैव, निर्गुणत्वाद्रसानामिति भावः।- While summing up the chapter it is mentioned the enumeration of *Dravyāsrita Rasa*. In fact the *Rasa Saṅkhyā* should be treated as *Dravya Saṅkhyā* as *Rasa* is *Guṇa* and *Guṇa* cannot exist in *Guṇa*.

कारणं रससंख्याया इति 'रसानां तत्र योग्यत्वात्' इत्यादिना।- The reason for the mentioning of number of *Rasās* is that those combinations are capable in performing different types of functions.

विभक्तयो भेदः 'तत्र मधुर' इत्यादिना।- '*Vibhakti*' means the varieties of *Rasās* such as *Madhura*, *Amla* etc.

उद्देशो द्रव्याणां 'शीतं वीर्येण' इत्यादिना, अपवादो द्रव्याणां 'मधुरं किंचित्' इत्यादिना।- The mention of the word '*Śītaṃ Vīryeṇa*' describes the characteristics and actions of certain drugs briefly. With the word '*Madhuraṃ Kiṃcit*' it shows the denial of the attributes and functions of some other drugs.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने आत्रेयभद्रकाप्यीयो नाम षड्विंशोऽध्यायः॥26॥

Thus ends the Twenty Sixth chapter of *Ślokasthāna* entitled *Ātreya-Bhadrakāpyīya Adhyāya* which was composed by *Agniveśa* and redacted by *Caraka*.

***

27 CHAPTER